Again, Bhagavadbhaṭṭa is aware of the difficulty of his situation. He is fully conscious of his *guru*'s learned and skillful treatment of the subject *śabda-śakti*. He, therefore, carefully avoids unnecessary repetitions. For example, he does not touch *saṅketa, tātparya vṛtti*, relationship between the denotative and the indicative meanings, etc. Instead, he picks up the technical topics like *sphoṭa* theory, polysemic words, *śabdaśāstra* and so on and so forth. There are also instances where Bhagavadbhaṭṭa seeks to detail upon the cursory treatment given to some discussions by Āśādharabhaṭṭa bringing in some more elaborations from other sources such as *Siddhāntakaumudī, Manoramā, Śrīdharī* commentary on *Bhāgavata Purāṇa* and also *Vaṁśīdharī* thereon. The discussions on *lakṣaṇā* in द्रोणो व्रीहिः[55] and in न जातु ब्राह्मणं हन्यात्[56] are such examples.

To conclude, we can say that in the treatment of *śakti*, i.e. *abhidhā*, Bhagavadbhaṭṭa brings in all the sciences which deals with epistemology — Nyāya, Mīmāṁsā, Vyākaraṇa, etc. Thus it becomes an important major topic. He there clarifies the fundamentals of epistemological ultimate, the entities —

---

[54] Vide, *VD*, p. 41.

[55] Ibid., p. 62.

[56] Ibid., p. 60-61.

the word and its meaning. Coming to *lakṣaṇā*, the scope for originality becomes limited to that of interpreting various examples, and of refuting the opinion of the Vaiyākaraṇas. Same is the case with *vyañjanā*, where he repeats the arguments of Ānandavardhana, Mammaṭa and Āśādhara in support of *dhvani, vyañjanā* suggestion. What he adds is his own verse सत्यासक्तमना:,[57] etc. and its fivefold interpretation in detail. However, he has added the description of *rasa* theory[58] almost verbatim from the predecessors. To do him justice, we must say that nothing original or new can be said or is left out so far as the subject of *śabda-śakti* is concerned.

As we have seen in a detailed analysis of commentary *Nūtanatarī*, there also he has explained almost each and every word of the original text, i.e. *Rasataraṅgiṇī* with the support of lexicons, exposed its etymology with the help of Pāṇini or *Unādisūtra* or other authentic sources, identified the figures of speech and metres in the illustrative verse along with the discussion of variant debatable readings and in addition to that, he has added the debate about *sthāyī–vyabhicārī bhāva* and distinction between *rasa* and *alaṁkāra*, etc. *Nūtanatarī* as a commentary is also an ideal gloss abundant with allusions, citations and stray references from related standard texts as we have already discussed.

What is remarkable, appreciable and outstanding about *Vicāradīpa*, a *vāda grantha*, is his argumentative *bhāṣya* style and the spontaneity, ease and lucidity with which he moves into various Śāstras. In both the works, Bhagavadbhaṭṭa, in the sweep of the topic under discussion, sometimes enters into such subtleties of theoretical hairsplitting as would at once be a pointer to the excellent scholarship of the author as well as the delight to the learned connoisseurs. Especially in *Vicāradīpa*, one would be

---

[57] Vide *VD*, pp. 80-86.

[58] Ibid., pp. 60-65.

prompted to say that some discussions are remotely connected with the central topic of the work. But we must not forget his *pratijñā* to make it into a *vāda grantha*. The topic of *śabda-śakti* might enjoy the excursions into different Śāstras; at one moment it is Vyākaraṇa, at another we may pass through the forest of Mīmāṁsā or even we may have a dip into philosophy and so on. In fact, *Vicāradīpa* is a delightful excursion of a learned scholar into various branches of learning and this equally applies to *Nūtanatarī*, a scholarly gloss on the famous treatise *Rasataraṅgiṇī*.

Such excursion was not possible without an exemplary freedom of mind which Bhagavadbhaṭṭa shows not only in his differences from his *guru* (of course, with due respect) but also in his discussions about the readings which have long-standing acceptance in the most popular texts like *Raghuvaṁśam* or *Śrīmadbhagavadgītā* or famous verses. One point must be noted here: this worthy student of Āśādharabhaṭṭa has been inspired and trained by his *guru* who himself has given some four or five works even on Sanskrit grammar.[59] Bhagavadbhaṭṭa is so thoroughly steeped in the Śāstras that not only the discussable words in *Vicāradīpa* and even in *Nūtanatarī* come to him handy from any of the well-known floating exuberance of Śāstras, but even his discussions upon these words very easily and naturally glide into our traditionally accepted śāstric style. That perhaps may be taken as Bhagavadbhaṭṭa's strong point in his work. A strange but appropriate counterpart of his inclination for Śāstras is apparent when we find at least five of his own illustrations (i.e. those which are not traditionally handed down in the previous works) from *Naiṣadhacaritam* and two from *Śiśupālavadham* both of which are called *śāstrakāvya*s. This profusion of illustrations from *Naiṣadha* (also in *Nūtanatarī*) and *Śiśupālavadham* shows his shastric tendency.

---

[59] The MSS of these works are traced out from Oriental Institute Baroda and Chunilal Gandhi Vidya Bhavan, Surat. R.I. Nanavati (Ex-Director, Oriental Institute, Baroda) is working on the same.

Any region could have been proud of such a learned scholar versatile in various Śāstras. We are happy to realize that not only Āśādharabhaṭṭa himself an excellent scholar of wide range of knowledge, but also Bhagavadbhaṭṭa, a worthy student of this well-known *paṇḍita* hailed from Gujarat which is often accused of little acumen and lack of versatility. That Āśādharabhaṭṭa was from Gujarat is an established fact and Bhagavadbhaṭṭa leaves fingerprints of his Gujaratiness at one or two places in *Vicāradīpa* and clearly mentions Lālīgrāma in the central part of Gujarat near Ahmedabad. Thus, this learned pair of the teacher and the taught makes Gujarat proud by their important contribution to *śāstra* literature in Sanskrit. Incidentally, we must mention that Bhagavadbhaṭṭa could have composed at least some poetic verses since he has quoted one, viz. सत्यासक्तमनाः . . . (*VD*, p. 80) as an example of *abhidhāmūlā vyañjanā* and Āśādhara has also given his own verse as an example of *śabdaśaktimūlā vyañjanā*. Such a *paṇḍita* with a rare scholarship was moving about among us in Gujarat some 200 hundred years ago! And that is a matter of great pride and honour for us all.

The *lacunae* that have been left in both the texts (*Vicāradīpa* and *Nūtanatarī*) leave the editor sometimes helpless and one wishes the editor could have availed herself of the help of at least one more manuscript of these works since the corrupt readings often leave one in doubt whether the emendations made in the text are correct or appropriate. A *codex unicum* makes the editor sometimes face such problems as have no solution. However, it is hoped that the critical edition of this manuscript (*Nūtanatarī*) may show some sound guidelines to the problems of manuscriptology.

भानुदत्तविरचिता रसतरङ्गिणी

भगवद्भट्टविरचितनूतनतरीव्याख्यासहिता

॥ प्रथमस्तरङ्गः ॥

ॐ गौरीं त्रिलोकजननीं जनकं जगत्याः
शम्भुं शशाङ्ककलया च विराजमानम् ।
हृत्पुण्डरीककुहरे[1] स्थिरभावयोग-
गम्यं नमामि भगवानहमर्थसिद्धये ॥१॥

श्रीमदाशाधरगुरोः प्रसादात्क्रियते मया ।
तरी रसतरङ्गिण्याष्टीकेयं नातिविस्तरा ॥२॥

श्रीगणेशाय नमः । त्रयाणां लोकानामूर्ध्वाधोमध्यवर्त्तिनां जगच्छब्दवाच्यानां जननीं कर्त्रीम् । जगत्याः लोकाधिष्ठानभूताया रोदसीशब्दवाच्याया जनकं सृष्टारम् । **जगत्यां जगदि** (ई०उ०१/१)ति श्रुतौ[2] दर्शनात् पृथक् निर्देशः[3] । वस्तुतस्तु प्रपञ्चमातापितरावित्यर्थः । अथात्र भगवान् भानुदत्तनामा कवी रसतरङ्गिण्याख्यं ग्रन्थं चिकीर्षुस्तं निर्विघ्नसमाप्त्यर्थं शिष्टाचारार्थं चात्रादौ मङ्गलमाचरति- **लक्ष्मीमिति-**

॥ श्रीगणेशाय नमः ॥

॥ॐ नमः॥

लक्ष्मीमालोक्य लुभ्यन्निगममुपहसन् शोचयन्यज्ञजन्तून्
क्षत्रं शोणाक्षि पश्यन्समिति दशमुखं वीक्ष्य रोमाञ्चमञ्चन् ।
हत्वा हैयंगवीनं चकितमपसरन् म्लेच्छरक्तैर्दिगन्तान्
सिञ्चन् दन्तेन भूमिं तिलमिव तुलयन् पातु मां पीतवासाः॥१॥

पीतं वासो यस्य स पीतवासाः । पीताम्बरः । अत्र विशेषणमात्रप्रयोगात् विशेष्यस्य विष्णोः प्रतीतिः । प्रसिद्ध्या झटित्यस्यैव बोधादन्यस्य पूर्वोक्तविशेषणविशिष्ट-त्वाभावाच्च । मां पातु रक्षतु । प्रार्थनायां लोट् । लक्ष्मीं रमामालोक्य दृष्ट्वा । अब्धिमथनसमये इति शेषः । एवमन्यत्रापि यथायोगं कालविशेषाध्याहारो बोध्यः ।

---

१ रो २ ऋ० ३ ०शाः

लुभ्यन् । **लुभ गार्ध्ये**(धातु०१२३९)इति धातोः कालसामान्ये लट् । तथा च भाष्यम्- कालसामान्ये लट् प्रयोग इति । पुरस्तादप्येवं ज्ञेयम् । तथा निगमं वेदं उपहसन् । 'त्रयो वेदस्य कर्त्तारो मुनिभाण्डनिशाचरा' इत्यादिवाक्यैर्बुद्धावतारे श्रुत्युपहासं कुर्वन् । यद्वा किंवायं मम सामग्र्येण निरूपयितुं समर्थ इत्युपहासं कुर्वन्नित्यर्थः । पुनः कीदृशः । यज्ञस्य जन्तवः । अजाश्वादयः पशवस्तान् । शोचयन् । जनैरिति शेषः । **शुच् शोके** (धातु०१८३)इति धातोर्हेतुमणिचि । तथा शोणाक्षि । शोणे अक्षिणी यस्यां क्रियायां यथा तथा । क्षत्रम् । क्षद् संवरणे । क्षदतीति क्षत्रम् । यद्वा 'क्षतात् त्रायते' इति प्रसिद्ध्युत्पत्तौ[1] **पृषोदरादि** (पा०अ०६/३/१०९) त्वात्तकाराकारलोपः । जातित्वादेकवचनम् । पश्यन् । तथा समिति संग्रामे दशमुखं रावणम् । वीक्ष्य दृष्ट्वा । रोमाञ्चं अञ्चन् गच्छन् । तथा[2] हैयंगवीनं[3] नवनीतम् । **हैयंगवीनं संज्ञाया** (पा०अ०५/२/२३)मिति निपातनात् साधुः । हृत्वा चोरयित्वा । चकितम् सभयं यथा तथा । अपसरन् पलायमान इत्यर्थः । म्लेच्छानां[4] रक्तैः रुधिरैः। दिगन्तान् दिशां प्रान्तान् । सिञ्चन् । तथा दन्तेन दंष्ट्रया । भूमिं पृथ्वीम् । तिलमिव तुलयन् । तिलतुल्यां गणयन् । **तुल्यार्थैरतुलोपमाभ्या**(पा०अ०२/३/७२)मिति ज्ञापकात् सादृश्यपर्यायात्तुलाशब्दात्तत्करोति तदाचष्ट इति णिजन्ताल्लटः[5] शत्रादेशः स्थानिवद्भावात् गुणेन । अत्राष्टभिः प्रथमान्तविशेषणैर्यथानुक्रमं शृङ्गारादयोऽष्टौ रसाः अभिव्यज्यन्ते । स्रग्धरावृत्तम् ॥१॥[@]

भारत्याः शास्त्रकान्तारश्रान्तायाः शैत्यकारिणी ।
क्रियते भानुना भूरिरसा रसतरङ्गिणी ॥ २ ॥

अत्र पूर्वश्लोकाभिव्यक्तान् शृङ्गारादिरसान् विविच्य निरूपयितुं कविश्चिकीर्षितं प्रतिजानीते **भारत्या** इति । शास्त्राण्येव कान्तारं वनम् । तत्र श्रान्तायाः भारत्याः वाग्देव्याः शैत्यकारिणी सुखकर्त्री । अत्र शैत्यशब्देन तज्जन्ये सुखे लक्षणा । वनश्रान्तस्य शीतलवस्तुनिषेवणेन श्रमापनोदात् सुखं भवतीति भावः । तथा भूरयः रसा यस्यां सा । भूधातोरौणादिकः किन् प्रत्ययः एकत्र भूरयः । अष्टौ रसाः

---

१ प्त० । २ थो । ३ हे । ४ । म्लें० । ५ ०णो० ।

@ लक्ष्मीमालोक्य लुभ्यन्-शृङ्गार,निगममुपहसन्-हास्य, शोचयन् यज्ञजन्तून्- करुण,क्षत्रं शोणाक्षि पश्यन्-रौद्र, समिति दशमुखं अञ्चन्-वीर, हृत्वा अपसरन्- भयानक, म्लेच्छरक्तै....सिञ्चन्-बीभत्स, दन्तेन भूमिं.... तुलयन्-अद्भुत.*Thus eight rasas are suggested in the maṅgala śloka.*

शृङ्गारादयः[@] अन्यत्र बहुलजाला चेत्यर्थः । एतादृशाः रसा एव रसा इति श्लिष्टरूपकम् । तरङ्गिणी एव तरङ्गिणीत्युभयत्रापि वृत्तौ साध्यवसाना लक्षणा । भानुना पण्डितेन क्रियते विरच्यते ॥ २ ॥

वाणी कमलिनी भानोरेषा रसतरङ्गिणी ।
हंसाः कृतधियस्तत्र[१] युक्तमत्र प्रतीयताम् ॥३॥

वाणीति । एषा बुद्धिस्था । रसतरङ्गिणी । ग्रन्थरूपा सरित् । वर्त्तत इति शेषः । एवं यत्र यस्य प्रयोजनं तस्य तत्राध्याहारः कर्त्तव्यः । वाक्येष्वाकाङ्क्षितैकदेशपूरणमध्याहारः । तत्र भानोर्वाणी । कमलिनी वर्त्तते । अत्र वाणीग्रन्थयोर्भेदाभावेऽपि चमत्कृतिरूपा वाणी बोध्या । तत्र कृतधियः हंसाः । अत्र युक्तम् योग्यम् । तेषामिति शेषः। प्रतीयतां भासताम् । यथा हंसानां नीरक्षीरादिविवेकपटुत्वं तथा कृतधियामपि प्रकृतग्रन्थनिरूपितनानारसविवेकपटुत्वमस्ति नान्येषामिति भावः । यद्वा वाणी सरस्वती । सैव कमलिनी । तस्याः भानोः सर्यस्य प्रकाशकस्येत्यर्थः । श्लिष्टरूपकम् । तत्सम्बधिनी कृतिरिति शेषः । एषा करिष्यमाणा रसतरङ्गिणी । कालिन्दीसदृशीति भावः । शेषं पूर्ववत् ॥३॥

गिरां देवि तरङ्गिण्यां पारय क्रूरवारणान् ।
यद् भविष्यति लोकानामाविलो विरसो रसः ॥ ४ ॥

गिरामिति । हे गिरां देवि । वाग्देवि । तरङ्गिण्यां प्रकृतग्रन्थरूपायां सरिति । क्रूरा रसज्ञानविधुरास्त एव वारणा हस्तिनस्तान्वारय । दूरीकुरु । यद्यस्मात् क्रूरप्रवेशादित्यर्थः । रसः शृङ्गारादिः जलं च । लोकानां रसज्ञानाम् । आविलः कलुषः विरसो गत[२]स्वादश्च भविष्यति । **लिङ् चोर्ध्वमौहूर्त्तिके** (पा०अ०३/३/९) इति लृट्प्रयोगः । अत्र निपातस्य यच्छब्दस्योत्तरवाक्यगतत्वा[३]त्तच्छब्दापेक्षा नास्ति । उक्तं च **काव्यप्रकाशे उत्तरवाक्यार्थगतो यच्छब्दस्तच्छब्दोपादानं नापेक्षते** (का०प्र०७ वृत्ति) ॥ ४ ॥

हेतोः पूर्ववर्त्तित्वनियमादतः पूर्वमेव तस्योपन्यासः समुचितः रसस्य हेतवो भावादयस्तेन रसात्पूर्वं भावादय एव निरूप्यन्ते । रसानुकूलो

---

१ धियः स्तत्र । २ गतं० । ३ क्र० ।

@ Vide:शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥(ना० शा०६/१५)

विकारो भावः । विकारोऽन्यथाभावः। विकारश्च द्विविधः। आन्तरः शारीरश्च । आन्तरो द्विविधः स्थायिभावो व्यभिचारिभावश्च ।

हेतोरिति । हेतोः कारणस्य । पूर्ववर्त्तित्वनियमात् कार्यापेक्षया[1] पूर्वकाल–वर्त्तित्वसिद्धान्तात् । तथा चोक्तम् तर्कशास्त्रे–**कार्यनियतपूर्ववर्त्तिकारण** (तर्कसङ्ग्रह–३८)मिति । अतस्तस्य कारणस्य पूर्वं प्रथममुपन्यासो निबन्धनम् । समुचितो योग्यः । **रसस्ये**ति । रसस्य शृङ्गारादेः हेतवः कारणानि भावादयो भवन्ति[2]। तेन हेतुना । तेभ्यो रसेभ्यः । पूर्वं प्रथमं भावादय एव निरूप्यन्ते । निपूर्व–चौरादिकस्य **रूपरूपक्रियाया**(धा०पा०१९३४)मिति धातोः । कर्मण्यात्मनेपदम् । **रसे**ति । रसस्य अनुकूलो विकारो भाव इत्युच्यते । विकारोऽन्य[3]थाभावः । प्रकारान्तरेण भवनमित्यर्थः । विकारप्रकारमाह–**द्विविध** इति । आन्तरो मानसः । शारीरश्च । आन्तर इत्यादिस्पष्टम् ।

शारीरस्तु सात्त्विकभावः । यत्तु मनोविकारो भावस्तथा च देहविकारे स्वेदादौ भावपदप्रयोगो गौण इति तन्न । तुल्यवदुभयत्रभावपदप्रयोगेण विनिगमयितुमशक्यत्वात् । लक्षणानुरोधेन लक्ष्याव्यवस्थितेः । इतर–भावस्यात्मभावत्वोपनायकत्वे सति सजातीयविजातीयभावानभिभाव्यः प्रथमः । परानभिभाव्यो मनोविकारो वा । सकलप्रधानो मनोविकारो वा इति स्थायिभावः । न चान्यभावेऽतिव्याप्तिः।तस्येतरभावस्यात्मभावत्वोप–नायकत्वाभावात् ।

यत्त्विति । कस्यचिन्मतमिति शेषः । तद्रूपयति । **तुल्यवदि**ति[4] । तुल्ये इवे[5]ति तुल्य–वत् । यथा हर्यादयः शब्दाः शक्रविष्ण्वादिषु स्वातन्त्र्येण प्रवर्त्तन्ते तथा भावशब्दो गौणमुख्यत्वमनपेक्ष्य मनोविकारे देहविकारे च प्रवर्त्तते । तद्विनिगमनविरहादिति भावः । तथा च कोशः– भावोलीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुष्वित्यमरः[+]। तत्र लीलादी[6]नां देहविकारत्वम् । अभिप्रायस्य च मनोविकारत्वमिति विवेकः । **लक्षणे**ति[7]। लक्षणानुसारेण लक्ष्यव्यवस्थायोगादित्यर्थः । स्थायिलक्षणमाह–**इतरे**ति । इतरभावस्य स्वव्यतिरिक्तभावस्य । स्वस्मिन्नन्तर्भावकत्वे सति सजातीयाः । आन्तराः विजातीयाः शारीरास्तैर्भावैरनभिभाव्यस्तिरोहितुमशक्यः । प्रथमः

---

१ ०यां । २ क्रियामिति । ३ ०त्य० । ४ तुल्यवति । ५ तुल्येयि० । ६ तां ७ लक्ष्मणेति ।

+ भावः सत्तास्वभावाभिप्राय–चेष्टात्म–जन्मसु इति पाठः अमरकोशे (३/३/२०७)

स्थायीत्यर्थः । पक्षान्तरमाह । स्पष्टम् । **सकलेति** । प्राधान्यं तु रसावसानपर्यन्तं विद्यमानत्वादिति ज्ञेयम् । स्पष्टम् ।

चरमसमयपर्यन्तस्थायित्वादस्य स्थायित्वव्यपदेशः । स चाष्टधा । तत्राह भरतः-

रतिर्हासश्च शोकश्च कोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाःप्रकीर्तिताः॥(ना.शा.६/१७)

तत्र इष्टवस्तुसमीहाजनिता मनोविकृतिरपरिपूर्णा रतिः । सा च क्वचिद्[1]दर्शनेन क्वचित् श्रवणेन। क्वचित्स्मरणेन।

चरमे[2]**ति**। तिष्ठति रसपर्यन्तमिति स्थायी। उक्तं च- यावद्रसं[3] वर्त्तमानः स स्थायी लवणाकर इति। स च स्थायी अष्टभिः प्रकारैर्वर्तत इत्यर्थः। **रति**रित्यादीनां लक्षणानि मूल एव स्पष्टानि ॥४॥

यथा-

चक्षुर्यस्य कृषीवलो निगदितं पीयूषपाथोधरो
भ्रूसंज्ञा परिचारिका समजनि स्फीतं स्मितं दोहदम्।
संतापं तरुणार्ककर्कशरुचिं निःश्वासवाताहतिं
कस्मादेष सहिष्यते स च सखि प्रेमद्रुमः कोमलः ॥५॥

कोमलपदादपूर्णता।

चक्षुरिति। हे सखि। स च पूर्वोक्तप्रकारविशिष्टः। पुनरिति पाठान्तरम्। एष मनसि संभावितः कोमलस्तु कालोत्पन्नत्वान्मृदुः। प्रेमद्रुमः स्नेहरूपो वृक्षः कर्त्ता। तरुणार्कवद्बालार्कवत्कर्कशा तीक्ष्णा रुचिः दीप्तिर्यस्य। सन्तापम्। पश्चात्तापरूपं सम्यक्तापं सूर्योत्पन्नं तेजः। अत्राध्यावसानेनारोपः। तथा निःश्वासस्य वातः एव वातो वायुस्तस्याहतिराघातस्तां कस्माद्धेतोः सहिष्यते। यस्य द्रुमस्य चक्षुर्नेत्रम्। कृषीवलः कर्षकः। **रज्ञः कृष्ये**(पा०अ०५/२/११)त्यादिना[5] वलच्प्रत्ययः। **वले**(पा०अ०६/३/११८)चेति दीर्घः। निगदितम् कथितम्। अत्रानुवादप्राधान्यान्नपुंसक-निर्देशः। पीयूषम् अधरामृतम् स एव पाथोधरो मेघः। पीयूषेऽधरामृतस्यारोपः पूर्व-वत्। यद्वा निगदितं वचनम्। **नपुंसके भावे**(पा०अ०३/३/११४)क्तः। तदेवामृतं मेघः। तथा भ्रूसंज्ञा भ्रुकुटीनर्तनक्रिया। परिचारिका रक्षणकर्त्री दासीत्यर्थः।

---

१ द्रु० २ चा०। ३ यादवदसं। ४ ०चि। ५ ०ता।

समजनि। इदं सर्वत्र योज्यम्। स्फीतं[1] प्रवृद्धम्। स्मितम् हास्यम्। दोहदम्। पुष्पादिजनकमौषधविशेषः। यस्येत्यस्य सर्वत्राऽन्वयः। अत्र कोमलपदादपूर्णा रतिः। यत्र पूर्णा रतिस्तत्र तु रस एवेति सिद्धान्तात्। अत्र तु न तथेति भावः। शार्दूलविक्रीडितं[2] वृत्तम्॥ ५॥

कुतूहलकृतवचनवेषवैसादृश्यकृतो मनोविकारोऽपरिपूर्णो हासः[3]। वचन-भेदवेषवैसादृश्येन कृते भये क्रोधे वा नातिव्याप्तिः। तत्र कुतूहलकृतत्वाभावात्। यथा तातचरणानाम्–

आगच्छन्नगरोपकण्ठमिलितैरावेष्टितो बालकैः
शुद्धान्ते[4] परिचारिकाभिरचिरं सोल्लासमालोकितः[*]।
साकूतं सकुतूहलं बलिवधूवृन्दे पुरो दापय-
त्यन्नं किञ्चिदुदञ्चितस्मितलवः[5] पायात्स वो वामनः॥६॥

लवपदादपूर्णता।

हासस्थायिलक्षणमाह– **कुतूहले**त्यादि स्पष्टम्। **आगच्छन्नि**ति। नगरोपकण्ठे मिलितैर्बालकैरावेष्टितो युक्तः सन्नागच्छन्[5]। तथा शुद्धान्तेऽन्तःपुरे। परिचारिका-भिर्दासीभिः। अचिरं सत्वरं[6] तथा सोल्लासं सहर्षं यथा तथा। एतद् द्वे क्रियाविशेषणे[8]। आवेदितो[*] निवेदितः। तथा साकूतं साभिप्रायम्। सकुतूहलं साश्चर्यं यथा तथा। बलिदैत्यस्त्रीसमूहे। बलतीति बलिः। **बल प्राणने**[9] (धातु०१६२९)इति धातोरौणादिके इप्रत्यये रूपम्। पुरोऽग्रेऽन्नम् दापयति सति। सेवकैरिति शेषः। अत्र **हेतुमति चे**(पा०अ०३/१/२६)ति णिच्। किञ्चिदीषदुदञ्चित[10] उत्पन्नः स्मितस्य लवो लेशो यस्य स एतादृशो वामनः। तद्रूपी विष्णुर्वो युष्माकं पायात् रक्षतु। शार्दूलविक्रीडितं वृत्तम्॥ ६॥ अत्र लवपदादपूर्णता।

इष्टविश्लेषजनितो रत्यनालिङ्गितो मनोविकारोऽपरिपूर्णः शोकः। न चेष्टविश्लेषजनितविप्रलम्भशृङ्गारस्य करुणरसत्वापत्तिः तस्यः रत्या-लिङ्गितत्वात्। न च रतिः प्रीतिस्तया विना शोकोऽपि नोत्पद्यत इति तथा चासम्भव इति वाच्यम्। इष्टसमीहाजनितमनोविकृत[11] रतेरुक्तत्वात्। कुमारसम्भवे रत्याः कादम्बर्यां महाश्वेताया रघुकाव्येऽजस्य प्रलापे करुण

---

१ ०त्यत्र। २ ०ळ। ३ ०क०। ४ ततस्मित०। ५ शुद्धान्तें। ६ ०र। ७ ०द्वय। ८०विशेषण। ९ शालन। १० उदचित। ११ विकृते०।

एव रसः।

लोकस्थापितमाह– **इष्ट** इति । इष्टवियोगादुत्पन्नो रत्या अनालिङ्गित अव्याप्तो[1]ऽपूर्णो मनोविकारः शोक इति । **न चेति** । इष्टवियोगजनितस्य विप्रलम्भशृङ्गारस्य करुणरसत्वापत्तिर्न भवति । कुतस्तस्य विप्रलम्भशृङ्गारस्य रत्यालिङ्गित[2]त्वात् । अत्र तु न तथेति फलितोऽर्थः । **न चेति** । रतिः प्रीतिस्तया विना शोकोऽपि नोत्पद्यत इति । एवं सति लक्षणस्यासम्भव इति वाच्यम् । इष्टवियोगजनिता या मनोविकृतिस्तस्या एव रतेः स्वीकारात् **कुमारसम्भवादिषु** ग्रन्थेषु रत्यादिप्रलापेषु करुण एव रसो न त्वन्यः ।

तत्र तत्र बाधनिश्चयादिष्टवस्तुसमीहाया अभावात् । यत्र मृते जीविताशा तत्र शृङ्गार एव रसः । बाधसन्देहस्य ग्राह्यसन्देहपर्यवसिततया समीहाया अप्रतिबन्धकत्वात् । तथा च यूनोरेकस्मिन् मृते प्रलापः करुणः एव रसः । जीवतोर्विश्लिष्टयोः प्रलापः शृङ्गार एव रसः । अत एव रसरत्नदीपिकायां कौमारसम्भवं करुण[3]रसोदाहरणम्–

अयि जीवितनाथ जीवसीत्यभिधानोत्थितयाऽनया पुनः ।
ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम् ॥७॥

(कुमार०४/३)

यत्र यत्र बाधस्य नाशस्य[4] निश्चयादृते हेतोरिष्टवस्तुसमीहा आशा अस्ति तत्र शृङ्गार एव रसो भवति । **बाधेति** । बाधस्य मृत्युरूपस्य सन्देहो निश्चयाभावस्तस्य ग्राह्यसन्देहभोग्यताया अभावात् । यत्र यस्मिन् मृते सति पुनर्जीवित[5]त्वसंशये पर्यवसानात्समीहाया रतेरनिवर्त्तकत्वात् । मृत्युनिश्चये रतिनिवर्त्तकत्वमस्ति न तु तत्सन्देहे इति भावः । **तथेति** । एवं सति यूनोः स्त्रीपुंसयोः **पुमान् स्त्रिया**– (पा०अ०१/२/६७)त्येकशेषः । एकस्मिन् मृते प्रलापः करुणः । प्रीतिपरिपोषित–शोकालम्बनत्वादिति भावः ॥६॥

जीवे[6]**ति** । जीवतोर्वियुक्तयोः प्रलापः शृङ्गारः । तत्र शोकस्य रत्यङ्गत्वादिति भावः । **अयीति** । **कुमारसम्भव**स्थोऽयं श्लोकः । अयीति सम्बोधने । केचिदिममपि शब्दं मन्यन्ते । हे जीवितनाथ । प्रिय । जीवसि । प्रश्नकाकुः । क्षितौ पृथिव्याम् ।

---

१ अव्याप्तोः । २ रसाआलि० । ३ करुणा० ४ ताशस्य । ५ जीविता० । ६ ०याः ।

पुरुषस्येवाकृतिर्यस्य तत्। पुरुषाकारमित्यर्थः। हरकोपानलसम्बन्धि भस्म केवलं[1] ददृशे दृष्टम्[2]। अत्र वैतालीयं छन्दः। तथा च सूत्रम्–**वैतालीयं द्विःस्वरा अयुक्पादे युग्वसवोऽन्ते र्ल्गः**[3]।(पिङ्गलछन्दःसूत्र–४/३२)व्याख्यातं चैतदाशाधरभट्टैः। तथा हि–

प्रथमे च तृतीये च यत्र मात्राश्चतुर्दश।
द्वितीये च चतुर्थे च पादे मात्रास्तु षोडश॥
पादान्तरे गणो यत्र लघुर्गुरुरपि क्रमात्।
तच्छन्दःशास्त्रतत्त्वज्ञा वैतालीयं प्रचक्षते॥ इति।

ननु विप्रलम्भशृङ्गारस्य पूर्वानुरागमानप्रवासकरुणात्मकत्वात् जीवतोरपि विप्रलम्भस्य करुणरसत्वमागतमिति चेत्। सत्यम्, करुणरसस्य तत्राङ्गत्वेन भासमानत्वात् करुणात्मकत्वव्यपदेशः। यथा–

विरहज्वरमूर्च्छया पतन्तीं नयनाम्बुप्रसरेण सिच्यमानाम्।
समवेक्ष्य रतिं विनिःश्वसन्तीं[4] करुणा कुड्मलिता बभूव शम्भोः॥८॥

करुणा कुड्मलितेत्यपूर्णता।

नन्विति। पूर्वपक्षे। पूर्वानुरागे माने प्रवासे च विप्रलम्भस्य करुणात्मकत्वात्। शोकमयत्वादित्यर्थः। जीवतोरपि[5] यूनोर्विप्रलम्भस्य करुणरसत्वमतिव्याप्तम्। शोकमयत्वेन तल्लक्षणप्रवृत्तेरिति भावः इति चेत् सत्यम्। अत्रोत्तरमाह–तत्र जीवतोः पूर्वानुरागादिभेदत्रये करुणस्याङ्गत्वेन शृङ्गारपोषकत्वेन भासमानत्वान्न करुणात्मताव्यपदेशः इति। करुणशब्देन व्यवहारो नास्तीत्यर्थः। प्रकृतशोकस्थाय्युदाहरणमाह–**विरहे**[6]**ति**। विरहः कामनाशजन्यो[7] वियोगः। स एव ज्वरस्तज्जन्या या मूर्च्छा तया पतन्तीम्। तथा नयनेन कर्त्रा। एकवचनं जात्यभिप्रायेण[8]। **स्तनादीनां द्वित्वाविष्टा जातिः प्रायेणे**(का०सू०५/१७)ति वामनोक्तौ[9] प्रायग्रहणादत्रैकत्वमविरुद्धम्। अश्रुजलेन करणेन। सिच्यमानाम्। तथा विनिःश्वसन्तीम्[10]। रतिम् कामभार्याम्। समवेक्ष्य दृष्ट्वा। शम्भोः शिवस्य। करुणा कुड्मलिता। सञ्जात-कुड्मला। न तु विकसिते[11]त्यर्थः। बभूव। अत्र कुड्मलितत्वस्य कुसुमधर्मस्य करुणायामुपचारः। यथा कुड्मलितम् कुसुममपूर्णम् भवति (तं) तथा करुणापीति। औपछन्दसिकम् वृत्तम्।

---

१ केवले। २ दृष्ट ३ रलगतिः ४ निश्व०। ५ जीवितोरपि। ६ ०जन्ये। ७ विनियोगः। ८ जान्य०। ९ वामनौक्तौ। १० विनिश्वंजीं। ११ विक्सिते०।

***अवज्ञाकृतः प्रमोदप्रतिकूलः परिमितोऽपरिपूर्णो मनोविकारः क्रोधः । प्रमोदप्रतिकूलविशेषणात् दशमुखदुर्वचनावमानितस्य रामस्य वीररसे नातिव्याप्तिः ।**

यथा परशुरामवाक्यम्–

नाद्यारभ्य करोमि कार्मुकलताविन्यस्तहस्ताम्बुजः
किञ्चित्पाटलभासि लोचनयुगे तावान्निमेषोदयात् ।
यावत्सायककोटिपाटितरिपुक्ष्मापालमौलिस्खलन्–
मल्लीमाल्यपतत्परागपटलैर्नामोदिनी मेदिनी ॥ ९ ॥

किञ्चित्पाटलत्वादपूर्णता ।

क्रोधस्थायिनमाह–**अवज्ञादी***ति । स्पष्टम् । **नाद्यारभ्ये**ति । कार्मुकलतायां विन्य–(स्तह)स्ताम्बुजं येन सः एतादृशोऽहमिति शेषः। अद्य दिनमारभ्य किञ्चिदीषत् पाटला भा दीप्तिर्यस्य तदेतादृशे लोचनयुगे विषये । तावत्कालं निमेषोदयान्न[२] करोमि । यावत्कालं सायककोट्या बाणाग्रेण पाटिता विदारिताश्च ते रिपुक्ष्मापालाः शत्रुभूतक्षोणीभृ[३]तस्तेषां मौलयस्तेभ्यः स्खलन्ती[४] या मल्ली । मल्लयः । कुसुमानि मल्ली पुष्पमूलेषु बकुलमित्यणो लुक् । लुपि युक्तवद्व्यक्तिवचने (पा०अ०१/२/५१)इति स्त्रीत्वमेकवचनम् च । **पुष्पे जातीयप्रभृत्यः स्वलिङ्गा व्रीहयः फल**(अमर०२/४/१९)इत्यमरः । तस्याः माला एव माल्यानि । चातुर्वर्ण्यादित्वात्स्वार्थेऽप्यञ् । मा[६]लामाल्यं सौमनस्यमित्यमर[+]ः। तेभ्यः पतन्ति च तानि पराग–पटलानि च तैः । करणैर्मेदिनी पृथ्वी । लक्षणयागन्तुकगन्धव[७]तीत्यर्थः । न जातेति शेषः । यावत्कालं मया तातापकारिणः शत्रवो न निहतास्ता[८]वन्निद्राभावान्नेत्रे निमिषो नास्तीति भावः। परशुरामवचनमिद[९]म् । अत्र किञ्चित्पदोपादानात्क्रोधस्या–पूर्णता । शार्दूलविक्रीडिते[१०]नाह ॥ ९॥

शौर्यदा[११]नदयान्यतमकृतो मनोविकारोऽपरिपूर्ण उत्साहः । वीरस्तु युद्धवीर–दानवीरदयावीरभेदात्त्रिधा । युद्धवीरस्योत्साहो यथा–

सेनां संघटयन् द्यु[१२]तिं द्विगुणयन् चापं चमत्कारयन्–
नेत्रस्याभिमुखो भविष्यति जगद्विद्रावणो रावणः[१३] ।

---

१ तावन्नि०। २ निनिमिषोदयान्न । ३ क्षणी०। ४ सबल्लंती ।५ जातीय०। ६ मामा०। ७ गन्धर्वती०। ८ निहस्ताव०। ९ ०रामंचनदोमिदं । १० ०विकिडितेवाह । ११ शौर्यादान०। १२ द्युति । १३ रावण ।

+ Not traced in अमरकोश

इत्युत्साहविचारमूढहृदयो देवो रघूणां पतिर्ज्या–
विन्यासविधिं विनैव विशिखान् बाणासने न्यस्यति ॥१०॥

अत्र विचारादपूर्णता।

उत्साहं[1] लक्षयति – **शौर्यमिति** । शौर्येण दानेन दयया वा कृतः परिमितोऽपूर्णो मनोविकार उत्साहः । **वीरेति** । वीररसत्रैविध्यात्तत्स्थायिन उत्साहस्यापि त्रैविध्यमिति भावः । क्रमेणोदाहरणानि । **युद्धेति** । आद्यो यथा । **सेनामिति** । जगतो विद्रावणो भीषकः। **विपूर्वो द्रुगताव्रि** (धा०पा०९४५)ति धातोर्ण्यन्तात् कर्त्तरि ल्यूट्[2]। रावणः । नेत्रस्य । ममेति शेषः । अभिमुखः सन्मुखो भविष्यति । भविष्यदर्थे लृट् इत्युक्तप्रकारेण उत्साहविचाराभ्यां मूढहृदयो जित्यचित्तः(?) इत्युल्लासविचार–मूढहृदयो इति पाठः साधीयान्[3]। अन्यथा स्वपदोपादाने दोषश्रवणात्। तथा हि– **काव्यप्रकाशे–व्यभिचारिरसस्थायिभावानां शब्दवाच्यता**(का०प्र०७/९०) इति । तथा सेनां[4] वाहिनीं संघटयन् । संनद्धां कुर्वन् । द्युतिं स्वकान्तिं द्विगुणयन् द्विगुणां कुर्वन् । तत्करोति तदाचष्टे इति लटः शत्रादेशः । चापं धनुश्चमत्कारयन् । चमत्कारयुक्तं कुर्वन् । **अथास्त्रियौ धनुश्चापावि**[5](अमर०२/८/८३)त्यमरः । रघूणां पतिर्देवो रामचन्द्रः । बाणासने कार्मुके ज्यायाः मौर्व्या विन्यासविधिरारोपण–विधिस्तम् विनैव विशिखान्[6] बाणान्[7] न्यस्यति । आरोपयति । अत्र विचारपदाद–पूर्णता। शार्दूलविक्रीडितेनाह ॥ १० ॥

दानवीरोत्साहो यथा–

आदर्शाय शशाङ्कमण्डलमिदं हर्म्याय हेमाचलं
दीपाय द्युमणिं महीमिव कथं नो भिक्षवे दत्तवान्।
दित्साफुल्लवितप्रमोदसलिलव्याकीर्णनेत्राम्बुजो
जानीमो भृगुनन्दनस्तदखिलं न प्रायशो दृष्टवान् ॥११॥

फुल्लवितं न तु फलितमित्यपूर्णता।

द्वितीयो यथा–**दानेत्यादि**। **आदर्शायेति**। भृगुनन्दनः। परशुरामः । भिक्षवे याचकाय। **चतुर्थी संप्रदान**(पा०अ०२/३/१३)इति चतुर्थी । महीमिव । पृथ्वीमिव । आदर्शाय दर्पणं कर्तुम्। **क्रियार्थोपपदे**(पा०अ०२/३/१४)त्यादिना चतुर्थी एवमप्यवगन्तव्यम्[8]।

---

१ उत्साह । २ ल्यु । ३ श्रवणोत् । ४ सेना । ५ ॰स्त्रियांधुनु० । ६ विशिखम् । ७ बाणा ।
८ एवमप्येव्यव० ।

इदम् शशाङ्कमण्डलं चन्द्रबिम्बम्। तथा हर्म्याय गृहं कर्तुम्[1]। हेमाचलं सुमेरुम्। दीपाय प्रदीपं कर्तुम्। द्युमणिं सूर्यम्। कथमिति वितर्के। नो दत्तवान् न ददाति स्म। अत्रोत्प्रेक्ष्यते। दातुमिच्छा दित्सा[2]। तया पल्लवितः पल्लवसदृशो जातः अङ्कुरित इत्यर्थः। प्रमोदो हर्षस्तज्ज[3]न्यं सलिलं यद्बाष्पजलं तेन व्याकीर्णं व्याप्त-नेत्राम्बुजम् यस्य एतादृशः सन्। तत्पूर्वोक्तं समग्रं वस्तु। प्रायशः बहुधा[4] दृष्टवान् इति प्रतीमः विचारयामः। वयमिति[5] शेषः। शार्दूलविक्रीडितम्॥ ११॥

पल्लवितो न तु फलित इति अपूर्णता।

दयावीरोत्साहो यथा–

दुस्तारसंसारपयोधिपारप्रकारमालोचयतो जनानाम्।
समुत्थितो वक्षसि कैटभारेः कृपाङ्कुरः कौस्तुभकैतवेन॥ १२॥

अङ्कुरोपन्यासादपूर्णता।

तृतीयो यथा– **दयेत्यादि** । **दुस्तारेति**[6]। जनानां दुःखेन तीर्यतेऽसौ दुस्तारः स चासौ संसारपयोधिश्च तस्य पारम् गन्तुम् प्रकारम् उपायम्। आलोचयतो विचारयतः। कैटभारेर्विष्णो[7]र्वक्षस्युरस्थले। कौस्तुभस्य मणेः कैतवेन मिषेण। कृपाङ्कुरः दयाङ्कुरः समुत्थितः उत्पन्नः। अत्र कैतवापह्नुत्यलङ्कारः। अत्राङ्कुरपदादपूर्णता। उपेन्द्रवज्रा-वृत्तम्॥ १२॥

अपराधविकृतसत्त्वादिजनितोऽपरिपूर्णो[8] मनोविकारो भयम्। यथा–

तार्क्ष्यपक्षपवनोपसेवितं वीक्ष्य वीक्ष्य यदुनन्दनं[9] पुरः।
भीतभीत इव तत्र कालियो मन्दमन्दमुपसर्तुमुद्यतः॥ १३॥

इवोपन्यासादपूर्णता। अहह्यदर्शनस्पर्शनस्मरणजनिता मनोविकृति-रपरिपूर्णा जुगुप्सा। यथा–

शार्दूलशावकचटच्चटपाट्यमान-
सारङ्गशृङ्गवति भूभृति रामचन्द्रः।
वासं चकार न बभार तथा जुगुप्सां
दुःखेषु दुःखमतिरेव न दुःखितानाम्॥१४॥

न तथेति पदादपूर्णता।

---

१ ०कर्तु ०। २ दिशा। ३ हर्षस्तन्यं। ४ बहुधान्। ५ वयेमिति। ६ दुस्तरेति। ७ कैठभारि०। ८ परिपूर्णे। ९ यदुनं ।

भयलक्षणमाह– **अपराधेति** । अपराधात् वा विकृतसत्त्वात्[१] । विकृतसत्त्वादिभ्यो व्याघ्रादिभ्यो वा जात उत्पन्नः । अपरिपूर्णो मनोविकारो भयम् । यथा **तार्क्ष्येति** । कालियः सर्पविशेषः । पुरोऽग्रे । तार्क्ष्यो गरुडस्तस्य पक्षयोः पवनेनोपसेवितं यदुनन्दनम् श्रीकृष्णम् । वीक्ष्य वीक्ष्य आभीक्ष्ण्ये द्विर्भावः । भीतेभ्यो भीतः । तादृश इव । अधिकं भीत इवेत्यर्थः । अत्र **प्रकारे गुणवचनस्ये**(पा०अ०८/१/१२)ति सूत्रेण न द्विर्भावः । इवशब्देन तदर्थावगतौ सादृश्यरूपप्रकारस्य पौनरुक्त्यापत्तेः[२] । अधिकार्थे द्वे वाच्य इति वार्त्तिकस्यापि नात्र प्रवृत्तिः समासेनैवाधिकार्थावगतेः । विस्तरस्तु **मनोरमायां** दृष्टव्यः । मन्दमन्दम् शनैः शनैः । **प्रकारे गुणवचनस्ये**(पा०अ०८/१/१२)ति द्विर्भावः । कर्मधारयवद्भावात्पूर्वपदस्य विभक्तेर्लुक् । पुनः प्रातिपदिकसंज्ञायां सुबुत्पत्तिश्च । उपसर्तुम् पलायितुम् । उद्युक्तः । अत्रेवपदादपूर्णता भयस्येति बोध्यम् । रथोद्धता वृत्तम् । **रान्नराविह रथोद्धता लगावि**(वृ०र०३/३८)ति लक्षणात् ॥१३॥ जुगुप्सां लक्षयति– **अहद्येत्यादिस्पष्टम्** । **शार्दूलेति** । रामचन्द्रः कर्त्ता । शार्दूलशावकैः व्याघ्रपोतैः । **पृथुकः शावकः शिशुरि** (अमर०२/६/३८)–त्यमरः। चटच्चटशब्दं यथा तथा पाट्यमानाश्च ते सारङ्गाः कृष्णसारमृगास्तेषाम् शृङ्गाणि तद्वति । चटचटेत्यत्र द्वित्वविधौ बहुलग्रहणात्तकारलोपः । यच्चाशक्तिजमसाधुशब्दरूपं तदनुकरणं तस्यापि साधुत्वमिष्यत इति भाष्योक्तेः साधुत्वं च । भूभृति शृङ्गवत्पर्वते । पूर्वोक्तविशेषणादन्वर्थतास्य ज्ञेया । <u>सारङ्गशब्दस्य शकंत्यमरः</u>[+] । तथा हि दुःखितानां सञ्जातदुःखानां दुःखेषु दुःखहेतुषु दुष्टवासादिषु । दुःखमतिरेव दुःखदायकत्वबुद्धिरेव न भवति । व्यग्रचित्तत्वादिति भावः । न तथेति पदोपादानादपूर्णता । अत्र[३] सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । वसन्ततिलकावृत्तम् ॥१४॥

चमत्कारदर्शनस्पर्शनस्मरणजनितो मनोविकारोऽपरिपूर्णो विस्मयो यथा–

युध्यन्तमर्जुनं वीक्ष्य के वा*[४] देवा न विस्मिताः ।
न[५] मेने बहु गोविन्दो दुष्टकर्णपराक्रमः ॥१५॥

न[५] मेने बहिवति पदादपूर्णता । शृङ्गारादौ चमत्कारदर्शनाद्यत्र मनोविकृति-रूपत्तया भासते तत्र शृङ्गारादय एव रसाः । [$]

---

१ ०रवात् । २ पौनरुक्त्या० । ३ १५ । ४ ने । ५ ने ।

+ Not traced out in अमरकोश $ The scribe has added the word श्रीराम here

विस्मयं लक्षयति – **चमत्कारेति** । चमत्कारस्याश्चर्यकरस्य वस्तुनः । अत्राकारो[1] मत्वर्थीयः । दर्शनस्पर्शनस्मरणैर्जनितोऽपूर्णो मनोविकारो विस्मयः । अत्र दर्शनादीनां यथासम्भवं संयोगः । पृथक्त्वं[2] चेति ज्ञेयम् । उदाहरणमाह–**युध्यन्तमिति** । युध्यन्तम् युद्धं कुर्वन्तम् । अत्रानुदात्तत्वलक्षणमात्मनेपदमनित्यम् । चक्षिङीऽङित्करणाज्ज्ञापकात्[3] । यद्वा युध्यमानार्जुनमिति पाठान्तरम् । अर्जुनं पार्थं वीक्ष्य दृष्ट्वा के के[*] देवा न विस्मिता अपि तु सर्वे विस्मिता इत्यर्थः । वीप्सायां द्विर्भावः । दृष्टः कर्णपराक्रमो येन सः गोविन्दः श्रीकृष्णः । न बहु मेने । नादृतवान् । पदार्थहेतुकाव्यलिङ्गमलङ्कारः ॥ १५ ॥ न मेने बहु इति पदोपादानादस्यापूर्णता । **शृङ्गारेति** । शृङ्गारादौ चमत्कारस्य दर्शनात् । यत्र मनोविकृतिरङ्गतया अप्रधानतया भासते तत्र शृङ्गारः।

प्राधान्येन यत्र भासते तत्राद्भुत एव रसः । अङ्गतया यथा–

वैषम्यं श्रुतिपङ्कजात्प्रकटयत्यानन्दनीरं[4] दृशोः
स्वर्णालङ्करणाद्व्यनक्ति पुलको वैधर्म्यमङ्गश्रियः ।
तस्या नूपुरपद्मरागमहसः पादारविन्दश्रियो
भेदं सिञ्जितमेव वक्ति किमितः[5] शिल्पं विधेर्वर्ण्यताम् ॥१६॥

यत्र प्राधान्येन तत्राद्भुत इति । अङ्गतयोदाहरणमाह– **वैषम्यमिति** । तस्या नायिकायाः । आनन्दजन्यं बाष्पोदकं कर्तृ । दृशो नेत्रयोः । कर्मणि षष्ठी । श्रुतिपङ्कजात् । कर्णावतंसनीरजसकाशात् । वैषम्यं भेदं प्रकटयति । तस्या इत्यस्याग्रेऽप्यन्वयः । तथा पुलको रोमाञ्चः कर्त्ता । अङ्गश्रियः शरीरशोभायाः । सुवर्णभूषणसकाशात् । वैधर्म्यं वैसादृश्यं व्यनक्ति प्रकाशयति । सिञ्जितं[6] नूपुर[7]ध्वनिः कर्त्तृ । पादारविन्दश्रियश्चरणाम्बुजशोभायाः । पूर्ववत्षष्ठी । नूपुरपद्मरागमहसः । मञ्जीरपद्मरागमणिकान्तेः । सकाशात् । भेदं वक्ति। लक्षणया धातूनाम[8]नेकार्थत्वाद्वा व्यनक्ति इत्यर्थः । इत अस्मादधिकं विधेर्ब्रह्मणः । शिल्पम् । किं वर्ण्यताम् । **शील्स समाधौ**(धा०पा०५२३)**शील उपधारणे**(धा०पा०१८७९)इति **धातोर्वा [रब शिल्पे]** त्यादिना प्रत्ययान्तो[9] निपातः । शिल्पते इति । शिल्पं क्रियाकौशलम्[10] । अत्र

---

१ अत्राकरो । २ पृथक्त्व । ३ इज्ञोपकत् । ४ पङ्कजान्प्रकटत्यात्पानन्द०। ५ किमतः ।
६ सञ्जितम् । ७ नूपुर० । ८ धातुनाना० । ९ प्रपत्यंयान्तो । १० ०कौशबलम् ।
[ ] There is a space herein the ms. and the text is unreadable.

चमत्कृतिरूपा मनोविकृतिः प्रकृतरसपोषकतया[1]ङ्गतया भासतेऽतः शृङ्गार एव रसः। अत्रानेकवाक्यार्थगतं काव्यलिङ्गमलङ्कारः। शार्दूलविक्रीडितम्–**सूर्याश्वैर्मसजस्तता**[2] **स गुरवः शार्दूलविक्रीडितमि**(वृ० र०३/१०१)ति लक्षणात् ॥ १६ ॥

प्राधान्येन यथा –

विना सायं कोऽयं समुदयति सौरभ्यसुभगः
किरन् ज्योस्नाधारामधिधरणि तारापरिवृढः।
धनुर्धत्ते स्मारं विकिरति*[3] विहारं न तमसां
निरातङ्कः पङ्केरुहयुगलमङ्के[4] नटयति ॥ १७ ॥

॥ इति भानुदत्तविरचितायां रसतरङ्गिण्यां स्थायिभावनिरूपणं नाम प्रथमस्तरङ्गः॥१॥

प्राधान्येनोदाहरणमाह–**विना सायमिति**। सुरभेर्भावः सौरभ्यं सुगन्धः। **गुणवचने**–(पा०अ०५/१/१२४)त्यादिना ष्यञ्। तेन सुभगः सुन्दरः। पद्मिनीमुखस्य सहजसुरभित्ववर्णनादिति भावः। ज्योत्स्नाधाराम् कान्तिपरंपराम् किरन्। **ज्योत्स्नातमिस्रे**(पा०अ०५/२/११४)त्यादिना मत्वर्थीयनकारप्रत्ययो निपातितः। प्रसारयन्। अधिधरणि पृथिव्यां विभक्त्यर्थेऽव्ययीभावः। ध्रियन्तेऽस्यां प्राणिन इति धरणिः। **धृङ् अवस्थाने** (धा०पा०१४१३) इति धातोरर्तिसृधृ (उणादि–२६७) इत्युणादिसूत्रेण अनि प्रत्यये रूपम्। कोऽयं तारापरिवृढश्चन्द्रः सायंकालं विना समुदयति। सदोदित एव तिष्ठति [च क्षिघ्रे(?)]। डोडित्करणेनानुदात्त[5]त्वे निमित्तस्यात्मनेपदस्यानित्यत्वज्ञापना**दयगता**(धा०पा०४७४)विति धातोः परस्मैपदम्। यद्वा इटकटेति धातुदण्डके प्रश्लिष्टस्य धात्वन्तररूपमेतत्। तथा[6] स्मारं कामसम्बन्धि धनुः भ्रुकुटीरूपं[7] चापं धत्ते। तथा तमसां केशपाशरूपाणां अंधकाराणां प्रसरणं न तिरयति[8]*। तिरः स्थगितं करोतीति तिरयति। **प्रातिपदिकार्थात्वर्थ**(पा०अ०२/३/४६) इत्यादिनाणाविष्टवद्भावात् टिलोपः। तथा निरातङ्कः(वि)निर्भयः सन्। आतङ्कोदररोगयोरिति शाश्वतः। अङ्के स्वोत्सङ्गे। अङ्कः समीप उत्सङ्गे चिह्ने स्थानापराधयोरिति वैजयन्ती। पङ्केरुहयुगलं नेत्रद्वयरूपमब्जयुग्मम्। नटयति नर्त्तयति। अत्र **कोऽयं सायं विने**त्युक्त्या प्रसिद्धचन्द्रादभेदस्तदुत्कर्षश्चाविष्कृतः। तत्[9]स्तादूप्यरूपक[10]मतिशयोक्तिः इयम्। अत्र चमत्कृतिरुपाया

---

१ पौषक० । २ ०स्तजा । ३ विकिरिति । ४ युगलंमंके । ५ दात्तेत्वे । ६ तया । ७ भ्रकुटीरूपं । ८ रयति । ९ तत्त० । १० रूपंकांति०। [ ] The ms. text is unreadable.

मनोविकृतेः प्राधान्याददद्भुतो रसः। शिखरिणीति वृत्तम्। **रसैरुद्रैश्छिन्ना[1] यमन-सभलागः शिखरिणीति**(वृ०र०३/९३) लक्षणात्॥ १७॥

इति श्रीमहोपाध्यायावटुश्रीनन्दरामभट्टात्मजभगवद्भट्टविरचितायां रसतरङ्गिण्याख्यायां नूतनतरीसमाख्यायां[$] स्थायिभावनिरूपणे प्रथमस्तरङ्गः॥१॥

---

१ रुद्रौस्छिन्ना। २ ०भलाभः।

$ The scribe has added the word कृष्णार्पणम्॥ छ॥ here

॥ द्वितीयस्तरङ्गः ॥

अथ विभावा निरूप्यन्ते । विशेषेण भावयन्ति उत्पादयन्ति रसान् ते विभावाः । स च द्विविधः । आलम्बनविभाव उद्दीपनविभावश्चेति । यमालम्ब्य रस उत्पद्यते स आलम्बनविभावः । यो रसमुद्दीपयति स उद्दीपनविभावः । तत्रालम्बनविभावो यथा–

प्राणस्य प्रतिमूर्तिः प्रत्यात्मा पुण्यलतिकायाः ।
अधिदैवतं नयनयोर्या मम कापि सा सैव ॥ १ ॥ [$]

अथेति । स्थायिभावनिरुपणानन्तरमित्यर्थः[१] । **मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथे**(अमर०३/३/२४७)त्यमरः[२] । **विशेषेणेति** स्पष्टम् । ते चेति । ते विभावा आलम्बनरूपा उद्दीपनरूपाश्चेति द्विविधा भवन्ति । इदमत्राकूतं सर्वत्र कार्यकारणशब्देन व्यवहारादत्रापि तत्सिद्धौ विभावानुभावेति संज्ञान्तरकरणं[३] रसस्यालौकिकत्वप्रतिपादनार्थम् । विस्तरेणेदं स्फुटीकृतं **काव्यप्रकाशे रसविलासे** चेति । **यथेति** । आलम्बनविभावं लक्षयति । यथा **प्राणस्येति**[४] सा पूर्वानुभूता । या कापि अलौकिकी मम प्राणस्य प्रतिमूर्तिः प्रत्याकृतिः रूपान्तरमिति यावत् । तथा पुण्यरूपलतायाः प्रत्यात्मा । प्रतिनिधिभूतः । पूयतेऽनेनेति[५] पुण्यम् । **पूञ् पवने** (धा०पा०१४८३) इति धातोः । **पूञो यण् णुक् ह्रस्वश्चे**(उणादि–२६७)त्युणादिसूत्रेण यणादौ रूपम् । नयनयोर्नेत्रयोरधिदैवतम् । अधिष्ठात्रीदेवतारूपा चास्ति । असौ कीदृशीत्याकाङ्क्षायामाह[६]–सा नायिका सैव । अनिर्वचनीया वक्तुमशक्येति यावत् । अर्थान्तरसंक्रमितवाच्योऽयं ध्वनिः । **सिद्धस्य विधानाद्विध्यलङ्कारश्चे**–(कुव०–२६६)त्यलं विस्तरेण । अत्र नायकाश्रयस्य रसस्यालम्बनं नायिका तेन तद्रूपो विभावः। आर्यावृत्तम् ॥ १ ॥

शृङ्गारस्योद्दीपनविभावस्तत्र भरतः–

ऋतुमाल्यालङ्कारैः प्रियजनगान्धर्वकाव्यसेवाभिः ।
उपवनगमनविहारैः शृङ्गाररसः समुद्भवति ॥ (ना०शा०६/४७)

चन्द्रचन्दनादय ऊहनीयाः[७] **। यथा–**

---

१ स्थायिभावा० ।२ ०कात्स्र्नेष्वथोत्यथेत्यमरः। ३ संज्ञान्तकरणं । ४ प्राणेस्येति । ५ पूयतेऽनेजेति । ६ कादृशी०। ७ वुहनीयाः । $ The scribe has added the word श्रीराम here

सन्ध्याशोणाम्बरजवनिका कामिनोः प्रेमनाट्यं
नान्दिभ्राम्यद्भ्रमरविरुतं मारिषः कोऽपि कालः ।
तारा पुष्पाञ्जलिमिव किरन् सूचयन् पुष्पकेतो–
र्नृत्यारम्भं प्रविशति सुधादीधितिः सूत्रधारः ॥ २ ॥

शृङ्गारस्येति । तत्र भरतः नाट्याचार्यः । आह[1] स्मेति शेषः । **ऋत्विति** । ऋतुमाल्या–लङ्कारैः वसन्तादिपुष्पाभरणैः । करणे तृतीया[2] । तथा प्रियजनस्य इष्टजनस्य । गान्धर्वस्य । गान्धर्वकर्मणो नृत्यादेः । काव्यस्य कवेः कर्मणश्च सेवाभिः । अत्र सेवापदस्य द्वन्द्वान्ते श्रूयमाणत्वात् प्रत्येकमन्वयः । अत्र कविशिष्टस्य ब्राह्मणादिषु पाठसामर्थ्यादिगताच्च लघुपूर्वादिति विशेषमप्यणंबाधित्वात्कर्मणि घञ् । यद्यपि कुधातुरोरावश्यक इति ण्यति रूपसिद्धिस्तथापि कृद्वृत्तेस्तद्धितवृत्तिर्बलीयसीति परिभाषानुरोधात् **काव्यं लोकोत्तरवर्णनानिपुणकविकर्मे**[3](का०प्र०१/२)ति **काव्यप्रकाशे** दृष्टत्वाच्चेत्थं व्याख्यातमिति दिक् । तथा उपवनगमनविहारैः । वाटिकाभियानक्रीडाभिः । एतैः शृङ्गाररसः समुद्भवति । उद्दीप्यत इत्यर्थः । श्रियते विद्वद्भिरिति शृङ्गारः । **शृङ्गारभृङ्गाराविं**(उणादि–४२३)त्युणादिसूत्रेण आरन् प्रत्यये श्रिधातोः शृ आदेशः । गुणाभावो नुक्गुकौ चेति निपातनात्साधुः । अन्येऽपि प्रकारा दशपाद्यां द्रष्टव्याः । **चन्द्रेति** स्पष्टम् । **यथेति** । उद्दीपनविभावं लक्षयति । **सन्ध्येति** । सम्यक् ध्यायन्त्यस्यां विप्रा इति सन्ध्या । यद्वा संधानसन्ध्या । **अघ्न्यादयश्चे**(उणादि–५३१)त्युणादिसूत्रेण निपातनात्साधुः । सैव शोणाम्बर[4]–जवनिका । रक्तवस्त्ररूपा तिरस्करिणी । **प्रतिसीरा जवनिका स्यात्तिरस्करिणी च से**(अमर०२/६/१२०)त्यमरः। कामिनोः स्त्रीपुंसयोः पुमान् स्त्रियेत्येकशेषः। प्रेमस्नेहः। **प्रेमा ना प्रियता हार्द प्रेम**[5] **स्नेह** (अमर०१/७/२७)इत्यमरः । नाट्यं नटकर्म ब्राह्मणादित्वात्कर्मणि घञ् । भ्राम्यद्भ्रमरविरुतं[6] भ्रमद्भ्रमरगुञ्जितम् । नान्दी । नाटकारम्भे मङ्गलाचरणं नान्दीत्युच्यते । कोऽपि कालो वसन्तादिः । स एव मारिषः । आर्यः । **आर्यस्तु मारिष** (अमर०१/७/१४)इत्यमरः । तारा एव पुष्पाञ्जलिस्तं किरन् । **संहतावञ्जलिः पुमानि**(अमर०२/६/८५)त्यमरः । किञ्च–

दुन्दुभिर्यमतिवृष्णिपाण्यविज्ञातिरालिकलयोऽञ्जलि[7]र्धृणिः।
अग्निवह्निक्रमयोऽङ्घ्रिदीदिविग्रन्थिकुक्षिदृतयोद्वनिध्वनि । रित्येषां

---

१ अहे । २ तृतीयाः। ३ ०कर्मे०। ४ शोणाम्बुर०। ५ हार्दं प्ररमं०। ६ ०विरुतां ७ ०कलयोःजलि० ।

सर्वेषां पुंलिङ्गत्वम् बोध्यम्। एतादृशः सुधादीधितिः। स एव सूत्रधारः नाट्याचार्यः। कर्त्ता। पुष्पकेतोः कामस्य। नृत्यारम्भम्। प्रसरणरूपं सूचयन्निव। सूचायिमिवेत्यर्थः। इवशब्दो भिन्नक्रमः। अत्र धनमर्जन् वसतीतिवत् हेत्वर्थे लटः। फलमपि हेतुरिति वैयाकरणाः। प्रविशति। इह सावयवरूपकं[1] फलोत्प्रेक्षा चेति संक्षेपः। **मन्दाक्रान्ताजलधिषडगैर्मभौ नतौ तादृगुरु चेदि**(वृ०र०३/९७)ति लक्षणात्॥ २॥

अथ हास्यविभावास्तत्र भरतः–

विपरीतालङ्कारैर्विकृताचाराभिधानवेषैश्च।
विकृतैरर्थविशेषैर्हसतीति रसः स्मृतो हास्यः[2]॥४॥(ना०शा०६/४९)

अङ्गवैकृत्यादय ऊहनीयाः।

केयूरं[3] घर्घरयन् भ्रमयन् मौलिं विवर्त्तयन् बाहुम्।
नेत्राञ्चलं चपलयन्नटयति मायाशिशुच्छायाम्॥ ३॥

अथेति। शृङ्गारविभावनिरूपणानन्तरमित्यर्थः। **विपरीतेति**। विपरीतालङ्कारैः। वैपरीत्येन धृतैराभूषणैः। करणे तृतीया। तथा विकृतैः। आचाराभिधानवेशैः। च परे। विकृतैः अर्थ[4]विशेषैर्वस्तुविशेषैः। हसतीति हसोर्हास्यो रसः स्मृतः। तत्र हास्ये भवो रसो हास्यः। अत्रैवं निर्वचनम्। हसनं[5] हासस्तत्र भवो हास्य इति। यद्वा हासोऽस्त्यस्मिन्निति हास्यः। अन्येभ्योऽपि दृश्यते इति मत्वर्थीयो यप्। अथवा हास्यं हसितमस्मिन्नस्ति इति हास्यः। अकारो मत्वर्थीय इति। त्रिधापि तद्धितान्तोऽयम्। विशेषस्त्वाशाधरभट्टकृते **रसिकानन्दे** बोध्यः। आर्या छन्दः॥४॥ **अङ्गेत्यादि** स्पष्टम्। यथेति। हास्यविभावोदाहरणमेतत्। **केयूरमिति**। केयूरमङ्गदम्। **केयूरमङ्गदं तुल्य** (अमर०२/६/१०७)इत्यमरः। घर्घरयन्। घर्घरशब्दयुक्तं कुर्वन्। तत्करोतीति ण्यन्ताल्लटः शत्रादेशः। मौलिम् किरीटम्। **चूडा किरीटं केशाश्च संयता मौल्यस्त्रय**(अमर०३/३/१९३)इत्यमरः। **भ्रमयन्**। घटादिष्वमन्तग्रहणान्मितां ह्रस्व(पा०अ०६/४/९२)इति ह्रस्वत्वम्। **बाहुं** हस्तम्। विवर्त्तयन्। चालयन्। तथा नेत्राञ्चलम्। अञ्चतीत्यञ्चलः। कम्बलादयश्चेत्युणादिसूत्रेण कलप्रत्यये निपातितः। चोपयतीति चपलः चञ्चलः। तं कुर्वन्। **चुपेरुचोपधाया**[6](उणादि ११६) इत्युणादिसूत्रेण निपातनात् साधुः। एतादृशोऽयम्। मायया शिशु बलिः। श्यति

---

१ सावयरूपकम्। २ हासः। ३ केयूयं। ४ अथविशेषै०। ५ हसतं। ६ रञ्चोपधाया।

मातरं स्तन्यपानं कृत्वेति शिशुः । **शो तनुकरणे** (धा०पा० ११४५)इति धातोः । **शः कित्सन्वच्चे**[1] (उणादि २०)त्युणादिसूत्रेण नुप्रत्यये रूपम् । श्रीकृष्णः नटयति । नाट्यं[2] करोति । **नट अवस्पन्दने**(धा०पा०१७९२)अवस्पन्दनं नाट्यम् । संगृहीत-कर्मकत्वादकर्मकत्वम् । मायाशिशुश्छायामित्यपि पाठः । हास्यस्यैते विभावाः । आर्या छन्दः ॥ ५ ॥

करुणरसस्य[3] विभावास्तत्राह भरतः-

इष्टजनस्य विनाशात्क्लेशाच्च बन्धनव्यसनात् ।
एतैरर्थविशेषैः करुणाख्यरसः समुद्भवति[+] **॥**

बन्धुदारिद्र्यादय ऊह्नीयाः । [यथा]-

त्वां पश्यतो भुजगपाशनिबद्धदेहमद्यापि मे यदसवो न बहिः प्रयान्ति ।
नेत्रे निमील्यसि पश्यसि नैव तावदास्यं मदीयमिति लक्ष्मण युक्तमेव ॥४॥

करुणे[4]त्यादि स्पष्टम् । **इष्टे**ति । क्लेशादुपतापात् । **क्लिश उपतापे** (धा०पा०११६१)इति । धातोर्भावे घञ् । व्यसनात् दुःखात् । करुणा[5]स्ति अस्मिन्निति करुणः मत्वर्थीयो प्रत्यय[6]ः । शेषं स्पष्टम् । ॥ ६ ॥ **बन्धि्वति** । व्यक्तम् । **यथेति** । करुणस्य विभावं दर्शयति । **त्वामिति** । युद्धपाशबद्धमूर्च्छितं लक्ष्मणं प्रति रामस्येयमुक्तिः । हे लक्ष्मण ! यद्यपि सम्बोधनेषु हेशब्दादिप्रयोगविधायकवचनं नास्ति तथापि हैहेप्रयोगे हैहेयोरितिज्ञापकात्[7] तत्प्रयोगो युज्यते । भुजगपाशनिबद्धदेहं त्वां पश्यति । मे मम[8] असवः प्राणाः । **पुंसि भूम्न्यसवः**[9] **प्राणा** (अमर०२/८/११९) इत्यमरः । बहिर्न प्रयान्ति । न निर्गच्छन्ति यत् । तत इति शेषः । त्वं नेत्रे निमीलयसि । मदीयम्[10] । आस्यं तावत्[11] । मन्मुखं तु न पश्यसि । इत्येतद्युक्तमेव । सुहृदो हि कृतापराधस्य स्वजनस्य मुखं न पश्यन्तीति प्रसिद्धि[12]ः । अत्र रामनिष्ठायाः करुणाया लक्ष्मण आलम्बनम् । तत्कथाश्रोतृणां तु रामदैन्योक्तिरिति विवेकः । वसन्ततिलकावृत्तम् ॥ ४ ॥

रौद्रविभावास्तत्र भरतः-

आयुधखड्गाभिभवात्तथैवाकृतभेदाद्विदारणाच्चैव ।
संग्रामसम्भवादर्थादेभ्यः सञ्जायते रौद्रः ॥ (ना०शा०६/६४)

---

१ शःकित्सत्वे० । २ नाट्ये । ३ करुणा०। ४ करणे०। ५ करणास्ति । ६अत्ययः।
७ ज्ञापकातत्प्रयोगो । ८ म०। ९ भून्यासवः । १० नदीयम् । ११ आस्यंतात्तावत् ।
१२ नश्यन्तीति । + Not traced out in Bharata

वैरीदर्शननिर्भर्त्सनादय[1] **ऊहनीयाः यथा-**

तन्वन्ती तिमिरद्युतिं कृतवतीप्रत्यर्थिचक्रव्यथा-

मेषा भार्गव तावकी विजयते निस्त्रिंशधारा निशा।

युद्धक्रुद्धविपक्षपक्षविदलत्कुम्भीन्द्र[2] **कुम्भस्थल-**

भ्रश्यन् मौक्तिककैतवेन परितस्तारावलीं वर्षति ॥ ५ ॥

रौद्रविभावानाह । **तत्रेति** । **आयुधेति** । आयुधखड्गाभ्यामभिभवात्[3] पराभवात् । खण्डयतीति खड्गः[4]। **खडि भेदने** ।(धा०पा०१५८२)**प्रूञ् खडिभ्यो गक्** इत्युणादि-सूत्रेण साधुः । खड्गस्य प्राधान्यात् पृथग्ग्रहणम्[5]। तथा वैकृतभेदात् । क्रोधजनक-चेष्टाविशेषात् । तथा विदारणात् अर्थाद्वस्त्रादीनामित्यर्थः। तथा संग्रामसंभवात् । अर्थात् सैन्यक्षयादिरूपात् । एभ्यो विभावेभ्यो रौद्रो रसः सञ्जायते । समस्तेभ्यो व्यस्तेभ्यश्चेति ज्ञापनार्थमेभ्य इति पृथग्ग्रहणम् । रुद्रो देवता यस्येति रौद्रः सास्य देवतेत्यण् । यद्वा रुद्रस्यायम् रौद्रः । तस्येदमित्यण् । आर्या छन्दः ॥८॥ **वैरीति** स्पष्टम् । तथेति । रौद्रस्य विभावानुदाहरति-**तन्वन्तीति** । हे भार्गव । हे राम । तावकी त्वदीया । **तस्येदमि**(पा०अ०४/३/१२०)त्यणि **तवकममकावेकवचन** (पा०अ०४/३/३)इति तवकादेशः। [------]णेत्यादिनाङीष् एषा निस्त्रिंशधारा निशा। खड्गधारारूपा रात्रिः। निस्त्रिंशौखड्गनिर्दयौ इति वैजयन्ती। तिमिरं नेत्ररोगस्तदेव तिमिरमन्धकार इति श्लिष्ट[6]रूपकम्। तेमति तेमयति वा इति तिमिरम्। तिमज्जदन इति धातो**रिषिमदी**(स०कं०२/३/४६)त्यादि उणादिसूत्रेण किरच्प्रत्यये रूपम्। तदेव द्युतिं कृष्णच्छविमिति यावत् । तन्वन्ती । तथा प्रत्यर्थिचक्र[7]व्यथा शत्रुवृन्दपीडा । सैव प्रत्यर्थिचक्रव्यथा । प्रति अन्योन्यं लक्षीकृत्य अर्थिनो-ऽभिलाषिणश्चक्रवाकास्तेषां पीडेति पूर्ववद्रुपक[8]म्। चक्रो गणे चक्रवाके चक्रं सैन्य-रथाङ्गयोः। ग्रामजाले कुलालस्य भाण्डे राष्ट्रस्त्रयोरपीति विश्वः। **प्रत्यर्थिपरिपन्थिन** (अमर०२/८/११)इत्यमरः। कृतवती। विजयते। **विपराभ्याम् जे** (पा०अ०१/३/१९)-रित्यात्मनेपदम् । किञ्च **युद्धे क्रुद्धायेति**[9] । ये विपक्षपक्षाः शत्रुबलानि । पक्षाः पार्श्वगरुत्माध्यसहायबलभितिष्विति विश्वः । तेषु विदलन्ति च तानि कुम्भीन्द्रकुम्भस्थलानि करिकुम्भस्थलानि तेभ्यो भ्रश्यन्ति[10] च तानि मौक्तिकानि च।

१ ०निर्भार्सनादय । २ विदलकुम्भीन्द० । ३ खड्गाभ्यामिति भवान् । ४ खड्भिः। ५ पृथग्रहणम् । ६ ०त्वि०। ७ प्रत्ययी० । ८ पूर्वद्रुपकं । ९ कुधायेति । १० श्रश्यन्ति । [ ] Space- no text.

तेषां कैतवेन व्याजेन । तारावलीम्[1] नक्षत्रश्रेणीम् । **नक्षत्रमृक्षं भं तारा** (अमर०१/३/२१)इत्यमरः । **वीथ्यालिरावलिः श्रेणी**[2] (अमर०२/४/४)रित्यमरः। वर्षति विकिरति । अत्र शत्रुनिष्ठक्रोधस्य रामखड्गावलोकनमालम्बनविभावः । कैतवापह्नुतिरलङ्कारः[3] । शार्दूलविक्रीडितम्[4] ॥ ५ ॥

वीररसस्य विभावास्तत्र भरतः[5]-

उत्साहाध्यवसायादविषादित्वाविस्मयान्मोहात् ।
विविधादर्थविशेषाद्वीररसो नाम संभवति ॥ (ना०शा०६/६७)

विजयबलादय ऊहनीयाः । [यथा]-

लङ्काधिपः*संयति शङ्कनीयो जम्भारिदम्भोपहबाहुवीर्यः ।
इत्यालपन्तं हनुमन्तमेष रामः स्मितैरुत्तरयाञ्चकार ॥ ६ ॥

वीरेत्यादि स्पष्टम् । **उत्साहेति** । उत्साहस्य अध्यवसानादाहार्यनिश्चयात् । तथा अविषादित्वात् अखेदित्वात् । अविस्मयात् । **विस्मयोऽद्भुतमाश्चर्यमि** (अमर०१/७/१९)त्यमरः । मोहात् । सारासारादिज्ञानवैचित्त्यात् । तथा विविधात् । बलौदार्यादिप्रकारात्[6] [ ]। वीरो नाम रसः सम्भवति[7] । वीरयन्ति विक्रामन्तीति वीराः । शूरवीरविक्रान्ताविति[8] धातोः पचाद्यचि रूपम् । आश्रयीभूतास्ते सन्त्यस्येति वीरः । **अर्श आदिभ्योऽच**(पा०अ०५/२/१२७)त्यकारो मत्वर्थीयः । **शूरो वीरश्च विक्रान्त** (अमर०१/८/७७)इत्यमरः। ॥१०॥ **यथेति** । वीरविभावोदाहरणमाह-**लङ्काधिपतिरिति*** । एष रामः रघुनाथः कर्त्ता[9] । संयति संग्रामे । जम्भनाम्नो दैत्यस्यारिः शत्रुः इन्द्र इति । यावत् **जम्भभेदी**[10] **हरिहयः स्वाराण्नमुचिसूदन** (अमर०१/१/४३)इत्यमरः। दम्भोपहे[11] लक्षणया दर्पहारं बाहुवीर्यं यस्य स एतादृशो लङ्काधिपो रावणः । शङ्कनीयः न तूपेक्षणीयः[12] इत्यनेन प्रकारेणालपन्तं[13] हनुमन्तम् आञ्जनेयम् प्रति । गम्यमानप्रति-शब्दयोगे द्वितीया । स्मितैर्हसितैः । उत्तरयाञ्चकार उत्तरमाचचक्षे । **तत्करोति तदा-चष्टे**(वार्त्तिक४२६)इति ण्यन्तालिटि रूपम् । अत्र रामकृतं[14] स्मितं विभावः इन्द्र-वज्रावृत्तम् । **स्यादिन्द्रवज्रा यदि तौ जगौ ग**(वृ० र० ३/२८)इति लक्षणात् ॥६ ॥

दानवीरस्य विभावो यथा-

---

१ तारावली । २ वीथ्यां० । ३ कौतवा० । ४ शार्ङ्गः। ५ विभावस्तत्र । ६ बलौदार्यादिशकारात् । [Some letters missing in the text.]७संभवंति ।८ विकृताविति ।९ कार्त्ता । १० जम्भेभेदी० । ११ दम्भापहे । १२ तूयेक्षणीयः । १३ प्रकारेणलंपतं । १४ रामंकृतं ।

वपुषा विनयं वहन्ति केचिद्वचसा केऽपि चरन्ति चारुचर्याम्।
अतिथौ समुपागते सपर्यां पुलकैः पल्लवयन्ति केऽपि सन्तः ॥ ७॥

यथेति । दानवीरविभावोदाहरणमाह– **वपुषेति** । केचित्सन्तः वपुषा शरीरेण विनयमार्जवं वहन्ति दधति। अत्र धारणार्थत्वाद्बहतेर्न द्विकर्मकत्वम्। शिरो वहति पुष्पाणीत्यादिवत् । केऽपि सन्तः वचसा वचनेन चारुचर्यां साधुचर्याम् । **गदमदे**(पा०अ०३/१/१००)त्यादिना यत् चरन्ति कुर्वन्ति । तथा केऽपि सन्तः । अतिथिः नास्ति तिथिर्यस्य स तथोक्तः । **अध्वनीनोऽतिथिर्ज्ञेय**(या०स्मृ०१/१११)इति याज्ञवल्क्योक्तेः । यद्वा अतति सातत्यगमनं करोति इति अतिथिः । अतेरिथिन् इत्युणादिसूत्रेण इथिन्प्रत्ययः । तस्मिन्समुपागते सति । पुलकैः रोमाञ्चैः । सपर्यां पूजां पल्लवयन्ति । पल्लवो विस्तारस्तद्वतीं कुर्वन्ति । णाविष्टवद्भावान्मतुपो लुक् । औपच्छन्दसिकं वृत्तम् । **पर्यन्ते यौ तथैव शेषमौपच्छन्दसिकं सुधीभिरुक्त**(वृ०र०२/१३)मिति लक्षणात् ॥ ७॥

दयावीरस्य विभावो यथा–

कथमविरलजाग्रद्भक्तिभाजो निशायां
तमसि दुरवगाहे प्राणिनो वीक्षणीयाः।
इति खलु समुदञ्चद्दीपलेखाभिराम–
द्युतिमुरसि मुरारिः कौस्तुभं सम्बभार ॥ ८ ॥

यथेति । दयावीरविभावं लक्षयति । **कथमिति** । निशायां रात्रौ । दुरवगाहे दुःखप्रवेशे तमसि अन्धकारे । ताम्यतीति तमः। **अत्यविचमीतितमि**(उणादि-४०४)त्याद्युणादि–सूत्रेण अस् प्रत्यये रूपम् । अविरलं निरन्तरं भक्तिभाजस्सेवाकारिणः । अर्थान्ममेत्यर्थः । ईदृशाः प्राणिनो भक्ताः कथं वीक्षणीयाः । वीक्षितुं योग्या इति हेतोः। मुरारिः । विष्णुः । उरसि वक्षस्थले । सम्यगुदञ्चन्त्यो या दीपलेखाः दीपराजयः। **लेखास्तु राजय** (अमर०२/४/४)इत्यमरः । तद्वदभिरामा मनोहरा द्युतिः कान्तिर्यस्य तम् । कौस्तुभम् मणिं सम्बभार धारयामास किमु*। अत्र कौस्तुभधारणं भक्तजनवीक्षणार्थमिति अवलोकफलोत्प्रेक्षणादसिद्धास्पदा फलोत्प्रेक्षा । अत्र कौस्तुभधारणं विभावः। मालिनीवृत्तम् ॥८ ॥

---

१ दानवीरविविभावो०। २ तिथेयस्य । ३ कुर्वन्तीं । ४ भावो । ५ संबभारः । ६ दुःखप्रवेशो । ७ वीक्षिकं । ८ माणि । ९ किमुः। १० अवलेकलोत्प्रेक्ष०। ११ मलिनी० ।

ननु स्वनिष्ठ उत्साहः कथमुद्दीपनविभावो भवेदिति चेत्सत्यम्। उद्दीपन-विभावो ज्ञातमात्र एव गमकः। स च स्वनिष्ठः परनिष्ठो वेति न कश्चिद्विशेषः। अनुभावस्तु स्वनिष्ठ एव [गमकः]। तस्यानुमापकत्वेन पक्षवृत्तित्वनियमादिति। ननु दयावीर एव कथं न करुणरस एवान्तर्भवति। निरुपाधिपरदुःखप्रहरणेच्छा दया[1]। सा च करुणां विना न सम्भवतीति चेन्न। करुण[2]रसस्य स्थायिभावः शोकः। वीरस्य स्थायिभाव उत्साह[3] इति स्थायि-भावभेदेन भेदात्। ननु दयावीरे करुणरसप्रतीतेः का गतिरिति चेत्सत्यम्। करुणया विना दयावीरस्याऽननुभवादिति। तत्र करुणाया अनुभावकत्वादिति।

अत्र भरतकारिकायां वर्णनीय[4]नायकनिष्ठानामुत्साहादीनामुद्दीपनविभावत्वं विवक्षितम्[5] आलम्बनविभावत्वं नायकप्रतिनायकयोरिति तत्रानुपपत्तिमाशङ्क्य समाधत्ते। **नन्विति** । यथा शृङ्गारे नायिकासौन्दर्यादीनां नायकनिष्ठरसोद्दीपकत्वं नायकगुणादीनां च नायिकानिष्ठरसोद्दीपकत्वं तथात्रापि। परनिष्ठानामुत्साहा-दीनामुद्दीपकत्वं भवितुमर्हति न स्वनिष्ठानामिति विप्रतिपत्तिरिति[6] पूर्वपक्षाभिप्रायः। अत्रोत्तरमाह-**सत्यमिति** । यथा शृङ्गारे-**नलस्य पृष्टा निषधागतागुणानि-** (नै०च०१/३७)त्यादौ ज्ञायमानानां नलगुणानां दमयन्तीनिष्ठरसोद्दीपकत्वं तथात्रापि ज्ञायमानानामुत्साहादीनां वीररसोद्दीपकत्वम्[7]। तच्च परबुद्धेरप्रत्यक्षत्वात् प्रायशः स्वकीयानां संभवति क्वचित् परकीयानामपि इङ्गितादीनां तथात्वे बाधो नास्तीति समाधानमिति भावः। अत्र विशेषमाह-**अनुभाव** इति। अनुभावो रोमाञ्चादिस्तु स्वनिष्ठ एव गमको ज्ञापकः। तस्यानुभावस्य धूमादेरिव अनु-मापकत्वेन रसानुमितिज्ञापकहेतुत्वेन पक्षवर्त्तित्वनियमात्। पर्वतीयवह्न्यादिवद्रस-समानाधिकरण्यनियमादित्यर्थः। इदञ्च स्थूलदृष्ट्या बालबोधनार्थमुक्तम्। वस्तु-तस्त[8] रसस्यालौकिकत्वेन कार्यत्वं ज्ञाप्यत्वं वा नास्तीति निर्णीतं[9] **काव्यप्रकाशे**। **नन्विति**। निरुपाधि निर्व्याजम्। निरुपाधीति[10]पाठो निर्निमित्तम्। शेषम् स्पष्टम्।

भयानकस्य विभावास्तत्र भरतः-

---

१ प्रहणेच्छादया। २ करुणा०। ३ उह। ४ वर्णभीय०। ५ विविक्षितम्।६ विप्रतिपत्तिरितिपूर्वपत्तिरिति। ७ रसोद्दीपकत्वा। ८ वस्तुरस्तु। ९ नास्तीतिर्णीतं।१० निरुपातिपाठोर्निमित्तम्।

विकृतरवसत्त्वदर्शनसङ्ग्रामारण्यशून्यगृहगमनात् ।
गुरुनृपयोरपराधात्* कृतकः स[1] भयानको ज्ञेयः ॥(ना०शा०६/६९)

घटिकाबन्धुबन्धनश्रवणश्मशानदर्शनादय ऊहनीयाः यथा–

उद्यत्कान्तिकठोरकेसरदलत्पाथोधरप्रस्खल–
द्विद्युद्दीधितिकाञ्चनीकृतजगन्निशेषभूमीधरः ।
स्फूर्जत्कण्ठनिनादभिन्नवसुधामार्गप्रविष्टद्विज–[2]
प्रौढाशीर्वचनप्रहर्षितबलिर्व्यालोकि मायाहरिः ॥ ९ ॥

विकृतेति । विकृतरवात् घोरशब्दात् । तथा सत्त्वदर्शनाद्व्याघ्रादिदर्शनात् । तथा संग्रामेऽरण्ये शून्यगृहे च गमनात् । आकस्मिकप्रवेशादित्यर्थः । गुरुनृपयोरपलापात्* प्रतारणात् । एभिर्हेतुभिः । कृत एव कृतकः । स्वार्थे कन् । भयानक रसो ज्ञेयः । बिभेत्यस्मादिति भयानकम् । अत्र शीङ्भिय इत्युणादिसूत्रेण नकप्रत्ययः । भयानकं भीषणं शस्त्रादितत्साधनभूतमस्यास्तीति तथोक्तः। अत्राकारो मत्वर्थीयः ॥ **यथेति** । भयानकविभावोदाहरणमाह–**उद्यदिति** । उद्यन्त्यः कान्तयो येभ्यस्ते । तथाभूता ये कठोरकेसराः कठिनस्कन्धकेशास्तैर्दलन्तो[3] ये पाथोधरा मेघा[4]स्तेभ्यः स्खलन्त्यो या विद्युतस्तासां दीधितिभिः काञ्चनीकृताः सुवर्णवत्पिशङ्गीकृताः जगति पृथिव्यां निःशेषभूमीधराः समग्रपर्वता येन स तथोक्तः । कठतीति कठोर[5]ः । **कठ**[6] **कृच्छ्रजीवने**(धा०पा०३३३)इति धातोः **कठिचकि**(उणादि-६७)त्यादि सूत्रेण ओरप्रत्ययः । **केसरोऽस्त्रियामि**(अमर०१/१०/४३)त्यमरः । तथा स्फूर्जन् प्रस्फुरन् यः कण्ठनिनदः कण्ठध्वनिस्तेन भिन्ना या वसुधा पृथ्वी तस्या यो मार्गस्तेन प्रविष्टा ये द्विजास्तेषां प्रौढानि यानि आशीर्वचनानि तैः प्रहर्षितो हर्षं प्रापितो बलिर्येन स तथोक्तः । मायाहरिः कपटसिंहः नृसिंहःइति यावत् । माति मिमीते मायते वेति माया । **मा छे**(उणादि-५५९)त्यादिसूत्रेण यप्रत्ययः । हरति[7] जिहति वा इति हरिः। **हपिशी**(उणादि-५६८)त्यादिसूत्रेण इन् प्रत्ययः। अनेकार्थत्वं चोक्तमस्य दशपाद्याम् ।

तथाहि–

विष्णौ शाखामृगे शक्रे सिंहददुरवाजिषु ।
दिवाकरे च कपिले हरिशब्दः प्रयुज्यत ॥ इति ।

---

१ स्य । २ स्फूर्जित्कण्ठ०। ३ दलन्तौ ४ मेया० । ५ कथतीकठोरः ६ कठि । ७ हरिति ।

व्यालोकि[1] विलोकितः । जनैरिति शेषः। अत्र नृसिंहदर्शनं विभावः । शार्दूल-विक्रीडितम् ॥९॥

बीभत्सरसविभावास्[2]तत्र भरतः–

अनभिमतदर्शनेन च गन्धरसस्पर्शदोषैश्च ।
उद्वेजनैश्च बहुभिर्बीभत्सरस[3]ः समुद्भवति ॥ (ना०शा०६/७३)

अहृद्यवस्तूनां श्रवणस्मरणादय ऊहनीयाः ॥ यथा–

योधानामधरैरशोककुसुमैर्नेत्रैः सितैरम्बुजै–
र्दन्तैः कुन्ददलैः करैः सरसिजैः सम्पाद्य पुष्पाञ्जलिम् ।
झिल्ली[4] कर्णयुगं विधाय करिणां रक्तावसिक्ताङ्गकैः
प्रेतानां बटुभिः पुरः पुरभिदो नृत्यं समारभ्यते ॥ १० ॥

अनभिमतदर्शनेन अश्लीलवस्त्ववलोकनेन । गन्धे पृथ्वीगुणे । रसे जलघृतादौ । निषिद्धवस्तुस्पर्शे च ये दोषास्तैः । तथा बहुभिरनेकैः । उद्वेगजननैः चिन्तासन्ताप-जनकैः वस्तुभिरिति शेषः । एतैः समस्तैर्व्यस्तैर्वा बीभत्सरसः सम्भवति । बीभत्सं जुगुप्सितं वस्तु हेतुरस्येति बीभत्सः । अकारो मत्वर्थीयः । **बीभत्सं विकृतं त्रिष्विदं द्वयमि**(अमर०१/७/१९)त्यमरः **यथेति**। बीभत्सरसोदाहरणम्–**योधानामिति**। प्रेतानां भूत[6]जातीनाम् । बटुभिर्बालकैः । कर्तरि तृतीया । योधानां सङ्ग्रामहतानां वीराणाम् । अधरैः ओष्ठैस्तैरेव अशोककुसुमै[7]ः । **वञ्जुलोऽशोक**(अमर०२/४/६४) इत्यमरः । अश्नुते इत्यशोक[8]ः। शोकनाशनत्वाद्वाशोक[9]ः।[अहच] अशोकः शोकनाशश्च विचित्रः कर्णपूरक इति क्षीरस्वामी । करणे तृतीया । एवमग्रेऽपि तृतीया करणे ज्ञेया । तथा नेत्रैरेव सितैरम्बुजै[10]ः श्वेतकमलैः । गतासुजननेत्राणां कृष्णत्वापाया-त्सितत्वाभिधानम् । तथा दन्तैः रदैरेव कुन्ददलैः माध्यकुसुमपत्रिकाभिः। **माध्यं कुन्दमि**(अमर०२/४/७३)त्यमरः। **पत्रं पलाशं छदनं दलं पर्ण छदः पुमानि-**(अमर०२/४/१४)त्यमरः। तथा करैरेव सरसिजैः। रक्तकमलैः पुष्पाञ्जलिम् पुष्पै-र्भृतोऽञ्जलि[11]ः करद्वयसंयोगः। अनक्तिः । अज्यतेऽनेनेति[12] दशपाद्या अञ्जधातोर्लिप्रत्यये व्युत्पादित[13]ः । तं विधाय कृत्वा । तथा करिणां गजानां कर्णयुगं कर्णद्वयम् । झिल्लीं

---

१ व्यलोकि । २ ०विभास्तत्र । ३ बहुभिबीभत्स०। ४ शिल्लीं । ५ बीभस्तं । ६ भृत०। ७ ०शोके । ८ अशेकः। ९ शोकनाशनत्वाद्यशोकः १० सितैरम्बुजिः । ११ अज्यतेनेति । १२ ०धातोलि । १३ व्युतादितः ।

झल्लरीम् । वाद्यविशेषस्येयं संज्ञा । विधाय[1] । रक्तावसिक्ताङ्गकैः रुधिरदिग्धाङ्गकैः सद्भिः।अत्राल्पार्थे कन्[2]। पुरभिदः शिवस्य ।पुरोऽग्रे नृत्यं नर्त्तनम् । समारभ्यते[3] क्रियते[4]। अत्र रूपकालङ्कारः। अत्राधरादिदर्शनमुद्दीपनम् । प्रेतबटव आलम्बनमिति विभावनीयम् ॥ शार्दूलविक्रीडितम् ॥ १० ॥

अद्भुतविभावास्तत्र भरतः-

यत्त्वतिशयार्थयुक्तं वाक्यं शिल्पं कर्मरूपं च ।
तत्सम्बद्धैरर्थैः सोऽद्भुतो नाम सम्भवति ॥(ना०शा०६/७५)

मायेन्द्रजालार्थलोभादय ऊहनीयाः ॥ यथा-

उद्दामोद्दाममाद्यत्प्रतिभटदलनोदग्रजाग्रत्प्रभावः
सोऽयं देवो मुदे वो भवतु नरहरिस्तारिताशेषविश्वः ।
यस्य प्रौढप्रतापोद्भटविकटसटाकोटिभिः पाटितानां-
मन्त्राण्यम्भोधराणां बहिरिव निरगुर्[5]विद्युतां कैतवेन ॥११॥

इन्द्रजालं यथा-

व्योम्नि प्राङ्गणसीम्निसान्ध्यकिरणं विस्तीर्य चैलाञ्चलं
ध्वान्तैः कार्मणपांसुभिस्त्रिजगतां नेत्राणि सम्मोहयन् ।
ताराशौक्तिकमौक्तिकानि विहगश्रेणीरवच्छद्मना
क्षिप्त्वीकृत्य बहिष्करोति वदनात्पश्याशुगो मायिकः॥१२॥

इतिश्री भानुदत्तविरचितायां रसतरङ्गिण्यां विभावनिरूपणं
नाम द्वितीयस्तरङ्गः ॥ २ ॥

यत्त्विति । यद्वाक्यं पदसमुदायात्मकम् । शिल्पं चातुर्यम् । कर्म कार्यम् । रूपं स्वरूपम् । अतिशयार्थयुक्तं अतिशयोक्तिविशिष्टम् । तेनातिशयार्थेन सम्बद्धैः सम्बन्धं प्राप्तैः अर्थैः पदार्थैः । अद्भुतोनाम रसः सम्भवति । अद्भवते अद्भवतीति अद्भुतमाश्चर्यम् । तदस्त्यस्मिन्निति मत्वर्थीयोऽकारः । अदपूर्वस्य भूधातोः । **अदिभुवोऽुतच्**(उणादि-६८९)इतिसूत्रेण रूपसिद्धिः । **मायेति** स्पष्टम्। **यथेति**। अद्भुतविभावोदाहरणम् । **उद्दामेति** । अधिकं उद्दामान इति उद्दामोद्दामानः । आधिक्ये द्वे वाच्ये इति वार्त्तिकेण द्विर्भावः । तथाभूता माद्यन्ते ये प्रतिभटाः शत्रवस्तेषां दलने उदग्रो महान् जाग्रत् प्रभावो महिमा यस्य स तथोक्तः । तारित-

---

१ विधायः । २ कृन् । ३ ममारभ्यते । ४ आलम्बननमिति । ५ निरग०।

मुद्धारितमशेषं समग्रं विश्वं जगद्येन स तथोक्तः । विशति अस्मिन् सर्वं इति विश्वम् । **अशुप्रुषी**(उणादि-१५७)त्युणादिसूत्रेण क्वन्प्रत्ययः। एतादृशः सोऽयं नरहरिः। नृसिंहो देवः । वो युष्माकं मुदे हर्षाय भवतु । तादर्थ्ये चतुर्थी । किञ्च–यस्य नृसिंहस्य प्रौढो[1] वा प्रतापस्तेन उद्भटा उद्धता विकटा कठिना[1] या सटा । सटाजटाकेसरयोरित्यमरः[+] । तासां कोटयः अग्राणि । तैः । पाटितानामम्भोधराणां मेघानामन्त्राणि । **अमगत्यादिषु** (धा०पा०४६५)। अमत्यस्मिन्नन्तरस इत्यन्त्रम् । **अमिचिमी**(उणादि-६१३)तिसूत्रेण त्रप्रत्ययः। **अन्त्रं पुरीतदि**[2,3](अमर०२/४/६६) त्यमरः। विद्युताम् । विद्योतत इति विद्युत्। क्विप् प्रत्ययः । कैतवेन व्याजेन । बहिः निरगुरिव । निरगुरिवेत्युत्प्रेक्षा[4] । अपह्नुतिश्च । अत्र इवशब्दो भिन्नक्रमः। यद्यपीवशब्देन सह नित्यसमासो वार्त्तिककृतोक्तस्तथाप्यन्वययोग्यतारूपसामर्थ्याभावान्न नित्यसमासः । तथा च **समर्थः पदविधि** (पा०अ०२/१/१)रितिसूत्रेण सामर्थ्ये सत्येव समासो भवतीति[5] फलितोऽर्थः । अत्र सटावलोकनमुद्दीपनं पूर्वोक्तविशेषणविशिष्टो नृसिंहश्चालम्बनमित्यवगन्तव्यम् । स्रग्धरावृत्तम् ॥ ११ ॥ **यथेति**[6] । इन्द्रजालमुदाहरति–**व्योम्नी**ति । पञ्चाशुगः पञ्चबाणः। स एव मायिको ऐन्द्रजालिकः। व्योम्नि गमनरूपायां प्राङ्गणसीम्नि[7] अजिरसीमायाम् । रंगभूमावित्यर्थः। **डावुभाभ्यामन्यतरस्या**(पा०अ०४/१/१३)मिति डावभावपक्षे **मन** (पा०अ०३/२/८२)इतिसूत्रेण ङीप्निषेधः। सान्ध्यकिरणं सायंकालसम्बन्धि किरणरूपं चेलाञ्चलं वस्त्राञ्चलम् । चेलाञ्चलशब्दौ कम्बलादिभ्यश्चेत्युणादिसूत्रेण व्युत्पादितौ । विस्तार्य प्रसार्य । ध्वान्तैरेव कार्मणपांसुभिः । अन्धकाररूपैर्[8]वशक्रियारजोभिः । करणे तृतीया । जगतीनेत्राणि त्रिलोकलोचनानि सम्मोहयन् सन् । सम्मोहयितुमित्यर्थः । अत्र धनमर्ज्जयन् वसतीतिवत् हेत्वर्थे लटः शत्रादेशः । चैलं चैलंचमुअमूरिति शब्दभेदप्रकाशे[9] । **वशक्रिया**[10] **संवनन**[11] **मूलकर्म तु कार्मणमि**– (अमर०३/२/४)त्यमरः । विहगश्रेणीनां पक्षिपङ्क्तीनां यो रवः शब्दस्तस्य छद्मना मिषेण । झिञ्झि इति शब्दं कृत्वा । तारारूपाणि शौक्तिकमौक्तिकानि । शुक्त्युद्भवमुक्ताफलानि[12]। वदनाद्बहिष्करोति निःसारयति। इति मन्ये इति गम्यते[13]। तेन

---

१ कठिणा । २ ०त्रं । ३ ०न०। ४ निरमुरिवेत्युत्प्रेक्षा ५ भवंती० । ६ मायिकोरोन्द्रजालिकः। ७ प्रांगणसतीं । ८ अन्धकारूपै०। ९ शब्दभेदप्राकारो । १० वसक्रिया । ११ सवननं । १२ ०सुक्ता० । १३ गम्यति । + Not traced out in अमरकोश

गम्योत्प्रेक्षारूपकं कैतवापह्नुतिश्च । यत्रातिशयोक्तिस्तत्रादभुतरस इत्यवगन्तव्यम् । शार्दूलविक्रीडितम् ॥१२॥

इतिश्रीमहोपाध्यायावटङ्कानन्दरामभट्टात्मजभगवद्भट्टविरचितायाम्
रसतरङ्गिणीव्याख्यायां नूतनतरीसम्माख्यायां
विभावनिरूपणे द्वितीयस्तरङ्गः ॥ २ ॥

॥ तृतीयस्तरङ्गः ॥

अथानुभावा निरूप्यन्ते– ये रसाननुभावयन्ति अनुभवगोचरतां नयन्ति ते अनुभावाः कटाक्षादयः । करणत्वेनानुभावकता । करणत्वं च फलायोग–व्यवच्छेदेन सम्बन्धित्वम् । ननु रसे कथमनुभावापेक्षेति चेत्सत्यम् । स्थायिभावोऽपरिपूर्णो रसः। तस्य चान्तरत्वात् । ज्ञापकेन विना कथं ज्ञानमित्यनुभावस्यापेक्षणीयत्वात् ।

अथेति । विभावनिरूपणानन्तरं विभावानुभावव्यभिचारिसंयोगादसनिष्पत्तिरिति भरतसूत्रोक्तक्रमप्राप्तमनुभावनिरूपणं क्रियत इत्यर्थः।[s] **य** इति स्पष्टम् । **करणत्वे–**नेति । रसास्वाद स्येति शेषः । अनुभावकता । अनुभावानामित्यनुवर्त्तते । करणं लक्षयति । फलस्य क्रियाकृतविशेषस्य । अयोगव्यवच्छेदेन योगेनेत्यर्थः । अभावाभावरूपत्वात् । सम्बन्धित्वं सम्बन्धवत्त्वम् । उक्तञ्च **वाक्यपदीये–**

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते तदा यत्र करणं तत्तदा स्मृतमिति ॥(वा०प०३/७/९०)

नन्विति । रसे कथमनुभावापेक्षा विभावमात्रेणैव तत्सिद्धेरिति भावः। ज्ञापकेनेति बाह्येन हि कटाक्षाद्यनुभावेन विनान्तर्वर्तिनो रसस्याभिव्यक्त्यनुपपत्तेरिति भावः ।

ननु कटाक्षादयः कथमुद्दीपनविभावा न भवन्ति । दुष्टे कटाक्षादौ कामिनोर्मनोविकारः परिपूर्णो भवति । अनुभवसिद्धमपनेतुमशक्यत्वात् । किञ्च प्राचीनसम्मतिरपि ।

ईषद्वकित[१]पक्ष्मपङ्क्तिभिरनाकूतस्मितै[२]र्वीक्षितै–
रेतैरेव तवाद्य सुन्दरि करकोडे जगद्वर्तते ।
अन्तःपांसुलहेमकेतकदलद्रोणीदुरापस्त्रियो
दोर्मूलस्यविभावनादिह पुनः कूरे किमाकाङ्क्षसि ॥१॥

नन्विति । स्पष्टम् । समापत्तिरिति[३]। कटाक्षादीनामुद्दीपकत्वे इति शेषः । **ईषदि**ति । हे सुन्दरि । ईषत्किञ्चिद्वकिता वक्रकृतायाः पक्ष्मपङ्क्तयस्ताभिः। तथा अनाकूत–स्मितै[४]ः। अकारणहास्यैः स्वभावतो हास्यैरित्यर्थः। तथा वीक्षितैः स्वभावत इति शेषः। एतैरेव हेतुभिः कृत्वा[५] जगल्लोकः । अद्य इदानीम् । तव करक्रोडे हस्तमध्य वर्त्तते ।

---

१ ०विकित०। २ स्मितैर्वीक्षितै। ३ समपतिरिति । ४ ०स्मितेः । ५ कृत्वाः ।

s The scribe has added the words श्रीरामजयराम here.

यद्यपि **क्रोडे भुजान्तराले स्यादि**(अमर०२/६/७७)त्यमरोक्तेः क्रोडशब्दो भुज-युगलान्तरालवाची तथाप्यत्र लक्षणयान्तरालमात्रे वर्त्तते। किञ्च हे क्रूरे चण्डि। इहलोके पुनस्तु[1] परन्तु। पुनरप्रथमे विशेषे चेति गणव्याख्याने[2]। अन्तर्मध्ये पांसुलानि रजोयुक्तानि हेमकेतकदलानि सुवर्णसदृशकेतकपत्राणि तानि द्रोण्य एवेत्युपमितसमासः। **द्रोणीकाष्ठाम्बुवाहिनी**(अमर०१/१०/११)त्यमरः। अत्र क्षीर-स्वामी– काष्ठमित्युपलक्षणम्। काष्ठाश्मादिमयी जलधारिणी द्रोणी। द्रवत्यम्भो-ऽस्मिन्निति व्युत्पत्तेरिति विश्वप्रकाशे।

आटकानां चतुष्के च द्रोणी स्यादिष्टदन्तरे।
द्रोणी काष्ठाम्बुवाहिन्याङ्गवां वासे भुजस्थितावि ति च॥

तस्या दुरापा दुर्लभा श्रीर्यस्य तथोक्तस्य दोर्मूलस्य विभावनात्[3] प्रकाशनात्[4] किमाकाङ्क्षसि। किमिच्छसि। शार्दूलविक्रीडितम्॥ १॥

इत्यादय इति चेत् सत्यम्। कटाक्षादीनां करणत्वेनानुभावकत्वम्। विषयत्वेनोद्दीपनविभावत्वम्। तथा चात्मनि रसानुभवकरणत्वेन[5] नायिकां प्रति कटाक्षादयोऽनुभावाः ते च दृष्टिगोचरीभूताः कामिनोः मनोविकार-कारयन्तो विषयत्वेनोद्दीपनविभावा इति। स चानुभावः कायिकमानसा-हार्यसात्त्विकभेदाच्चतुर्धा। कायिका भुजाक्षेपादयः मानसाः प्रमोदादयः। नाट्ये चतुर्भुजत्वज्ञानमाहार्यः। सात्त्विका रोमाञ्चादयः।

इत्यादयः स्मितवीक्षणादयः उद्दीपकतया दृष्टा इति पूर्वपक्षः क्रियते चेत्। अत्र समाधानमाह– **सत्यमिति**। नायकस्यात्मनि रसानुभवकरणत्वेन नायिकां प्रति कृताः कटाक्षादयोऽनुभावाः भवन्ति। नायिकया[6] कृतास्तेऽस्य दृष्टिगोचरीभूताः सन्तो मनोविकारं जनयन्त्यतो विषयत्वेनोद्दीपनविभावा भवन्तीति व्यवस्था ज्ञेया[7]। स चानुभाव इति। आहार्याः कल्पिताः। शेषं सुगमम्।

शृङ्गारस्यानुभावास्तत्र भरतः–

नयनवदनप्रसादैः। स्मितमधुरवचोधृतिप्रमोदैश्च।
विविधैरङ्गविकारैस्तस्याभिनयः[8] प्रयोक्तव्यः॥
कटाक्षभुजाक्षेपादय ऊहनीयाः॥

---

१ पुनरतुः। २ ०व्याख्याते। ३ विभावानात्। ४ प्रकाशानात्। ५ रसभावकत्वेन। ६ नायिकाया। ७ ज्ञेयम्। ८ ० स्तस्यानुभवः।

यथा-

मुक्ताहारस्तनकलशयोः कर्णयोःकर्णिकारं
मौलौ माला परिभवभयादेव दूरे न्यवारि।
दृष्टेऽभीष्टे समजनि पुनः सुभ्रुवो भूषणाय
प्रातर्वातप्रचलकमलद्रोहदक्षः कटाक्षः ॥ २ ॥

नयनेति । स्मितं च मधुरवचोधृतिश्च प्रमोदश्च तैः[1] । धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिष्विति विश्वः । प्रमोदो हर्षः । अङ्गविकारादैः कटाक्षादिभिः तस्य शृङ्गारस्याभिनयो[2] व्यञ्जकव्यापारः । **व्यञ्जकाभिनयौ समावि**(अमर०१/७/१६) त्यमरः । प्रयोक्तव्यः ॥२॥ **यथे**ति शृङ्गारविभावोदाहरणम् । **स्तने**ति । स्तनौ कलशा-विवेत्युपमितसमासः । तयोर्विषये यो मुक्ताहारः । तथा कर्णयोर्विषये कर्णिकारम् । निर्गन्धकर्णिकारवृक्षकुसुमम् । **द्रुमोत्पलः कर्णिकार**(अमर०२/४/६०) इत्यमरः । व्याख्यातं चैतत्क्षीरस्वामिना-द्रुमस्यास्य उत्पलानीव पुष्पाणीति द्रुमोत्पलः सुरभिश्चायम् । अन्यो निर्गन्धः । कर्णिकां इयतीति कर्णिकार इति ह्यर्थेऽयं प्रवर्तत इति । तथा मौलौ मस्तके माला । एतत्सर्वं परिभवभयात् पराभवभयादेव दूरे न्यवारि निवारितम् । अत्रावज्ञानवाचित्वाभावान्न **परौ भुवोऽवज्ञान**[3] (पा०अ०३/३/५५) इति घञ् । दुःखेन कृच्छ्रेण ईयते इति दूरम् । दुःपूर्वस्येणो **दुरीणो लोपश्चे**(उणादि-१८७)ति सूत्रेण रक् प्रत्ययः । अत्र दूरान्तिकार्थेभ्यश्चतस्रो विभक्तयः फलिता इति सिद्धान्तात् प्रातिपदिकार्थमात्रे सप्तमी । नायिकयेति शेषः । किञ्च अभीष्टे स्वामिनि दृष्टे सति । तु पुनस्त्वर्थे । सुभ्रुवः नायिकायाः । प्रातःकाले वातेन उत् अधिकं तरलं[*] चञ्चलं यत्कमलं तस्य द्रोहे दक्षः । लक्षणया तत्सदृश इत्यर्थः । अत्र **कुधद्रुहेति सूत्रे यं प्रति कोप** (पा०अ०१/४/३७) इत्युक्तेः कटाक्षस्य[4] कमलं प्रति कोपाभावान्न चतुर्थीसमासः । एतादृशः कटाक्षः अश्नुते व्याप्नोति रूपमिति अक्षि । कटं विकटं अक्षि यस्मिन् प्रसारे स कटाक्षः । वक्रीकृतचक्षुप्रसारः । **बहुव्रीहौ सक्थ्यक्ष्णोः स्त्वाङ्गात्षजि**(पा०अ०५/४/११३)ति समासान्तः। **कटाक्षोऽपाङ्ग दर्शने** (अमर०२/६/९४)इत्यमरः। भूषणाय अलङ्करणाय समजनि । सञ्जातः[5] । **दीपजने** (पा०अ०३/१/६१)त्यादिना कर्त्तरि चिण् तस्य लुक्। अत्र नायिकाश्रितस्य शृङ्गारस्य कटाक्षोऽनुभावः । मन्दाक्रान्तावृत्तम्[6] ॥ २ ॥

---

१ प्रमोदश्च प्रमोदश्च तैः। २ ०स्याभितयो । ३ पुरोभुवावज्ञान ।४ कठाक्षस्य । ५ सृजातः ६ ०वृत्तंम् ।

हास्यानुभावास्तत्र भरतः–

विकृताकारैर्वाक्यैरङ्गविकारैर्विकृतवेषैश्च[1]।

हास्यं जनयेद्यस्मात्तस्माज्ज्ञेयो रसो हास्यः ॥४॥(ना०शा०६/५०)

ओष्ठाधरविवरणदर्शननासाकपोलस्पन्ददृष्टिवाक्वेषकुञ्चनादयः[*]

ऊहनीयाः। यथा–

पात्रीकृत्य कपालमण्डलमिदं पीयूषभानोः कलां

वर्तीकृत्य फणामणिं फणिपतेः संपाद्य तस्मिन् शिखां

सायं दीपविधिं वितन्वति शिशौ मन्दं हसन्त्योमया

किञ्चित्कुञ्चदपाङ्गभङ्गकुटिला दृष्टिः समारोपिता ॥३॥

विकृतेति । विकृताकारैर्वाक्यैः विकृतस्वराक्षरपदसमुदायैः[2] । अङ्गविकारैर्बाधिर्यादिभिः । विकृतवेशैः विपरीतवस्त्रादिधारणैः । कृत्वा । यस्मात्कारणाद्धास्यं जनयेत् प्रकाशयेत्तस्माद्धेतोर्हास्यो रसो[3] ज्ञेयः ॥ ४ ॥ **ओष्ठेति**। ओष्ठविवरणदर्शनेन अधरप्रकाशनदर्शनेन[4] । नासिकाकपोलयोश्चालनेन । दृष्ट्या व्याकोशः[*]। **व्याकोशः विकचस्फुटा**(अमर०२/४/७)इत्यमरः । कुञ्चनं संकोचस्ताभ्यां च कृत्वा हास्यो भवतीति स्वयं विचार्यम् ॥५ ॥ हास्यविभावोदाहरणम्– **पात्रीकृत्येति**। शिशौ स्कन्दौ गणपतौ वा । कपालमण्डलं मण्डलाकारं शिवस्य भिक्षाकपालम् । कपइति सौत्रो धातुः। कपतीति कपालम् । **तमिबिडी**(उणादि-१२३)त्यादिसूत्रेण कालन्प्रत्ययः। मण्डयते मण्डयतीति वा मण्डलम् । **मण्डिभूषायामि** (धा०पा०१५८८) ति धातोः अलप्रत्ययः । पात्रीकृत्य शरावं कृत्वा । पीयूषभानोश्चन्द्रस्य कलाम्[5]। **कला तु षोडशो भाग** (अमर०१/३/१५)इत्यमरः । वर्त्तीकृत्य दशां कृत्वा । तस्यां वर्त्तौ । फणिपतेः । शेषस्य फणामणिः । शिखां संपाद्य संयोज्य। सायं सायंकाले। **सायं साये प्रगे प्रातरि**(अमर०३/४/१९)त्यमरः । दीपविधिं दीपनिर्माणम् । वितन्वति कुर्वति सति । मन्दं यथा तथा । अत्र क्रियाविशेषणत्वादेकवचनम्[6] । क्रियाविशेषणानां क्लीबत्वमेकवचनं चेति भाष्यवार्त्तिकव्याख्याने । एकवचनं द्वितीयाया एवेति माधवः। क्रियानां कर्मत्वात्तद्विशेषणानामपि कर्मत्वमिति फलान्वयपक्षः। रत्नाकरे तु प्रथमातिक्रमे कारणाभावात्प्रथमाया एवेति व्यापारान्वय पक्ष इति। हसन्त्या हास्यं

---

१ ०वित्त०। २ वाक्यैःविकृत०। ३ ०तस्माद्धेतोहास्यो । ४ ०दशनेन। ५ कलासुशोभागइत्यमरः। ६०विशेषणवादे०।

कुर्वन्त्या । उमया पार्वत्या । किञ्चिदीषत् कुञ्चितौ वकौ[1] । अपाङ्गौ च तयोः भङ्गेन तरङ्गेण । **अपाङ्गौ नेत्रयोरन्तौ**[2]**वि**(अमर०२/६/९४)त्यमरः । **भङ्गस्तरङ्ग ऊर्मिर्वा** (अमर०१/१०/५)इत्यमरः । कुटिला वका दृष्टिः समारोपिता । अत्र पार्वत्याश्रयस्य हास्यरसस्य तदवलोकने दृष्ट्यारोपणमनुभावः । शार्दूलविक्रीडितम् ॥३॥

करुणरसस्यानुभावास्तत्र भरतः-

निःश्वसितेन च रुदितैर्मोहप्रलापपरिदेवनैश्च ।
अभिनेयः करुणाख्यो देहाभिघातादिभिश्चैव ॥

मुखशोषप्रलापवैवर्ण्यादय ऊहनीयाः ॥

यथा-

ताते याते बत गणपतौ नाकमद्यापि तस्या
वाचं देव्या त्यजति शिथिलं कङ्कणं नैव दोष्णोः ।
अद्याप्यार्द्रीभवति कुचयोर्नापि पाटीरपङ्को
नेत्रे निर्यत्पयसि न पुनः कज्जलं स्थैर्यमेति ॥ ४ ॥

निःश्वसितेति[3] । निःश्वासो नीचैःश्वासः श्वसनं उच्छ्वासः । निःश्वासवायुनेति वार्थः। तथा रुदितैः । क्रन्दितैः । **रुदितं क्रन्दितमि**(अमर०१/७/३५)त्यमरः । परिदेवनैः विलापैः। **विलापः परिदेवनमि**(अमर०१/६/१६)त्यमरः । अभिनेयो व्यञ्जनीयः । **यथेति** करुणरसोदाहरणम् **तातेति** । गणानां जनसङ्घानाम् । पतिः रक्षकस्तस्मिन् । **संघातेप्रथमे**[4][5] **गण** (अमर०३/३/४६)इत्यमरः । तातेपोषकत्वा-त्तातुल्ये । **तातस्तु जनकः पिते**(अमर०२/६/२८)त्यमरः । नाकं स्वर्गं निर्गच्छति प्राप्तवति सति । भावे सप्तमी । तस्याः देव्याः महिष्याः । **देवी कृताभिषेकायामि** (अमर०१/७/१३)त्यमरः । दोर्ष्णोर्हस्तयोः सम्बन्धि शिथिलमपि कङ्कणं वलयं वाचां शब्दं नैव[6] त्यजति । वाचा शब्द आबन्तः । टापं चैव हलन्तानामित्युक्तेः । लोके शिथिलोजन[7]ः शब्दं न करोति इदं तु शिथिलमपि सशब्दमित्यपि शब्दार्थः । नेत्रे नयने निर्यत्पयसि निर्गच्छदश्रुजले सति । निपूर्वस्येणो लटः शत्रादेशः । कुचयोर्विषये । पाटीरपङ्कश्चन्दनपङ्कः । पटेति दण्डके पठितस्य चौरादिकस्य पटधातोः अन्येभ्योऽपि दृश्यते इति कीरप्रत्ययः । अद्यापि नार्द्रीभवति । कुचयोरुपरि नेत्राश्रुधारापातेऽपि नार्द्रीभवति[9] इति विरोधः । अन्तःशोकाग्निप्रादुर्भावात्तदुपरि

---

१ त्वतौ । २ ०पूरन्ता० । ३ निःश्वासेति ४ संयत ५ प्रमथे । ६ भैव ।७ शिलाजनः। ८ ताद्रा० । ९ नाद्रीनवति ।

पतितानामपि नेत्राश्रुजलानां शोषणसम्भवान्नार्द्रत्वमित्यविरोधः । तु पुनः कज्जलं नेत्राञ्जनं स्थैर्यं स्थिरत्वं न एति । अश्रुधारया तन्नाशादिति भावः । कस्यचिद्राज-पुरुषस्येयमुक्तिः । अत्र करुणाश्रयायाः नायिकायाः कज्जलास्थैर्यमनुभावः । मन्दाक्रान्तावृत्तम् ॥४॥

रौद्रानुभावास्तत्र भरतः–

नानाप्रहरणसङ्कुलशिरसः कम्पैः कराग्रनिष्पेषैः ।
घोरैरर्थविशेषैस्तस्याभिनयः प्रयोक्तव्यः ॥

भ्रुकुटीदन्तोष्ठपीडनादय ऊहनीयाः । यथा–

ये ये भीमेन बद्धभ्रुकुटी घनरवदन्तनिष्पीडितौष्ठं
विक्षिप्ता व्योम्नि विन्ध्याचलचटुलचमत्कारभाजः करीन्द्राः।
तेषामेषां कपोलादिव भयविधुतात्काचिदुष्ट्रीय लग्ना
बिम्बे पीयूषभानोर्मधुकरपटलीलाञ्छनस्य च्छलेन ॥५॥

नानेति[1] । नानाप्रहरणैः अनेकप्रहारैः । सङ्कुलं व्याप्तं यत् शिरस्तस्य कम्पैः कृत्वा । कराग्रनिष्पेषैः । हस्ताग्रमर्दनैः । तथा घोरैरुग्रैः । अर्थविशेषैः दन्तपीडनादिभिरित्यर्थैः[2] । तस्य रौद्रस्य अभिनयः[3] । व्यञ्जकव्यापारवाचिनाभिनय-शब्देनाभिव्यक्तिर्लक्ष्यते । प्रयोक्तव्यः प्रयोज्यः ॥ **यथेति** । रौद्रानुभावं लक्षयति । **ये ये इति**[4] । भीमेन भीमसेनेन । बद्धा भ्रुकुटिर्यस्यां[5] क्रियायां यथा तथा । सकोपवक्त्र-विकारे स्यात् । वक्रभ्रूभुवः पराकुटिरिति हैमः । तथा घनरव[6] निबिडशब्दम् । तथा दन्तैर्निष्पीडितःओष्ठो यस्यां क्रियायाम् । चटुल[7]श्चासौ विन्ध्याचलश्चेति विन्ध्या-चलचटुलः जङ्गमो विन्ध्याद्रिरित्यर्थः । अभूतोपमेयम्[8] । विशेषणं विशेष्येण बहुलमित्यत्र बहुग्रहणादत्र विशेष्यस्य विशेषणेन सहकर्मधारयः । तस्य यच्च-मत्कारस्तं भजन्तीति तथोक्ताः। पदार्थवृत्तिनिदर्शनेयम् । ये ये करीन्द्राः गजेन्द्राः व्योम्नि गगने विक्षिप्ताः प्राप्ताः तेषाम् । एषाम् सर्वेषामिति शेषः । अत्र ये इति

---

१ नानेरिति ।२ °दितिरित्यर्थः। ३ अभिनियः । ४ येयेति । ५ भ्रकुटियस्यां । ६ घनरंव ।
७ चटल० । ८ अभूतोपमयं ।

वीप्सया सर्वात्मकत्वमुक्तम् । तदेव तच्छब्देन परामृष्यते[1] । वीप्सा लभ्यस्यार्थस्य वीप्साभिन्नत्वात्तच्छब्दस्य नित्यवीप्सयोरिति द्वित्वं न । यत्र तु तच्छब्देन वीप्सैव परामृष्यते तत्र तु तच्छब्दस्य द्वित्वं भवत्येव[2] । यथा विवर्णभावं स स भूमिपालः सा सा ह्रिया नम्रमुखी बभूवेत्यादौ । तथोक्तं **काव्यप्रकाशे-येन केनचिद्रूपेण स्थितं सर्वात्मकं वस्त्वाक्षिप्तं तथाभूतमेव तच्छब्देन परामृश्यत** (का०प्र०उ०/७) इति । वीप्सालक्षणं तु महाभाष्यादेरवगन्तव्यम् । विस्तरभियात्र नो प्रदर्शितम् । भय-विधुतात् भीतिकम्पितात् । कपोलात् । जातित्वादेकवचनम्[3] । उड्डीय[4] उत्पत्य । एषा काचिन्मधुकरपटली भ्रमरपङ्क्तिः। पटलीशब्दस्यापचयविशिष्टत्वेन विवक्षित-त्वात्स्त्रीत्वम्[5] । **स्त्री स्यात्काचिन्मृणाल्यादि विवक्षापचये यदी**(अमर०३/५/७) त्यमरः । मधुकरपटले धूमशङ्कां तनोतीत्यत्र तूपचयस्य विवक्षितत्वात्पुंस्त्वमिति बोध्यम् । लाञ्छनस्य छलेन व्याजेन । पीयूषभानोश्चन्द्रस्य । बिम्बे मण्डले । लग्नेवेत्युत्प्रेक्षा । भयविधुतेत्यपि पाठः । बिद्यते तै रूप्यते वा इति बिम्बम् । **बिदि अवयवे**(धा०पा०६६)वा रूपक्रियायामित्यस्य **उल्बादयश्च**(उणादि-५४४)त्युणादि-सूत्रेण वन्प्रत्यये निपातितः। अत्र भीमसेननिष्ठरौद्ररसस्य गजोत्क्षेपणादयोऽनुभावाः। **इयम् सापह्नवोत्प्रेक्षे**(अ०स०-२२)**त्यलङ्कारसर्वस्व**कारः। स्रग्धरावृत्तम् ॥५॥

शौर्यैर्वीर्यैर्धैर्यैरुत्साहपराक्रमप्रभावैश्च ।
वाक्यैराक्षेपकृतैर्वीररसः सम्यगभिनेयः ॥ (ना०शा०-६/६८)++

नन्वतीन्द्रियस्य रसस्य ज्ञापकाः शरीरधर्माभवितुमर्हन्ति । अत एव सर्वत्र उक्ताः । तथा च धैर्योत्साहौ न शरीरधर्माविति चेत्सत्यम् । धैर्यपदेन चाञ्चल्याभाव उक्तः । उत्साहपदेन चाश्रुपुलकादयो लक्षिताः । यद्वा-अनुभावश्चतुर्विधः । तत्र मानसोऽप्यनुभाव उक्तः । स च ज्ञायमान एव गमक : । स च मानस ऐन्द्रियकश्चेति न कश्चिद्विशेषः । विनयदानादयः ऊह्नीयाः ॥

शौर्यैरिति । शयति संग्रामं श्रूयते रिपुभिरिति शूरः। शू गतौ । शु सिची(उणादि-१९३)-**त्यादिसूत्रेण क्रन्प्रत्ययो दीर्घश्च । दधात्यापत्सु चित्तमिति धीरः । धाधातोः सुसुधे-**

---

१ रामृष्यते । २ भवत्येवा । ३ ०त्वादकवचनम् । ४ उड्डीय ५ विवक्षितत्वास्त्रीत्वम् ।
६ शौर्यैवीर्यैधैर्यै०। ७ ०राक्षेकृतै० । ८ कृतैवीररसः । ९ धैर्यात्साहौ । १० युद्धा० ।
++In Natyaśāstra, the version of the first line in this verse is –
स्थितिधैर्यवीर्यगर्वैरुत्साहपराक्रमप्रभावैश्च ।

(उणादि-१९२) त्यादिसूत्रेण कन्प्रत्ययः । ब्राह्मणादेराकृतिगणत्वाच्छूरधीरशब्दयोः[1] कर्मणि घञ्। तेन शौर्यैः शूरकर्मभिः संग्रामाभिगमनादिभिः। धैर्यैः रणस्थैर्यादिभिः। वीरयते परान् कम्पयते इति वीरः । विपूर्वादीरगतौ **कम्पने चे**(धा०पा०१०१८)ति धातोः पचाद्यच्। चौरादिकस्य विक्रान्त्यर्थस्य वा। तस्मिन्यानि साधुनि व्यस्तानि स्तव्यानि कर्माणि तानि वीर्याणि तैः। **वीर्यं बले प्रभावे**[2] **चे**(अमर०३/३/१५४)त्यमरः। च शब्दाद्रेतो वीरकर्म चेति क्षीरस्वामी। **शुक्रं तेजो रेतसी च बीजवीर्येन्द्रियाणि** (अमर०२/६/६२)चेति श्लोकान्तरे तेनैव वीरशब्दव्युत्पत्तिः[3] साध्वर्थे उक्ता। कर्मणा तु [युवादित्वादणि चैरमिति] रामाश्रम[4]ः। तथा उत्साहेन पराक्रमेण प्रभावेण चेत्यर्थः। तत्रोत्साहयुद्धादिसंरम्भः कार्यारम्भेषु संरम्भः यो उत्साह उच्यत इति काव्यप्रदीपोक्तेः। तत्र पराक्रमः शत्रुपराजयः। पराक्रमोऽरिविजय इति रामाश्रमः। प्रभावः क्षात्रं तेजः। **स्यात्प्रतापः प्रभावश्च यत्तेजः कोशदण्डजमि** (अमर०२/८/१०) त्यमरः। तथाऽऽक्षेपेण निन्दया कृतैर्वाक्यैररुंतुदवचनैः। अस्य श्लोकस्य मुनि-वचनत्वात्पुनरुक्तिर्नोद्भावनीया। शेषं स्पष्टम्। **नन्विति**। अतीन्द्रियस्य रसस्य शरीरधर्माज्ञापका भवितुं युक्ताः। कथं मानसौ धैर्योत्साहा[5]विति चेत् उच्यते-**सत्यमिति**। धैर्यशब्देन लक्षणया जन्यश्चाञ्चल्याभावः। उत्साहशब्देन पुलकादय-श्चेति। **यद्वेति** पक्षान्तरे। **अनुभावेति**। शरीरेन्द्रियवाङ्मानस[6]जन्यत्वेनेति भावः। तस्यानुभावस्य अनुभावकम् बोधकम् ज्ञानमेव। च परं तत् ज्ञायमानम्[7]। मानसमिति[8] मनोजन्यम्। ऐन्द्रियकं वाऽस्तु तत्र विशेषो नास्ति।

युद्धवीरानुभावो यथा–

अग्रे वासवजित् समग्रसमर[9]व्यापारदीक्षागुरुः
पार्श्वे तस्य विपक्षपक्षदमनक्रीडाधनो रावणः।
इत्थं सर्वतः परिजने सन्ध्यास्मृतिं कुर्वतः
श्रीरामस्य न कुम्भकस्य पवने क्षुण्णः स कोऽपि क्रमः ॥६॥

यथेति। युद्धवीरस्यानुभावं लक्षयति **अग्र** इति। समग्रा ये समरव्यापारास्तेषां या दीक्षा नियमग्राहणं तस्यां गुरुः गुरुवत् शिक्षकः। **दीक्षमौण्ड्यैज्ञोपनयननियमव्रता-देशेषु** (धा०पा०६०९) **इतिधातोर्गुरोश्च हल** (पा०अ०३/३/१०३) इति स्त्रियामङ्-

---

१ ०मणत्वा०। २ प्रभावै। ३ ०व्यत्पत्तिः। ४ रोमाश्रमः। ५ धैर्यौत्साहा०। ६ ० वाक्मानस। ७ च परं तत्मानं। ८ मानसंति। ९ समग्रव्यापार०। [ ] unreadable text.

प्रत्ययः। एतादृशो वासवजित् रावणपुत्रः । अग्रे सैन्याग्रे वर्त्तत इति शेषः । तस्य वासवजितः पार्श्वे समीपे । पर्शूनां समूहः पार्श्वः। पर्शा णस् वक्तव्य इति णस् । **सिति चे**(पा०अ०१/४/१६)ति सूत्रेण पदत्वात् । भसंज्ञानिमित्त**ओर्गुणेन**(पा०अ०६/४/१४६)। विपक्षदमनं शत्रुसैन्यपीडनं तदेव क्रीडा सैव धनं यस्य स तथोक्तः । रावणः । अस्ति। अत्रैकतिङ्वाक्यमिति लक्षणात् सिद्धयेऽप्रयुज्यमानोऽप्यस्तिर्भवति । अस्ति भवति परः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति भाष्यकारः । तेन क्वचित् स्यात् क्वचित् भवतीति सूत्रवृत्तिषु प्रयुज्यते। केचित्तु अस्तिर्भवन्ति पर इति पठन्ति। भवन्ति लटः पूर्वाचार्याणां संज्ञेति तत्र मूलं मृग्यम् । स्यादित्यत्र लडभावाद्भवतीत्यत्रास्तेरभावाच्चेति । इत्येवमनेन[1] प्रकारेण सर्वतः परिजने दूतादौ जल्पति सति सन्ध्यास्मृतिम् सन्ध्योपासनां कुर्वतः । श्रीरामस्य सन्ध्योपासनां कुर्वता रामेणेत्यर्थः। इय[2] तृतीयार्थे षष्ठी । सतां गतमित्यादिवत् यथाहुः शाब्दिकाः–कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येवेति । कुम्भकस्य कुम्भयितुं प्रवृत्तस्य । तुमुन्न[3]र्थे ण्वुल् प्रत्ययः । कृष्णं दर्शको यातीतिवत् । प्राणमित्यर्थलभ्यम् । भवने*लक्षणया तद्धारणे । स कोऽपि क्रमः । आरोहावरोहल[4]क्षणः। न क्षुण्णो नाभ्यस्तः । न स्मृत इति यावत् । उत्साहातिशयादिति भावः । अत्र रामनिष्ठवीरस्य प्राणायामक्रमविस्मरणरूपोऽनुभावः । शार्दूलविक्रीडितम् ॥६॥

दयावीरानुभावो यथा–

ध्वान्तस्तोमधरे जगद्भयकरे पाथोधरे वर्षति
कोऽव्याकुलवत्सगोकुलदयादीनेक्षणः केशवः ।
हस्तन्यस्तमहीधरच्युतिधिया नैकाङ्गुलीपल्लवैः
स्रस्तं वेणुमुरीकरोति न तनोः स्रस्तं वहत्यंशुकम् ॥७॥

वीररसानुभावं दर्शयति–**ध्वान्ते**ति । केशवः श्रीकृष्णः । क्लिश्नन्तीति केशाः क्र्यादेः[5] **क्लिशू विबाधने**(धा०पा०१५२३) इति धातोः **क्लिशेरन्लोलोपश्च**[6] (उणादि ७२१)इति सूत्रेणान्प्रत्यये लकारलोपे रूपम् । ते सामुद्रिकोक्तलक्षणयुक्ताः सन्त्यस्येति केशवः । **केशाद्वो**[7]ऽन्यतरस्यामि(पा०अ०५/२/१०९)ति वप्रत्ययः । यद्वा कश्च अश्च ईशश्च केशास्ते सन्त्यस्यां केशा इति[8]। ध्वान्तस्तोमधरे अन्धकारसमूहभृति। तथा जगद्–

---

१ इत्यमनेन । २ इय । ३ तुमुन्नथे । ४ आराहवरोहलक्षणः। ५ क्लिश विबाधे ।
६ क्लिशेरन्लोपश्चल इति । ७ केशद्वो०। ८ शा इति ।

भयकरे। पाथोधरे मेघे वर्षति सति। अत्र **मेघर्तिभयेषु कृञः**[1] (पा०अ०३/२/४३)इति खच् प्रत्यये भयंकर इति स्यात्तथापि अल्पारम्भाः क्षेमकरा इतिवत् कर्मणः शेषत्वविवक्षायां पचाद्यच्। एवं पाथोधरशब्दोऽपि ज्ञेयः। क्रोडे भुजान्तराले। व्याकुलं व्यग्रम्। वत्सानां गवां च यत्कुलं वृन्दम् तस्मिन् या दया तया[2] दीने कातरे ईक्षणे नेत्रे यस्य स तथोक्तः सन्। हस्ते न्यस्तो यो महीधरो गोवर्धनस्तस्य च्युतिभिया पतनभयेन हेतुना स्रस्तमधः पतितमपि[3] वेणुं वंशम्। अङ्गुलीपल्लवैः पल्लवोपमाङ्गुलीभिः नोरीकरोत्येव। एवकारोऽभिन्नक्रमः। अङ्गीकरोतीत्यर्थः। तथा तनोः स्वशरीरात्। स्रस्तमंशुकं वस्त्रम् न हरति न गृहणाति। **वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकमि**(अमर०२/६/११५)त्यमरः। पदार्थहेतुकं काव्यलिङ्ग[4]-मलङ्कारः। अंशुकमित्यत्राश्नोतेरौणादिकनुकन् प्रत्ययः। अत्र दयावीराश्रयस्य कृष्णस्य वेणुवस्त्रयोरग्रहणमनुभावः। शार्दूलविक्रीडितम् ॥ ७ ॥

दानवीरानुभावो यथा–

औदास्यं न विधेहि गच्छ न गृहात्संवीक्ष्य[5] मृद्भाजनं
याचे किन्तु भवन्तमेतदखिलं[6] कौत्स क्षणं क्षम्यताम्।
दासश्चेदहमस्मि चेद्वसुमती सर्वैव संग्राह्यताम्
स्वर्णं चेद्गुरुदक्षिणा धनपतेरानीय सम्पाद्यते ॥८॥

यथेति। दानवीरानुभावमुदाहरति–**औदास्यमिति**। हे कौत्सऋषे[7] मृद्भाजनं भवत्पूजनार्थमानीतं मृत्तिकापात्रं वीक्ष्य दृष्ट्वा। औदास्यं उदासीनत्वम्। न विधेहि मा कुरु। गृहान्न गच्छ। गृहं विहाय मा गाः। ल्यब्लोपे पञ्चमी। किन्तु भवन्तम् त्वाम्। क्षणं क्षम्यतामित्यखिलं[8] एतदेव वस्तु याचे। द्विकर्मकस्य याचेर्दुहादि-त्वादप्रधाने कर्मणि प्रत्ययः। एतदधुनेति पाठः साधीयान्। चेत् यदाहं दासोऽस्मि भवामि। चेत्तद्वा सर्वा[9] समग्रैव वसुमती[10] पृथ्वी संगृह्यते। चेद्यदि[11] गुरुदक्षिणा-स्वर्णमस्ति। धनपतेः[12] कुबेरात् आनीय आहृत्य संपाद्यते दीयते। अत्र दानवीराश्रय-रघुराज्ञः कौत्साश्वासनमनुभावः। शार्दूलविक्रीडितम् ॥ ८ ॥

भयानकस्यानुभावास्तत्र भरतः–

---

१ कृञ्। २ तया तया। ३ पिततमपि। ४ काव्यलंग०। ५ संवीक्ष। ६ भवत। ७ ०ऋषेः।
८ ०त्यखल। ९ सर्वां। १० वूसुमती। ११ चेद्यादि। १२ धनपत्तेः।

करचरणनेत्रमस्तकसर्वाङ्गेषु प्रकम्पनैश्चैव[1] ।
शुष्कोष्ठ[2]तालुकण्ठैर्भयानको नित्यम[3]भिनेयः ॥
रोमाञ्चवदनवैवर्ण्यस्वरभेदादय ऊहनीयाः । यथा–
व्यस्तस्रस्ततृणावलीढवदन०याकीर्णफेनोच्चयं
काकु०याकुलघोरघर्घररवं स्फारीभवल्लोचनम् ।
कम्पप्रस्खलदङ्घ्रिवामनतनुश्वासोर्मिनुन्नाधरं
विस्तीर्णे भुजगस्य वक्त्रकुहरे कृष्णस्य गावः स्थिताः ॥९॥

करचरणेति । करचरणादीनां[4] प्रकम्पनैः । तथा शुष्कैरोष्ठकण्ठतालुभिः कृत्वा । शुष्धातोरौणादिकः कन् । कणयति काण्यते वा कण्ठः । चौरादिकस्य **कण निमीलने**(धा०पा०१९१६)इति धातोः **कणेष्ठ**(उणादि–१०८)इति ठ प्रत्ययः। स्पष्टमन्यत् । **यथे**ति । भयानकानुभावान् दर्शयति–**व्यस्ते**ति । व्यस्तमितस्ततः[5] स्रस्तान्यधः पतितानि यानि तृणानि । अर्थादवशिष्टानि इत्यर्थः । तैरवलीढानि व्याप्तानि यानि वदनानि तेभ्यो व्याकीर्णाः फेनोच्चया यस्यां क्रियायाम् । काकुः भीत्या ध्वनेर्विकारः। तया व्याकुलो घोरो भयंकरो घर्घरशब्दरूपो रवः शब्दो यस्यां क्रियायाम् । स्फारीभवन्ति लोचनानि यस्यां क्रियायाम् । **काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेरि** (अमर०१/६/१२) त्यमरः। **कै शब्दे** (धा०पा०९१६) कीयते इति काकुरिति क्षीरस्वामी । तथा कम्पेन प्रस्खलन्तौ[6]वङ्घ्री यस्यां क्रियायाम् । वामना तनुर्यस्यां क्रियायाम् । तथा श्वासोर्मिभिर्नुन्नाः प्रेरिता अधरा ओष्ठा यस्यां क्रियायाम् । एतानि षट् क्रियाविशेषणानि । कृष्णस्य गावः धेनवः विस्तीर्णे विकासिते[7] । भुजगस्य तद्रूपिणोऽघासुरस्य[8] । वक्त्रकुहरे[9] मुखविवरे स्थिताः । **अथ कुहरं सुषिरं विवरं बिलमि**(अमर०१/८/१)त्यमरः। अत्र भयानकरसाश्रयाणां[10] गवां कम्पनादयोऽनुभावाः[11]। शार्दूलविक्रीडितम्॥ ९ ॥

बीभत्सानुभावास्तत्र भरतः–

आननेत्रविघूर्णनलोचननासामुखाच्छादनैनैव ।
अन्यक्त[12]पादपतनैर्बीभत्सः सम्यगभिनेयः ॥

---

१ प्रकंपनेश्चैव । २ शुक्लोष्ठ० । ३ निनित्य० । ४ करचरणद्वीनां । ५ ०मितसतः । ६ प्रसवनंता० । ७ विकाशिते । ८ ०घ्रासुरस्य । ९ ०कुरह० । १० रसाश्रयणां । ११ ०नुभावः । १२ अव्यस्त० ।

सर्वाङ्गसंहारनिष्ठीवनादय ऊहनीयाः । यथा –

कपटहरेर्मुखकुहरे विकृते संवीक्ष्य दिनकरं लक्ष्मीः ।
हतदैत्यपलललकवलभ्रान्त्या मुखमंशुकैः विदधे ॥ १० ॥

आननेति । आननानि नेत्राणि च । तेषां विघूर्णनेन । तथा लोचनानां नासाया मुखस्य च च्छादनेन । तथा अव्यक्तैः[1] शुद्धै पादपतनैः । मृक्षणार्थाद्विपूर्वादञ्जेः । कर्तरि क्तः । ततो नञ् तत्पुरुषः । बीभत्सानुभावं दर्शयति–**कपटहरेरिति**[2] । लक्ष्मीः । **पद्मालया पद्मा कमलाश्रीर्हरिरमे**[3](अमर०१/१/२७)त्यमरः। कपटहरेर्नृसिंहस्य विकृते विस्तारिते मुखकुहरे[4] मुखविवरे । दिनकरं सूर्यं संवीक्ष्य दृष्ट्वा । हतो यो दैत्यो[5] हिरण्यकशिपुस्तस्य पलं मांसं तस्य यो कवलस्तस्या भ्रान्त्या । पलतीति पलम् । **पता गता** (धा०पा०८३९)वित्यस्य कवलादिषु कलप्रत्ययः । कवलशब्दो वृषादिषु ज्ञेयः । अशुंकैर्वस्त्रैर्मुखं विदधे । भागुरिमतेऽपेरकारलोपः । अत्र भ्रान्तिमदलङ्कारः । अत्र–मुखपिधानमनुभावः ॥१०॥

अद्भुतरसानुभावास्तत्र भरतः–

स्पर्शग्रहणोल्लासैर्हाहाकारैश्च साधुवादैश्च ।
वेपथुगद्गदवचनैः स्वरभैदैरभिनयस्तस्य ॥

निमेषप्रेक्षणरोमाञ्चादय[6] ऊहनीयाः । यथा–

पाण्डवं वीक्ष्य दोर्दण्डखण्डितारातिमण्डलम् ।
अद्यापि नाकिनां नेत्रे निमेषो नैव जायते* **॥ ११ ॥**

इतिश्री भानुदत्तविरचितायां रसतरङ्गिण्यां अनुभावनिरूपणं नाम तृतीयस्तरङ्गः॥३॥

स्पर्शेति । स्पर्शेन ग्रहणेनोल्लासेन च । अद्भुतचित्रादेरित्यर्थः । शेषम्[7] सुगमम् । **यथेति** । अद्भुतानुभावं दर्शयति– **पाण्डवमिति** । दोर्दण्डाभ्यां दण्डोपमबाहुभ्याम् । खण्डितं अरातिमण्डलं येन तं पाण्डवं पार्थं वीक्ष्य स्थितानामिति शेषः । तेन समानकर्तृकत्वनिर्वाहः । नाकिनां देवानां नेत्रे । जातित्वादेकवचनम् । **जात्याख्यायामि**(पा०अ०१/२/५८)ति सूत्रानुशासनात् । नयतीति नेत्रम् । औणादिकस्त्रन् ।

---

१ अव्यक्तैः। २ कपटहरिरिरिरिति । ३ श्रीर्हरिरिमित्य० । ४ सुखकुहरे । ५ दैत्योदैत्यो । ६ ०प्रेषण० । ७ शेष ।

निमेषाः नेत्रसङ्कोचाः अद्यापि नैव जाग्रति। धातूनामनेकार्थत्वाद्भवन्तीत्यर्थः॥११॥[1]

इतिश्रीमहोपाध्यायावटुश्रीआनन्दरामभट्टात्मजभगवद्भट्टविरचितायाम् रसतरङ्गिणीव्याख्यायां नूतनतरीसम्माख्यायामनुभाव-निरूपणे समाप्तस्तृतीयस्तरङ्गः॥३॥

---

१ ०नेकार्थत्वाभवन्ती०।

॥ चतुर्थस्तरङ्गः ॥

अथ सात्त्विकभावा निरूप्यन्ते। तत्र भरतः–

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः ॥ (ना०शा०६/२२)

नन्वस्य सात्त्विकत्वं कथम्, व्यभिचारित्वं न कुतः, सकलरससाधारण्यादिति चेत्। अत्र केचित्, सत्त्वं परगतदुःखभावनायामत्यन्तानुकूलत्वम्। तेन सत्त्वेन वृत्ताः सात्त्विका मता इति व्यभिचारित्वमनादृत्य सात्त्विकत्वव्यपदेश इति तन्न। निर्वेदस्मृतिधृतिप्रभृतीनामपि सात्त्विकत्वव्यपदेशापत्तेः। न च परगतदुःखभावनायामष्टावेते[1] समुत्पद्यन्ते इत्यनुकूलशब्दार्थः। अत एव सात्त्विकत्वमेषामिति वाच्यम्। निर्वेदादेरपि परदुःखभावनायामुत्पत्तेरिति। अत्रेदं प्रतिभाति। सत्त्वशब्दस्य प्राणिवाचकत्वादत्र सत्त्वं जीवच्छरीरम्। तस्य[2] धर्माः सात्त्विकाः। तथा च शारीरा भावा स्तम्भादयः सात्त्विका भावा इत्यभिधीयन्ते। स्थायिनो व्यभिचारिणश्च भावा आन्तरतया न शरीरधर्माः।

अथेति। अनुभावनिरूपणानन्तरमित्यर्थः। **स्तम्भेति**। स्पष्टम्। **नन्विति**। अस्य स्तम्भादेः। शेषं मूल एव स्पष्टम्। **अत्रेति**। सत्त्वशब्देन[3] जीवच्छरीरम्। तस्य धर्माः सात्त्विकाः स्तम्भादयः[4]। स्थायिनो[5] व्यभिचारिणश्चान्तरा इति व्यवज्ञेयाः। सत्त्वमस्त्री तु जन्तुष्विति कोशे जन्तुवाचकानुसारेणेदमुक्तम्। **रसविलासे** तु –

रजस्तमोभ्यामस्पष्टं मनः सत्त्वमिहोच्यते।
उत्पत्तयेऽस्य तद्योगात्प्रभवन्तीति सात्त्विकाः ॥ इत्युक्तम्।

शरीरधर्मत्वे सति गतिनिरोधः स्तम्भः। न च निद्रापस्मारादावतिव्याप्तिः। शरीरधर्मपदेन तेषां व्यावर्तनात्। प्रलयभावे तु चेष्टानिरोधो न तु गतिनिरोधः। अस्य विभावाः। हर्षरागभयदुःखविषादविस्मयक्रोधाः। यथा–

श्रोणीपीनतरा तनुः कृशतरा भूमीधरात्पीवरा
वक्षोजस्य तटी कुतो निजकुटी मातर्मया गम्यताम्।
इत्युद्भाव्य कदम्बकुञ्जनिकटे निर्विश्य मन्दस्मितं
गोविन्दं समुदीक्ष्य पक्ष्मलदृशा[6] स्तम्भस्तिरोधीयते[7] ॥१॥

---

१ परागत०।२ तस्या। ३ ०सब्देन। ४ स्तम्भादयाः। ५ स्थयिनो। ६ मक्ष्म०। ७ स्तम्भःस्तिरपधीयते।

तथा सति कीदृशं लक्षणमित्यपेक्षायामाह[1]– शरीरेति। **यथेति** । स्तम्भमुदाहरति– **श्रोणीति**। श्रोणि नितम्बभागः। यद्यपि **कटो ना श्रोणिफलकं कटिः श्रोणि ककुद्वती** (अमर०२/६/७४)त्यमरोक्तेः श्रोणिशब्दः कटिवाचकस्तथापि लक्षणया नितम्बो गृह्यते। वीचिः पङ्क्तिर्महीकेलिरित्याद्या ह्रस्वदीर्घयोरिति मेदिनीत्यत्रादिपदात् श्रोणि-शब्दोऽपि तथैव कृदिकारादित्यादिना विकल्पात् ङीष्। पीनतरा तनुः शरीरम्। कृशतरा। तनुधातोरौणादिकनुप्रत्ययः। विस्तरभिया सूत्रं न लिख्यते। वक्षोजस्य स्तनस्य तटी[2]। भूमिधरात्पर्वतादपि पीवरा[3] स्थूला। **तटं त्रिष्वि**(अमर०१/१०/७) त्यमरः। हे मातः। मया निजकुटी स्वगृहम्। कुतः कथम् वा गम्यताम्[4] प्राप्यताम्। सम्भावनायां लोट्। शालाविशेषवाचिना कुटीशब्देन गृहसामान्ये[5] लक्षणा इति पूर्वोक्तप्रकारेणोद्भाव्योक्ता। पक्ष्मलदृशा। कयाचिन्नायिकया[6]। कदम्बकुञ्जनिकटे। **निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदर**[7](अमर०२/३/८)इत्यमरः। निर्विश्यो[8]–पविश्य। तथा। मन्दस्मितं गोविन्दं समुदीक्ष्य दृष्ट्वा। स्तम्भः गतिनिरोधः। तिरोधीयते हेत्वन्तरप्रदर्शनेन गोप्यत इत्यर्थः। अत्र कृष्णदर्शनजन्यौ रागहर्षौ गम्यमानौ। तेन तज्जन्यः स्तम्भो नायिकाया उत्पन्न इति भावः। शार्दूल-विक्रीडितम् ॥ १ ॥

वपुषि सलिलोद्गमः स्वेद[9]ः। तस्य विभावाः मनस्तापहर्षलज्जाक्रोध-भयश्रमपीडाघातमूर्च्छाः। यथा –

कान्ते तव कुचप्रान्ते[10] राजन्ते स्वेदबिन्दवः।
हृष्यता मदनेनेव[11]* कृताः कुसुमवृष्टयः ॥ २ ॥

स्वेदलक्षणमाह–**वपुषीति**। **मन** इति। **यथेति** स्वेदं दर्शयति। **कान्त** इति। हे कान्ते तव कुचप्रान्ते[12] स्तनतटे। स्वेदबिन्दवः। हृष्यता प्रसन्नेन। मन्मथेन*। मनो मथ्नातीति मन्मथ इति **पृषोदरादित्वात्** (पा०अ०६/३/१०९)साधुः। मननं सत् तन्मथ्नातीति मन्मथ इति वा। कामेन। कृताः कुसुमवृष्टय इव राजन्ते[13] शोभन्ते[14]। अत्रोपमानोपमेयवाचकसाधारणधर्माणामुपादानात् पूर्णोपमालङ्कारः। अत्र नायिकाया गम्यमानश्रमजन्यस्वेदरूपसात्त्विकभावाभिव्यक्तिः ॥ २ ॥

विकारसमुत्थरोमोत्थानं रोमाञ्चः। अस्य विभावाःशीतालिङ्गनहर्षभयक्रोधाः।

---

१ ०मित्यपेक्षयामाह। २ तरी। ३ वीवरा। ४ ग्यतां। ५ ग्रह०। ६ कायाचिन्ना०। ७ लताभिः। ८ निविशो०। ९ खेदः। १० राजन्ति। ११ मदनैनैव। १२ कुचकान्ते। १३ राजते। १४ शोभते।

यथा–

बकुलमुकुलकोशरोषनिर्यन्मधुकरकूजितभाजिकुञ्जभूमौ ।
पुलकयति कपोलपालिमालि स्मितसुभगः कथमद्य नन्दसूनुः॥३॥

रोमाञ्चं लक्षयति– **विकारे**ति । **यथे**ति । रोमाञ्चं दर्शयति– **बकुले**ति । हे आलि सखि बकुलमुकुलानामशोककुसुमानां कोशेभ्यो मध्येभ्यो रोषेण निर्यतां मधुकराणां यानि कूजितानि तानि भजतीति तथोक्तायां कुञ्जे[1] भूमौ । **बकुलो वञ्जुलोऽशोक**[2] (अमर०२/४/६४)इत्यमरः । यद्यपि **कुड्मलो मुकुलोऽस्त्रियामि**(अमर०२/४/१६) त्यमरोक्तेर्मुकुलशब्दःकुड्मलवाचकस्तथापि लक्षणया कुसुमपरः । एवं **कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौधि**[3]**–दिव्ययोरि**(अमर०३/३/२१८)त्यमरोक्तेः । कोश–शब्दस्य कुड्मलवाचकत्वे पुनरुक्तिसम्भवेऽपि सादृश्यलक्षणया तन्मध्यभागो लक्ष्यते । स्थित इति शेषः । नन्दसूनुः अद्य कपोलपालिं कपोल[4]प्रान्तम् । कथं पुलकयति पुलकवतीकरोति । णाविष्टवद् भावान्मतुपो लुक् । अत्र सङ्केतस्थिताया गोपिकायाः स्वसखीं प्रतीयमुक्तिः । औपच्छन्दसिकं वृत्तम् । **प्रथमे तृतीये च पादे यत्र मात्राः षोडश भवन्ति तथा द्वितीये चतुर्थे पादेऽष्टादश मात्रास्तत्रौ–पच्छन्दसिकमि**(वृ०र०२/१३)ति सिद्धान्तः । लक्षणं **वृत्तरत्नाकरे** बोध्यम् ॥ ३ ॥

गद्गदत्वप्रयोजकीभूतस्वरस्वभाववैजात्यं स्वरभङ्गः । अस्य विभावाः कोधहर्षभयमदाः ।

व्यक्तिः स्यात् स्वरभेदस्य कोपादुक्तिः क्रियेत चेत् ।
इति पत्युः पुरो राधा मौनमास्थाय तिष्ठति ॥ ४ ॥

स्वरभङ्गोदाहरणम् दर्शयति–**व्यक्ति**रिति । कोपात् कोपं कृत्वा । ल्यब्लोपे पञ्चमी । उक्तिर्भाषणं चेद्यदि क्रियेत तदा स्वरभेदस्य स्वरवैजात्यस्य व्यक्तिः अभिव्यक्तिः स्यात् इति चित्ते विचार्य राधा पत्युः कृष्णस्य पुरो मौनं आधाय कृत्वा तिष्ठति । अत्र वाक्यार्थहेतुकं काव्यलिङ्गम् । अत्रान्यासङ्गिनं स्वगृहमागतं कृष्णं दृष्ट्वो–त्पन्नक्रोधाया राधिकायाः स्वरभङ्गोऽनुमीयते ॥ ४ ॥

भावत्वे सति शरीरस्पन्दो वेपथुः । भावत्वे सतीति सत्येन विशेषणदानात् । सूचकस्पन्दादौ नाऽतिव्याप्तिः। शरीरपदं चेष्टाश्रयमात्रपरम्, तेन

---

१ कुञ्जे । २ ०शोके । ३ ०धान्यर्थौद्वदी० । ४ ककपोल० ।

शरीरावयवकम्पेनाऽव्याप्तिः । अस्य विभावाः आलिङ्गनहर्षभीतयः । यथा–

कथय कथमुरोजदामहेतोर्यदुपतिरेष चिनोति*चम्पकानि ।
भवति करतले यदस्य कम्पः प्रियसखि मत्स्मृतिरेव मत्सपत्नी ॥५॥

भावत्व इति । सूचकस्पन्दो बोधकचेष्टा । वेपथुमुदाहरति–**कथये**ति । हे प्रियसखि ! एष यदुपतिः कृष्णः । चम्पकानि चम्पककुसुमानि । उरोजदामहेतोः[१] स्तनहारहेतोः कथं चिनोतु*। कथं[२] ग्रथयतु । कथय शंस । अत्र संप्रश्ने लोट् । लिङ्गर्थे लोडित्यनुशासनात् । अस्य कृष्णस्य । करतले । हस्तमध्ये[३] कम्पो वेपथुर्भवति यत् । अत्र मत्स्मृतिरेव मम स्मरणमेव मत्सपत्नी सादृश्यलक्षणयाप्रियकारिणीजातेति शेषः। अत्र कृष्ण स्य स्मृतिजो[४] हर्षजन्यःकम्परूपः सात्त्विको भाव[५]ः। औपच्छन्दसिकम्।५।

विकारप्रभवप्रकृतवर्णान्यथाभावो वैवर्ण्यम् । अस्य विभावाः मोहभयक्रोधशीततापश्रमाः । यथा–

कुक्कुटे[६] कुर्वति क्वाणमाननं श्लिष्टयोस्तयोः ।
दिवाकरकराक्रान्तशशिकान्तिमिवादधौ ॥६॥

वैवर्ण्यमुदाहरति–**कुक्कुट** इति । कुक्कुटे कृकवाकौ[७] । **कृकवाकस्ताम्रचूडः कुक्कुटश्चरणायुध**(अमर०२/५/१७)इत्यमरः । पूर्वं कुकु इति शब्दं कृत्वा कुटतीति कुक्कुट इति क्षीरस्वामी । तौदादिकस्य **कुट कौटिल्ये**(धा०पा०१३६७)इति **धातोरिगुपधे**(पा०अ०३/१/१३५)त्यादिना कः । क्वाणं शब्दं कुर्वते सति । श्लिष्टयोः परस्परालिङ्गनयोः तयोः नायिकानायकयोः । आननं मुखम् दिवाकरकरैः सूर्यकिरणैराक्रान्तः पराभूतो यः शशी तस्य कान्तिम् । **दिवाविभे** (पा०अ०३/२/२१) त्यादिना टप्रत्ययः । दिवाशब्दस्य सप्तम्यर्थत्वेऽपि सूत्रे ग्रहणसामर्थ्यात् कर्मत्वम् । तां कान्तिं आदधाविव दधारेव । इवशब्दोऽत्र भिन्नक्रमः। अत्र क्रियास्वरूपोत्प्रेक्षा । उपाददाविति पाठे तु निदर्शनेति बोध्यम् ॥६॥

विरहजनितमक्षिजलमश्रु । अस्य विभावाः हर्षामर्षधूमभय[८]शोकजृम्भाशीतनिर्मेषप्रेक्षणानि । यथा –

विसृज विसृज चित्तदुःखधारामयमुपकण्ठमुपागतो मुकुन्दः ।
इति कथयितुमश्रुबिन्दु[९]रक्ष्णोर्निपतति वक्षसि पक्ष्मलायताक्ष्याः॥७॥

---

१ स्तनहारहोतोः । २ कथ । ३ हस्तमध्यो । ४ स्मृतिजा । ५ सात्त्विकाभावः । ६ कुक्कुदे । ७ कृकेवाकौ । ८ ०धूमभभय० । ९ ०बिदु० ।

अश्रुसंज्ञं सात्त्विकभावं दर्शयति– हे चित्त ! अयं मुरारिः कृष्णः उपकण्ठम् समीप-प्रदेशमुपागतः प्राप्तः । अतः दुःखधारां खेदपरम्पराम् । विसृज विसृज[1] आभीक्ष्ण्ये तिङन्तेष्वयसंज्ञककृदन्तेषु चेति नियमात् । इति इत्थं कथयितुम् । इवेति गम्यते । तेन गम्या फलोत्प्रेक्षा । यत्र चतुर्थ्यन्तेन तुमन्तेन वा व्यञ्जकान्वयस्तत्र फलोत्प्रेक्षेति सिद्धान्तात् । पक्ष्मले गाढपक्ष्मवती आयतेऽक्षिणी यस्यास्तस्या-स्तथोक्तायाः पक्ष्मल इत्यत्र **सिध्मादित्वालुच्**[2](पा०अ०५/२/९७)। कस्याश्चित् अश्रुबिन्दुः अक्ष्णोः सकाशात् वक्षसि हृदये निपतति । औपच्छन्दसिकं वृत्तम् ॥७॥

शारीरत्वे सति चेष्टानिरोधः प्रलयः । (शारीरत्वे) सतीति[3] विशेषणान्निद्रादौ नातिव्याप्तिः । स्तम्भादयः शरीरधर्माः । तेषां साहचर्यकथनेन प्रलयोऽपि शरीरधर्म एव । तेनाऽत्र चेष्टापदेन शरीरचेष्टाभिमता । मनसस्तु कर्म भवति[4] न तु चेष्टा । अत एव[5] चेष्टाश्रयः शरीरमिति शास्त्रलक्षणम् । (अस्य विभावाः रागोत्कण्ठादयः[6]) यथा–

नो वक्त्रं नमितं धुतं न च शिरो व्यावर्तितं नो वपु-
र्वासो न श्लथमाहृतं[7] निगदितं नो वा निषेधाक्षरम् ।
शोणं नापि विलोचनं विरचितं कीडाकलाकातरं
चेतः केवलमानने मधुरिपोर्व्यापारितं राधया ॥ ८ ॥

स्तम्भेति । सहचरिता सहचरितयोः सहचरितस्यैव ग्रहणमिति न्यायात्[8] । स्तम्भादयो[9] यथा शरीरधर्माः तथा तैः सहपठितस्य प्रलयस्यापि[10] शरीरधर्मत्वमिति भावः । शास्त्रीयं तर्कशास्त्रोक्तमित्यर्थः । प्रलयाख्यं सात्त्विकभावमुदाहरति–**नो वक्त्रमिति** । राधया वक्त्रमाननं नो नमितम् । च परं शिरो न धुतम् । स्वादौ ह्रस्वश्चेति ह्रस्वत्वम् । न कम्पितम् । किञ्च वपुः शरीरं नो व्यावर्तितम् न चालितम् । तथा श्लथं शिथिलं वासो वस्त्रं नाहृतम् । गृहीत्वा सम्यक् न निवेशितमित्यर्थः । वा शब्दः समुच्चये । वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चय इत्यमरः[+] । निषिद्धानि निष्ठुराण्यक्षराणि यस्यां क्रियायां यथा तथा । न निगदितं नोक्तम् । मानदशायां यस्यां क्रियायां यथा तथा । मानदशायां निष्ठुरोक्तिसम्भवादिति भावः । किञ्च विलोचनं नेत्रं शोणं रक्तं न विरचितं न कृतम् । अपि शब्दः समुच्चये । तर्हि किं तया कृतमित्यपेक्षायामाह–

---

१ विसृजः। २ सिध्यमादित्वोलुच् । ३ सत्यंत । ४ भवति not in the text. । ५ अत एव not in the text. । ६ अस्य विभावाः----- दयः This much text is not there.। ७ माहते । ८ न्याया । ९ स्ताम्भादयो । १० प्रलस्यपि । + Not traced out in अमरकोश

मधुरिपोः कृष्णस्य आनने मुखविषये । क्रीडाकलयाकातरं दीनं चेतोऽन्तःकरणं[1] केवलं व्यापारितं[2] प्रसारितं तथा चक्षुर्व्यावर्त्तनात्तदनुमानमिति भावः । केवलः कृत्स्नः । एकश्च केवलश्चावधारित इति शाश्वतः । शार्दूलविक्रीडितम् ॥ ८ ॥

जृम्भा च नवमः सात्त्विको भाव इति प्रतिभाति । उज्जृम्भाननमुल्लस-त्कुचयुगं स्विद्यत्कपोलस्थलमित्यादि[3] शृङ्गारतिलकादौ सात्त्विकभाव-समानाधिकरण्यदर्शनात् । न च सा भावानुभाव इति विपरीतमेव किं न स्यात् । सत्यम् । अनुभावत्वे भावत्वाऽविरोधात् । पुलकादीनां तथा दृष्टत्वात् । न चाङ्गाकृष्टिनेत्रमर्दनादीनामपि भावत्वापत्तिः । तेषां भावलक्षणाभावात् । रसानुकूलो विकार इति तस्य लक्षणम् । अङ्गाकृष्ट्यादयो[4] न विकाराः किन्तु शरीरचेष्टाः । प्रत्यक्षसिद्धमेतत् । अङ्गाकृष्टिरक्षिमर्दनं[5] वा पुरुषैरिच्छया विधीयते त्यज्यते[6] च । जृम्भा च विकारादेव भवति । तन्निवृत्तौ निवर्तते च ।

आधायमानं रहसि स्थितायाः सम्भाव्य जृम्भामचलात्मजायाः
चाटुध्वनिं स्मेरमुखो महेशः कराङ्गुलीभिः कलयाञ्चकार ॥ ९ ॥

इतिश्री भानुदत्तविरचितायां रसतरङ्गिण्यां सात्त्विकभावनिरूपणं नाम चतुर्थस्तरङ्गः॥४॥

जृम्भेति । जृम्भाऽपि नवमः सात्त्विकभावः संभवति सर्वत्र तथानुभवादिति[7] भावः । **न चे**ति । सा जृम्भाभावस्य सात्त्विकभावस्य अनुभावः कार्यमिति विपरीतमेव किमर्थं न स्यादिति न वाच्यम् । निषेधे हेतुमाह-**सत्ये**ति । जृम्भाया अनुभावत्वे सत्यपि भावत्वाविरोधात् । पुलकादीनां कार्यत्वेनानुभावत्वेऽपि यथा सात्त्विकभावत्वं तथा जृम्भाया अपि अनुभावत्वे सात्त्विकभावत्वं समागतमिति भावः । न चाङ्गेति भावलक्षणे रसानुकूलो विकारो भाव इत्युक्तेरङ्गाकृष्ट्यादीनां[8] तु पुरुषैः स्वेच्छया विधीयमानत्वेन रसानुकूलविकारत्वाभावान्न भावत्वापत्तिरिति भावः । जृम्भा तु

---

१ चेतोतःकरणं । २ व्यापरितं । ३ कुञ्चत्पक्ष्म गलद्दुकूलमुदयन्नाभि भ्रमद्भ्रूलतम् ।
बालाग्राङ्गुलिबद्धबाहुपरिधिन्यञ्चद्विवृत्तत्रिकं
त्रूटयत्कञ्चुकसन्धिदर्शितलसद्दोर्मूलमुज्जृम्भते ॥
This complete verse is not given in the text.
४ अंगाकृष्यादयो । ५ अंकाकृष्टि० । ६ त्यजते । ७ तथानुभावादिति । ८ ०अङ्गाकृष्यादीनां ।

विकारादेव भवति विकारनिवृत्तौ च विरमतीति तस्या भावत्वमेव सिद्धमिति भावः। जृम्भामुदाहरति–**आधायेति**। महेशः शिवः। रहसि एकान्ते। मानमाधाय कृत्वा। स्थितायाः अचलात्मजायाः पार्वत्याः जृम्भा जृम्भणम्[1]। संभाव्य विलोक्य। स्मेरमुखः हास्यमुखः सन्। कराङ्गुलीभिः। चाटु[2] प्रियं वाक्यम् तद्युक्तो ध्वनिरिति मध्यमपदलोपी समासः। चटु चाटुप्रियं वाक्यमिति शाश्वतः। तं कलयाञ्चकार। सम्पादयामास। एतेन जृम्भापि नवमः सात्त्विकभाव इति व्यवस्थापितम्। इन्द्रवज्रावृत्तम् ॥९॥

इतिश्रीमहोपाध्यायावटुश्रीनन्दरामभट्टात्मजभगवद्भट्टविरचितायाम्
रसतरङ्गिणीव्याख्यायां नूतनतरीसमाख्यायां
सात्त्विकभावनिरूपणे चतुर्थस्तरङ्गः॥४॥

---

१ जृंपणम्। २ चटुः।

॥ पञ्चमस्तरङ्गः ॥

अथ व्यभिचारिभावा निरूप्यन्ते। तत्र भरतः—

निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदश्रमाः।
आलस्यं चैव दैन्यं च चिन्तामोहः स्मृतिर्धृतिः॥
व्रीडा चपलता हर्ष आवेगो जडता तथा।
गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च॥
सुप्तिर्विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता।
मतिर्व्याधिस्तथोन्मादस्तथा निधनमेव च॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।(ना०शा०६/१८-२१ अ)

इतस्ततो रसेषु सञ्चारित्वमनेकरसनिष्ठत्वमनेकरसव्याप्यत्वं व्यभिचारित्वम्। न च रोमाञ्चादावतिव्याप्तिः। तेषामपि संग्राह्यत्वात्। ते भावाः शारीरा व्यभिचारिणः। एते चान्तरा व्यभिचारिण इयांस्तु[1] विशेषः। ननु निर्वेदादेः स्थायित्वं व्यभिचारित्वं कथमिति चेत् न। रसपर्यन्तस्थायित्वमितस्ततो गामित्वं चोपाधिभेदमादायोभयसम्भवात्। स्वावमाननं निर्वेदः। संसारे हेयत्वबुद्धिर्वा। तत्र विभावास्तत्त्वज्ञानापत्रिहीर्षादयोऽनुभावाः स्वेदप्रकाशचिन्ताश्रुपातादयः। यथा—

क्षोणीपर्यटनं श्रमाय विदुषां वादाय विद्यार्जिता
मानध्वंसनहेतवे परिचितास्ते ते धराधीश्वराः।
विश्लेषाय सरोजसुन्दरदृशामास्ये कृता दृष्टयः
कुज्ञानेन मया प्रयागनगरे नाऽऽराधि नारायणः॥ १॥

अथेति। क्रमप्राप्तं व्यभिचारिभावनिरूपणं क्रियते इत्यर्थः। निर्वेदेति निर्वेदादयस्त्रयस्त्रिंशद्व्यभिचारिभावाः भरतोक्तकारिकायां मूले एव स्पष्टाः। इतस्ततइति। स्पष्टम्। न चेति। रोमाञ्चादावतिव्याप्तिर्नास्तीत्यर्थः। तेषां रोमाञ्चादीनां शारीरव्यभिचारित्वं निर्वेदादीनां चान्तरव्यभिचारित्वमिति सिद्धान्तादिति भावः। नन्विति। निर्वेदादेः स्थायित्वं व्यभिचारित्वं चाग्रे स्फुटीभविष्यति। एषां रसावसानपर्यन्तस्थायित्वात्तत्स्थायित्वरूपभेदकधर्ममाश्रित्य स्थायित्वम्। इतस्ततो

---

१ इत्यांस्तु।

गामित्वरूपं चाश्रित्य व्यभिचारित्वं चेति व्यवस्था बोध्या[1] । निर्वेदमुदाहरति–**क्षोणी**ति । क्षोणीपर्यटनं पृथिव्यामितस्ततो भ्रमणरूपं यत्कृतम् धनार्जनार्थमिति शेषः । तत् श्रमायैव । जातमिति शेषः । अत्र द्वयोरपि यत्तच्छब्दयोरध्याहारः क्वचिद्द्वयो[2]–रपीति **काव्यप्रकाश**कारोक्ते[3]: । द्रव्यप्राप्त्यर्थं कृतं पृथ्वीपर्यटनं व्यर्थं जातम् न तु किञ्चिल्लुब्धमिति[4] भावः। तादर्थ्ये[5] चतुर्थी । विद्या विदुषां वादाय । अर्जिता अभ्यस्ता । तैः सह वाद[6] कर्तुं न त्वात्मबोधार्थम् इति फलितार्थः । सहार्थस्य[7] घोषत्वविवक्षायां षष्ठी **तुमर्थाच्च भाववचनादि**(पा०अ०२/३/१५)ति चतुर्थी । तथा एते[8] धराधीश्वराः राजानः परिचिताः सेविता अपि मानध्वंसनहेतवे जाताः । न तु तेभ्यः किञ्चिदपि लब्धमिति[9] भावः । अत्रापि तादर्थ्ये चतुर्थी । तथा सरोजसुन्दरदृशां स्त्रीणां आस्ये मुखे कृताः व्यापारिताः दृष्टयः विश्लेषाय वियोगाय जाताः । न तु तासां समागमरूपं फलं जातमिति भावः । मुखमिति जातित्वादेकवचनम् । इति हेतोः कुज्ञानेनाल्पबुद्धिना मया प्रयागनगरे विषये नारायणो[10] विष्णुर्नाराधि । कर्मणि चिण्[11] । अत्र श्लोके **आशाधरभट्टगुरुयदुरामभट्टो**क्तो दोषोद्धारप्रकारः प्रदृश्यते[12] । तथाहि–श्रमायेति तादर्थ्यचतुर्थ्यन्तस्योद्देश्यकोटावन्वयेऽविमृष्टविधेयांशदोषापत्तिः । न हि कश्चिन्मन्दोऽपि प्रयोजनमनुद्दिश्य भूमिभ्रमणादौ प्रवर्त्तते । न च श्रम एव प्रयोजनमिति शक्यं लोके तथात्वाप्रसिद्धेः । न व्यायामे प्रसिद्धिरस्तीति वाच्यम् । तत्र मल्लादीनां बलवर्धनस्यैव प्रयोजनत्वात् । तस्माच्छमायेत्यस्य जातमित्यध्या–हृत्य विधेयेन सहान्वये दूषणं नास्तीति । धनार्जनार्थं कृतस्य तस्य[13] तदलाभे भागवते श्रमस्तस्य श्रमफल इतीत्यादिष्विव लक्षणया व्यर्थत्वस्यैव प्रतिपादनात् । विदुषां वादायेत्यस्य तूद्देश्यत्वे[14] बाधो नास्ति । मानध्वंसनहेतव इत्यत्र जाता इत्यध्याहारेण पूर्ववद्दोषोद्धारः । विदुषां मानध्वंसनहेतव इति वा योजना । परकीय–मानध्वंसनार्थं राजसेवाप्रवृत्तिदर्शनात्[15] । विश्लेषायेत्यत्रापि पूर्ववत्समाधानम् । **कुज्ञानेने**ति । नारायणाराधनलक्षणसुज्ञानरहितेन तद्भिन्नधनलाभादिफलकुत्सित[16]–ज्ञानवतेत्यर्थः । एवं च पूर्वोक्तचतुर्थ्यन्तानां वैय्यर्थ्याभावेऽपि धनादिलाभस्य तुच्छफलत्वेन[17] तद्विरक्तस्येयमुक्तिः। तेन शान्तस्थायिनो निर्वेदस्यापीदमुदाहरणमिति

---

१ बोध्य । २ क्वचित्द्वयो० । ३ ०प्रकाशकरोक्तेः। ४ किंचिल्लुध्वमिति । ५ तादर्थो । ६ वाद । ७ सहार्थास्य । ८ एत । ९ लध्वमिति । १० नारायणे । ११ कर्माणि चिण्ण । १२ प्रदृश्येते । १३ तस्या । १४ तूर्देश्यत्वे । १५ ०प्रवृत्तिर्दर्शनात् । १६ ०फलककुत्सित० । १७ तुच्छफलंत्वेन ।

यदुरामशेषैरेव समर्थितम् । इयांस्तु विशेषः–तन्मतें श्रमायेत्यत्र धनायेति विश्लेषा–येत्यत्राश्लेषायेति पाठान्तरम् कल्पनीयम् । पूर्वव्याख्याने तु धनालाभेनापज्जन्यो निर्वेदो व्यभिचारिभावः। सर्वदापज्जन्य[1]ज्ञानस्य स्थिरत्वासम्भवात् । इति व्याख्यानद्वयेन निर्वेदस्य स्थायित्वं व्यभिचारित्वं चेत्युभयमपि सिद्धमिति भावः । पूर्वव्याख्याने द्रव्यालाभजन्यापद्रूपो विभावः स्वेदप्रकाशनमनुभावो निर्वेदस्य । द्वितीये तु तत्त्वज्ञानं विभावः पश्चात्तापोऽनुभावस्तस्येत्यवधेयमिति दिक् । शार्दूल–विक्रीडितम् ॥ १ ॥

ग्लानिर्निर्बलता निःसहता वा । तत्र विभावा रत्यायासतृट्क्षुधादयः । अनुभावा मुखमलान्यादयः । यथा–

व्याहर्तुं पुनरीक्षणाय न गिरः कण्ठाद्बहिर्निःसृताः
शैषाश्लेषविधिं विधातुमपि वा नैवोन्नतादोर्लता ।
प्रातस्तल्पमपास्य गच्छति हरौ चण्डांशु चण्डातप
श्लिष्टक्लिष्टकुरङ्ग भङ्गुर रुचस्तस्या स्थिता दृष्टयः ॥२॥

ग्लानिं दर्शयति–**व्याहर्तुमिति** । हरौ कृष्णे । प्रातः । **तल्पं शय्याट्ट–दारेष्वि**(अमर०३/३/१३१)त्यमरः । अपास्य[2] त्यक्त्वा गच्छति सति । तस्याः राधिकायाः गिरो वाचः । पुनरीक्षणाय व्याहर्तुम् । पुनर्दर्शनं कदा भविष्यतीति वक्तुम् । कण्ठात् बहिर्न निःसृताः न निर्गताः । तथा शेषाश्लेषविधिम् अवशिष्टा–लिङ्गनविधिं विधातुम् कर्तुम् । दोर्लताऽपि नोन्नता । जाता इति शेषः । चण्डांशोः सूर्यस्य चण्डो दुःसहो य आतपस्तेन क्लिष्टः खिन्नः श्लिष्टः संकुचितो यः कुरङ्गो मृगस्तस्येव भङ्गुरा शिथिला दृक् यस्यास्तस्या[3] राधिकायाः दृष्टयः स्थिताः। शार्दूलविक्रीडितम् ॥ २ ॥

उत्कटकोटिकानिष्टप्रतिसन्धानेष्टहानिविचारो वा शङ्का । तत्र दुर्नयपरक्रूरतादयो[4] विभावाः । अनुभावाः कम्पक्रियाप्रच्छादनादयः । यथा–

एते चित्रविलोचना गुरुजना जिह्वाग्रदोषाः खलाः
पौराः क्रूरवचः प्रपञ्चयशसः श्वश्रूश्च चक्षुःश्रवाः ।
किं स्यादित्थमनर्थबीजमसकृत् सञ्चिन्त्य वक्षोरुहे
स्फुर्जत्किंशुकदामवामनयना निःश्वस्य विन्यस्यति ॥३॥

---

१ सर्वदापर्जन्य० । २ त्यत्क्वा । ३ यस्यास्तस्तस्या । ४ ०क्रूरतादयौ ।

शङ्कालक्षणमाह–**उत्कटे**ति । उत्कटकोटिकं प्रकटोत्कर्षम् । अनुभावाभिव्यक्त–मित्यर्थः । कोट्युत्कर्षाटनीसंख्यास्त्रिष्यित्यनेकार्थ हैमः । तादृशं यदनिष्ट–प्रतिसन्धानम् अपि वाऽऽप्तिसंभावनम् शङ्का । इष्टहानिविचारो वा शङ्केति लक्षणान्तरम् । **यथे**ति शङ्कामुदाहरति– एत इति । एते गुरुजनाः श्वशुरादयः । चित्रमेव विलोचनम् नेत्रं येषां ते तथोक्ताः । स्वबुद्ध्या परवृत्तान्तज्ञा इत्यर्थः । खलाः दुर्जनाः जिह्वाग्रदोषाः दोषमात्रवादिन इत्यर्थः । पौरा नगरवर्त्तिनो जनाः । क्रूराणां वचसां प्रपञ्चेण विस्तरेण यशो येषां ते तथोक्ताः परमर्मोद्घाटनेन[1] प्रसिद्धा इत्यर्थः । तथा श्वश्रूः श्वशुरस्य[2] पत्नी । श्वशुरस्योकाराकारलोपश्चेति पुंयोगलक्षणं ङीषंबाधित्वोङ्प्रत्ययः । चक्षुःश्रवाः फणिरूपा वर्तते । **कुण्डली गूढपाच्चक्षुश्रवाः काकोदरःफणी**(अमर०१/८/७)त्यमरः। किञ्चित् शुक इवेति किंशुकइति क्षीरस्वामी। वस्तुतस्तु किं शुक इति संशयः किंशुकः सुप्सुबिति समासः । सोऽस्मिन्नस्तीति मत्वर्थीयोऽच् । तेषां दामस्रजम् । निःश्वस्य विन्यस्यति । आरोपयति । अत्र दुर्जनपरकौर्यादयो विभावाः । किंशुकदामधारणेन नखक्षतप्रच्छादनमनुभावः । शार्दूलविक्रीडितम् ॥ ३ ॥

परोत्कर्षासहिष्णुता परानिष्टचिकीर्षा वाऽसूया । तत्र विभावा मन्युदौर्जन्यादयः । अनुभावाः कोपचेष्टादोषोद्भावनादयः । (यथा)–

हरशिरसि मयाप्यलब्धवासे निवसति काऽपि कला तुषारभानोः
इति लिखति विधुंतुदस्य मूर्तिं प्रतिभवनं प्रतिभूधरं भवानी ॥ ४ ॥

असूयां दर्शयति–**हरशिरसी**ति । भवानी पार्वती । मयापि प्रेम्णा[3] शरीरार्धहरयापि अलब्धवासे अप्राप्तनिवासे । हरशिरसि शिवमस्तके । तुषारभानोश्चन्द्रस्य काऽप्येका कला । कलास्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके । षोडशांशेऽपि चन्द्रस्येति विश्वः। निवसतीति विष्टतीति विचिन्त्य । प्रतिभवनं गृहं गृहं प्रति । तथा प्रतिभूधरम् भूधरं भूधरं प्रति । उभयत्रापि वीप्सायामव्ययीभावः । विधुंतुदस्य[4] राहोः । **तमस्तु राहुः स्वर्भानुःसैंहिकेयो विधुंतुद**(अमर०१/३/२६) इत्यमरः । मूर्तिं आकृतिं लिखति । अत्र भवानीनिष्ठाया असूयायाश्चन्द्रोत्कर्षदर्शनजन्योमन्युर्विभावः[5] । कोपेन राहुलेखन–चेष्टानुभावः । औपच्छन्दसिकं वृत्तम् ॥ ४ ॥

---

१ परमर्मोदघाटनेन । २ शूरस्य । ३ प्रेमणा । ४ विदितुन्दस्य । ५ असूयाश्चन्द्रो० ।

हर्षोत्कर्षो मदः । दुःखासम्भिन्नसुखानुभव उत्कर्षः । तत्र विभाव[1]ः पानम् अनुभावा उत्तमानां निद्रा, मध्यमानां हसितम्, अधमानां रोदनम् । इन्द्रिय-सम्मोहो निद्रा । तस्मादिन्द्रियसम्मोहनयनघूर्णनसाम्येन निद्रेव निद्रा । न च हर्षे व्यभिचारिभावेऽतिव्याप्तिः । तत्र हर्षमात्रस्य सत्त्वात् । ननु तत्रोत्कर्षनिष्ठो जातिविशेषः । किञ्च मनोमोहः अत्र च मनः प्रसाद इति स्वरूपभेदात् । तत्र निद्रारोदनादयोऽत्र पुलकादयोऽनुभावा इत्यनुभाव-भेदाच्च । ननु तिष्ठ तिष्ठ क्षणं मूढ मधु यावत्पिबाम्यहमित्यादौ मदो वीररसेऽपि दृष्टोऽस्ति तत्र निद्रारोदनं वा कथमनुभावो न हि निद्राति रोदिति वा संयति योध इति चेत्सत्यम् । रसभेदेनाऽनुभावभेदः । शृङ्गारे तेऽनुभावाः । वीरे च नयनारुण्यचमत्कारादयः । सामान्ये च मदे नयनघूर्णनवचनस्खलनादयश्चेति । यथा–

रसना रसयत्यसौ मधु स्वयमस्माकमनर्थकं जनुः ।
इति तत्र समस्तमिन्द्रियं प्रतिबिम्बस्य मिषेण मज्जति ॥ ५ ॥

मदलक्षणमाह–**हर्षोत्कर्ष** इति वचनस्खलनादिपर्यन्तं मूले स्पष्टम् । **यथेति** । मदोदाहरणं रसनेति[2]। समस्तम्[3] इन्द्रियम् । तत्तदिन्द्रियाधिष्ठितं चक्षुर्गोलकादिक-मित्यर्थः । इन्द्रस्यात्मनो लिङ्गं ज्ञापकमिन्द्रियम् । **इन्द्रियलिङ्गे**(पा०अ०५/२/९३) त्यादिसूत्रेण साधुः। कर्तृ । तथा । असौ रसना जिह्वा स्वयम् । मधु रसयति स्वयं मद्यमास्वादयतीत्यर्थः । किं चास्माकं जनु[4]र्जन्म । अनर्थकम् व्यर्थम् । मधुस्वादानु-पलब्धे[5]रिति भावः। इति भाव्य । तत्र मधुनि विषये । प्रतिबिम्बस्य मिषेण व्याजात् । मज्जति किमिति गम्यते तेन गम्योत्प्रेक्षा । अन्यथा कथं तथा सति तद्व्यापाराभावः। अत्र मधुपानं विभावः । समस्तेन्द्रियव्यापाराभावोऽनुभावः । आभ्यां मदोऽवगम्यते । वैतालीयं छन्दः ॥ ५ ॥

आयासप्रभवः पराभवः श्रमः । तस्य विभावा रत्यध्वगत्यादयः । अनुभावाः स्वेदादयः यथा–

स रामचन्द्रः सह निर्गतायाः स्वेदाम्बुसंसिक्तपयोधरायाः ।
अपाङ्गभङ्गै*र्मिथिलात्मजायाः श्रमानशेषान् शिथिलीचकार ॥ ६ ॥

---

१ विभावाः। २ रसनेति सनेति । ३ ०मस्तं । ४ ज्यनु० । ५ ०स्वादानुपलब्धे० ।

श्रममुदाहरति– **स रामेति** । स रामचन्द्रः । सह निर्गतायाः अर्थात्स्वेन[1] सहेत्यर्थः । स्वेदाम्बुभिः प्रस्वेदजलैः । संसक्तौ पयोधरौ यस्यास्तस्याः मिथिलात्मजायाः जनकात्मजायाः। सुह्मादयः दयः शब्दो जनपदवचनात्[2] क्षत्रियमाचक्षत इति भाष्यान्मिथिलोपलक्षितजनपदस्वामी[3] । जनकक्षत्रियो बोध्यः । मिथिलाशब्दस्य[4] जनपदवाचकत्व तु–

येन लिङ्गेन यो देशो युक्तः समभिलक्ष्यते[5] ।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिण ॥

इति **महाभारत**वचनादवगन्तव्यम् । यद्वा जनकात्मजाया इति पाठान्तरम् । तस्या अशेषान् श्रमान् अपाङ्गपातैः* सादरावलोकनैः[6] । शिथिलीचकार अपनुनोद । अत्र सीताश्रयस्य श्रमस्य अध्वगतिर्विभावः स्वेदाम्बुप्रादुर्भावोऽनुभावः । उपेन्द्रवज्रा–वृत्तम् ॥ ६ ॥

उत्थानाद्यक्षमत्वमालस्यम् । विभावा गर्भादयोऽनुभावाः क्रियाकातर्यादयो[7] यथा–

हरं हरन्तं स्तनहारयष्टिं करेण रोद्धुं न शशाक तावत् ।
गिरेः सुता गर्भवती विहस्य दृगञ्चलं कातरयाञ्चकार ॥ ७ ॥

आलस्यमुदाहरति– **हरमिति** । गर्भवती । गिरेः सुता पार्वती । स्तनयोर्विषये हारयष्टिं हारावलीम् । हरन्तं गृह्णन्तम् । हरं शिवम् । करेण रोद्धुम् । हस्तेन रोधनं कर्तुम् । तावन्न शशाक । समर्था नाभूदित्यर्थः । किन्तु दृगञ्चलं नेत्रप्रान्तान् । कातर–याञ्चकार । अत्र गर्भधारणं विभावः । अवलोकनक्रियाकातर्यमनुभावः । तेन पार्वतीनिष्ठमालस्यमवगम्यते । कस्मिंश्चित्कल्पे गणपतिर्देवीगर्भादुत्पन्न इति **गणपतिपुराणे** उत्तरखण्डे वर्णनमवगन्तव्यम् । उपेन्द्रवज्रावृत्तम् ॥ ७ ॥

दुरवस्था[8] दुःस्वातिरेको वा दैन्यम् । अनौज्ज्वल्यमिति केचित् तन्न[9] , तस्य बहिर्मुखत्वेन तदनुमापकत्वात् । विभावा विरहदारिद्र्यादयः । अनुभावाः कायक्लेशक्षुत्पीडादयो यथा तातचरणानाम्–

अंसे कुन्तलमालिका स्तनतटोत्सङ्गे लवङ्गस्रजो*
माद्यन्मन्मथकुञ्जरेन्ददशनप्रान्ते विलग्नं मनः।

---

१ अथात्स्वेन० । २ ०वचनाः। ३ भाष्यन्मि । ४ शिथिला० ५ ०लक्ष्येते । ६ सादरावालोकनैः। ७ क्रियाकापंपर्यादयो । ८ दरवस्य । ९ कंचितन्न ।

किञ्चान्यद्विरहानलेन सरसं संदह्यमानं वपु-
र्गण्डे पाण्डिमकैतवेन[1] सुतनोः फेनोच्चयं मुञ्चति ॥ ८ ॥

दैन्यमाह-**अंस** इति । सुतनोः कस्याश्चिन्नायिकायाः । अंसे स्कन्धे । **स्कन्धो भुजः शिरोंऽसोऽस्त्री**[2](अमर०२/६/७८)त्यमरः । अस्यते भरेणेति अंस इति क्षीरस्वामी । कुन्तलानां चिकुराणाम् । **चिकुरः कुन्तलो बाल** (अमर०२/६/९५)इत्यमरः । कुन्ताकारं लातीति कुन्तल इति स्वामी । तेषां मालिका परम्परा । विभक्ति-विपरिणामेन लग्नेति योज्यम् । तथा स्तनतटे । नेत्राम्भसां निम्नगा* नदी लग्नास्ति । मनश्चेतः । माद्यन् मन्दीभूतो[3] यो मन्मथः कामः स एव कुञ्जरेन्द्रः करीन्द्रस्तद्दशन[4]-प्रान्ते दन्तप्रदेशे लग्नम् । किञ्चान्यदपि । तस्याः सरसं कोमलं वपुः विरहानलेन वियोगाग्निना । दह्यमानं सत् । गण्डे कपोले । जातित्वादेकवचनम् । **गण्डौ कपोलावि**(अमर०२/६/९०)त्यमरः । गण्डति संहत्यते इति गण्ड इति स्वामी । पाण्डिमकैतवेन पाण्डुत्वव्याजेन । फेनोच्चयं फेनसमूहम् मुञ्चति । अत्र नायिका-निष्ठदैन्यस्य स्वस्वामीविरहो विभावः । पाण्डिमादयोऽनुभावाः । कैतवा-पह्नुतिरलङ्कारः । शार्दूलविक्रीडितम् ॥ ८ ॥

चिन्ता ध्यानम् । ध्यै चिन्तायामित्यनुशासनात् । ध्यानं च न स्मरणा-त्मकम् । स्मृतिभावस्याग्रे पृथक्त्वेन निरूपणात् । किन्तु चित्तैकाग्रता । इष्टानाप्ति[5]प्रभृतयो विभावाः। अनुभावास्तापवैवर्ण्यबाष्पश्वासादयः। यथा-

शम्भुं ध्यायसि शैलराजतनये किन्नाम जानीमहे
तस्यैवाक्षितनूनपादिव[6] तनौ तापः समुन्मीलति।
अक्ष्णोरश्रुमिषेण गच्छति बहिर्गङ्गातरङ्गावलिः ।
पाण्डिम्नः कपटेन चन्द्रकलिकाकान्तिः समुज्जृम्भते ॥९॥

चिन्तामुदाहरति- **शम्भुमिति** । हे शैलराजतनये त्वं किं नाम ध्यायसि चिन्तयसि । वयं तु शम्भुं ध्यायसीति जानीमहे । कुत इत्यपेक्षायामाह-तव तनौ शरीरे । तस्य शिवस्य । अक्षितनूनपादिव नेत्राग्निरिव[7] । ताप इव ज्वर इव समुन्मीलति प्रतिभाति । अत्रैवकार इवशब्दश्च भिन्नक्रमः । किञ्च अक्ष्णोः चक्षुर्भ्या[8]मित्यर्थः । अपादानस्यापि शेषत्वविवक्षायां षष्ठी । गङ्गातरङ्गावलिः । अश्रुमिषेण अश्रुव्याजेन । बहिर्गच्छति

---

१ पाडिम०। २ शिरोंशो । ३ मन्तीभूतो । ४ ०तदशन० । ५ इष्टानाधि०। ६ ०तनूयादिव । ७ नेत्राग्निरेव । ८ चक्षुर्भ्या० ।

किञ्च चन्द्रस्य कलैव कलिकाकलेत्यर्थः स्वार्थे कन् । तस्याः कान्ति आभा । पाण्डिम्नः कपटेन । पाण्डुत्वव्याजेन । समुन्मीलति प्रसरति । समुज्जृम्भते इति पाठः साधीयान् । पुनरुक्तिदोषापत्तेः । नैकं पदं द्विः प्रयोज्यमिति वामनवचनात् । **काव्यप्रकाशोक्तकथितपदत्वदोषापत्तिरपि**[1](का०प्र०उ०–७) । अत्र कामदहनानन्तर पार्वत्याश्चिन्तोत्पत्तौ शिवपरिणयनरूपेष्टानवाप्तिर्विभावः । तापाश्रुपातादयोऽनुभावाः। अत्र साधारणशिवज्ञापकप्रदर्शनेन तदन्तः प्रवेशः सखिभिरनुमित इत्यनुमानालङ्कारः। तस्यापि कैतवापह्नुतिरङ्गमित्यङ्गाङ्गीभावेन सङ्करः । यद्वा हे शैलराजतनये शम्भुं ध्यायसि किं नामेति प्रश्नः अत्रोत्प्रेक्ष्यते । तस्यैव शिवस्यैव अक्षितनूनपादिव नेत्राग्निः किं तनौ तापः समुन्मीलति । अत्र विरहजन्ये तापे नेत्राग्निजन्यतापोत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥ ९ ॥

मोहो वैचित्यम् । मुह वैचित्ये (धा०पा०-११९८)इति धातोर्मोहनं मोह इति भावव्युत्पन्नो मोहशब्दः । वैचित्यं कार्याकार्यापरिच्छेदः । तस्य विभावा भीत्यावेगानुचिन्तनादयः । अनुभावास्तम्भपातघूर्णनादर्शनविस्मरणादयः ।

यथा –

अन्तस्मेरसुवर्णकेतकदलद्रोणीद्युतिद्रोहिणीं
लक्ष्मीं वीक्ष्य समुद्यदिन्दुवदनां क्षीराम्बुधेरुत्थिताम् ।
शम्भुः स्तम्भशताकुलः शतमखः कर्तव्यमूढेन्द्रियः
सोऽप्यज्ञानभुजङ्गपाशपतनो जातस्त्रिलोकीपतिः ॥१०॥

वैचित्यमिति । अपरिच्छेदोऽनियमः । मोहमाह–**अन्त** इति । शम्भुः शिवः । अन्तः स्मेरं विकसितं यत्सुवर्णकैतकं कुसुमं तस्य दलद्रोणिः क्षुद्रनौकासदृशं दलमित्यर्थैः। तस्या द्युतिः कान्तिस्तस्या द्रोहिणीम् तत्प्रतिपक्षभूताम् । तत्सदृशीमित्यर्थः । यस्य मित्रत्वेन शत्रुत्वेन वा वर्णनं तत्सादृश्ये पर्यवस्यतीति कविसम्प्रदायः । समुद्यदुदयन्य इन्दुस्तद्वदनं[3] यस्यास्ताम् । तथा क्षीराम्बुधैः[4] क्षीरसमुद्रात् । उत्थितां लक्ष्मीम् । वीक्ष्य दृष्ट्वा । स्तम्भशतेन । स्तम्भाख्यसात्त्विकभावबाहुल्येनाकुलो व्याकुलः । **शतं सहस्रं कुविदिति बहोः संज्ञेति** निघण्टौ(निघण्टु- ३/२)। निघण्टुर्नाम संग्रह इति हैमः । तथा शतमखः इन्द्रः कर्तव्यमूढेन्द्रियः । कार्यप्रतिभानशून्येन्द्रियो जात इत्यर्थः । किञ्च सोऽल्पप्रसिद्धोऽपि[5] । त्रिलोकीपतिः विष्णुः । अत्र त्रिलोकीतिलक

---

१ कामदहनोनन्तरं । २ ०लदंमित्यर्थः । ३ ०इंदुस्तद्वदनं । ४ क्षीरांबुधैः । ५ सोपप्रसिद्धोपि ।

इतिवत्समाहारद्विगुगर्भस्तत्पुरुषः । अज्ञातमविदितं भुजङ्गरूपपाशस्य पतनं मथन-कारिणां देवानां हस्तेभ्यः पातो येन स तथोक्त एतादृशो जात[1]ः । अत्र लक्ष्मीदर्शन-जन्यआवेगो विभावः। महेश्वरादीनां स्तम्भादयोऽनुभावाः। शार्दूलविक्रीडितम् ॥१०॥

संस्कारजन्यं ज्ञानं स्मृति[2]ः । तच्च प्रत्यभिज्ञानरूपं स्मरणरूपं च संस्कार-जन्यत्वेनोभयोः संग्रहः। अन्यथा प्रत्यभिज्ञायाः पृथग्भावत्वापत्तेः संस्कारो-द्बोधकाः सदृशतादृष्टचिन्तादयो विभावाः। अनुभावाः भ्रूसमुन्नयनादयः। प्रत्यभिज्ञा यथा –

कालिन्दीसरसः समेत्य नभसः कोडे परिकीडते
चकद्वन्द्वमदं सुधाकरकलामाकम्य विस्फूर्जति[*]।
चन्द्रोऽपि स्मरचापचापलचमत्कारं समालम्बते
तस्मात्सैव[3] कदम्बकुञ्जकुहरे राधा परिभ्राम्यति ॥११॥

संस्कारेति[4] । उद्बोधकसापेक्षा स्मृतिः प्रत्यभिज्ञा । संस्कारोद्बोधकनिरपेक्षं स्मरणमिति भेदः । शेषं स्पष्टम् । प्रत्यभिज्ञारूपां स्मृतिं दर्शयति । **कालिन्दी**ति । इदं चकद्वन्द्वम्[5] चक्रवाकयुगलम् । कालिन्दीसरसः यमुनाह्रदात् । समेत्य समागत्य । तथा विस्फूर्जिताम्[*] दैदीप्यमानाम् । सुधाकरकलाम्[6] चन्द्रकलामाक्रम्य लक्षीकृत्य । नभसः कोडे अन्तराले यद्यपि कोडशब्दो भुजान्तरालवाचकस्तथापि लक्षण-यान्तरालमात्रवाचकः । परिकीडते[7] विहरति । **कीडोऽनुसंपरिभ्यश्चे**(पा०अ०१/३/२१) त्यात्मनेपदम् । किञ्च चन्द्रोऽपि यतः स्मरचापस्य कामकार्मुकस्य यच्चापलं चाञ्चल्यं तस्य यश्चमत्कारस्तमालम्बते आश्रयते । तस्माद्धेतोः सा राधैव । कदम्बकुञ्जानाम् नीपलतापिहितप्रदेशानाम्[8] । **नीपप्रियककदम्बास्तु हरिप्रियः** (अमर०२/४/४२) इत्यमरः । तेषां कुहरे गह्वरे । परिभ्राम्यति । अत्र कुञ्जस्थितां राधिकां विलोक्य गाश्चारयतः कृष्णस्य तत्सौन्दर्यं प्रत्यभिज्ञोत्पत्तौ वर्णनमिदम् । तत्र रोमावल्यां कालिन्दी नाभौ सरः हृदये नभोऽन्तरालम् स्तनयोश्चक्रवाकौ मुं[9]खे सुधाकर भ्रुवोः स्मरचापम् चाध्यवसितमिति रूपकातिशयोक्तिः । अत्र राधिकास्तनमुखादिसदृशानां चक्रवाकचन्द्रादीनां स्मरणं विभावः आक्षिप्तं-भ्रूचालनादिकमनुभावः । शार्दूलविक्रीडितम् ॥११॥

---

१ जाताः । २ मृतिः। ३ स्मात्सैव । ४ ०निरपेक्षे । ५ चक्रवायुगलम् । ६ सुधाकरकलम् । ७ विरहति । ८ हलिप्रियेत्यमरः । ९ मुमुखे ।

स्मृतिर्यथा–

वदनाम्बुजलग्नदृङ्निपाते मयि बध्नत्यवतंसमंसमूले।
दरकुञ्चितदृष्टि राधिकायाः स्मितकिर्मीरितमाननं स्मरामि ॥१२॥

स्मृतिमुदाहरति–**वदनाम्बुजमिति** । वदनाम्बुजे राधिकाया मुखकमले लग्नः दृक्निपातो यस्य तस्मिन्मयि । अंसमूले[1] जत्रुणि । **स्कन्धो भुजशिरोंऽस्त्री सन्धी तस्यैव जत्रुणी**(अमर०२/६/७८)इत्यमरः। तसिः सौत्रौधातुभूषणार्थस्तेनावतंसोऽपीति क्षीरस्वामी। बध्नति निवेशयति सति। राधिकायाः दरमीषत् कुञ्चिता दृष्टिर्यस्मिन्। **दरोऽस्त्रियां भये श्वभ्रे**[2] (अमर०३/३/१८४) इत्यमरः। दरस्त्वीषदर्थेऽव्ययम् देश्यं पदं वेति क्षीरस्वामी। तथा स्मितेन किर्मीरितं चित्रितम्। **चित्रं किर्मीरकल्भाषशबलैताश्च कर्बुर**(अमर १/५/१७) इत्यमरः। कीर्यते किमीर इति क्षीरस्वामी। निपातनात्साधुः। आननं स्मरामि। अत्र संस्कारजज्ञानरूपायाः स्मृतेरुद्बोधकनिरपेक्षस्मरणं विभावः। तद्वर्णनमनुभावः। रसविलासे तु प्रत्यभिज्ञास्मरणयोरवैलक्षण्यात् स्मृतेरेकमेवोदाहरणमिति दिक्। औपच्छन्दसिकं वृत्तम् ॥१२॥

धृतिः सन्तोषो दुःखेऽप्यदुःखबुद्धिर्वा। विभावा ज्ञानशक्त्यादयोऽनुभावा अन्यग्रभावादयो यथा–

भूषा भस्मरजांसि वेश्म विपिनं वृद्धो वृषो वाहनं
चैलं चर्म तथापि मन्मथरिपोर्भोगः किमु भ्रश्यति।
ईशत्वं किमु हीयते किमु महादेवेति नो गीयते
किं वा तस्य च देवदेव इति वा संज्ञा जनैस्त्यज्यते ॥१३॥

धृति दर्शयति– **भूषेति**। भस्मरजांसि भूषा अस्ति। तथा विपिनं वेश्म गृहं अस्ति। तथा वृद्धो वृषो वाहनम्। तथा चर्म गजाजिनं चैलं परिधानवस्त्रम्। तथापि एवं सत्यपि। मन्मथरिपोः शिवस्य भोगः सुखं भ्रश्यति। किमु। **भोगः सुखे स्त्र्यादिभुतावहेश्च फणकाय्योरिति विश्वः**। (अमर०३/३/२३) किञ्च। तस्य ईशत्वं[3] प्रभुत्वम्। हीयते किमु। तथा महादेवेति नो गीयते किमु। अथवा देवदेव इति संज्ञा जनैर्लोकैस्त्यज्यते किमु। अपि तु नेत्यर्थः। अत्र वर्णिनम्[4] लिङ्गिनं शिवं प्रति पार्वत्युक्तौ तदीयं तत्त्वज्ञानं विभावः। वर्णिना निन्दायां कृतायामपि अन्यग्रत्वमनुभावः। शार्दूलविक्रीडितम् ॥१३॥

---

१ असमृतेते। २ श्वभ्र ३ दति। ४ वर्णि०।

स्वच्छन्दक्रियासङ्कोचो व्रीडा । न च शङ्कायां त्रासे वातिव्याप्तिः । तत्र क्रियाविरह एव, न तु क्रियासङ्कोचः । विभावा दुराचारादयोऽनुभावाः शिरोनमननयनवदनप्रच्छादनादयः । यथा अयोध्यावर्णने–

भित्तौ भित्तौ प्रतिफलगतं भालसिन्दूरबिन्दुं
दृष्टवा दृष्टवा कमलनयना केलिदीपभ्रमेण ।
कान्ते चैलं हरति हरितं लोलमालोकयन्ती
नेत्रे प्रच्छादयति सहसा पाणिपङ्केरुहेण ॥१४॥

व्रीडामुदाहरति– **भित्ताविति**[1] । यत्रायोध्यायां कान्ते नायके[2] हरितं चैलं नीलं वस्त्रं हरति सति । कमलनयना काचिन्नायिका । भित्तौ भित्तौ । वीप्सायां द्विर्भावः । प्रतिफलगतं प्रतिबिम्बितम् । भालसिन्दूरबिन्दुं दृष्टवा दृष्टवा पौनःपुन्ये द्विर्भावः । केलिदीपभ्रमेण सुरतदीपभ्रान्त्या । लोलं चञ्चलं यथा तथा । **लोलश्चलसतृष्णयो** (अमर० ३/३/२०५) रित्यमरः । आलोकयन्ती । पाणिपङ्केरुहेण[3] हस्तकमलेन । परितः समन्तात् । अङ्गमिति शेषः । प्रच्छादयति । अत्र परस्य वस्त्ररहितस्याङ्गदर्शनजन्यो दुराचारो विभावः । शरीरप्रच्छादनमनुभावः । मन्दाक्रान्तावृत्तम् ॥१४॥

इतरदितरक्रियाकरणं क्रियायाः शीघ्रता वा चपलता । मात्सर्यद्वेषादयो विभावाः । अनुभावा वैरिदर्शनवाक्पारुष्यप्रहारादयः । यथा–

लङ्काचारिणि चापधारिणि*रणकीडाचमत्कारिणि
प्रौढानन्दवचःप्रसारिणि पुरो रामे धनुर्धुन्वति ।
जातास्तस्य दशाननस्य समरप्रारम्भदम्भस्फुरत्
केयूरक्वणिताऽनुमेयविशिखत्यागाः करश्रेणयः ॥१५॥

चपलतामाह–**लङ्केति** । लङ्कां प्रति चरतीति तथाभूते । **आक्वेस्तच्छीलतद्धर्मतत्साधुकारिष्वि**(पा०अ०३/२/१३४)ति साधुकारिणि कर्तरि णिनिः । तथा सेतुकारिणि*। अब्धौविति शेषः । सिञ्चति तमिति सेतुः । **शिञ्**[4] **बन्धने**(धा०पा०१२४९) इति धातोः **सितनिगमी**(उणादि–७२)त्याद्युणादिसूत्रेण तुन्प्रत्ययः । तथा रणकीडायाश्चमत्कार–स्तद्वति । चमत्कारो रसोद्रेकः । यद्यपि चमत्करोतीति व्युत्पत्त्या शीलार्थे णिनिः संभवति तथापि कृद्वृत्तेस्तद्धितवृत्तिर्बलीयसीति वचनात् शीघ्रोपस्थितत्वाच्च

---

१ भितावितिः । २ नायकं । ३ पाणिपंकेरुहण । ४ षिय् ।

मत्वर्थीयप्रत्ययो युक्तः । प्रौढानन्दवचांसि प्रसारयतीत्येवंशीलस्तथाभूतेः । यद्वा प्रौढान् प्रगल्भवीरान् आनन्दयति तादृशो यो वचः प्रसारयति[1] । यद्यपि न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रत्यायकः इत्याहुस्तथाप्येकदेशिन इति निर्देशात् **कृष्णसर्पवान् वल्मीक**[2](पा०म०२/१/६८) इति भाष्यप्रयोगात् हंसचिह्न-दुकूलवानित्यादिमहाकविप्रयोगाच्चैवं व्याख्यातम्[3] । एतादृशे रामे रामचन्द्रे । पुरोऽग्रे धनुश्चापं धुन्वति सति कर्षति सति । तस्य दशाननस्य रावणस्य करश्रेणयो हस्तपङ्क्तयः । श्रयन्त्येतामिति श्रेणि । भौवादिकस्य **श्रिञ्सेवायामि** (धा०पा०८१७) त्यस्य **बर्हिषी**(पा०अ० ४/४/११९)त्यादिना निप्रत्ययः । **कृदिकारादक्तिनः**(वा.) इति ङीषभावः । समरप्रारम्भेण प्रौढिनादनेन स्फुरन्ति यानि केयूराणि[4] अङ्गदानि । **केयूरमङ्गदं तुल्ये** (अमर०२/६/१०७) इत्यमरः । तेषां[5] क्वणितं शब्दितम् । तेनानुमेया अनुमातुं[6] योग्याः । विशिखत्यागा बाणमोक्षा यासां तास्तथाभूताः जाताः । **क्वणशब्दे**(धा०पा०४५०)इति धातोर्भावे निष्ठायामिट् ।अत्र रामं प्रति रावणद्वेषो विभावः । विशिखत्यागोऽनुभावः[7] । शार्दूलविक्रीडितम् ॥१५॥

चेतःप्रसादो हर्षः । प्रियदर्शनपुत्रजननादयो विभावः ।

अनुभावाः पुलकस्वेदाश्रुस्वरभेदादयः यथा –

पुलकितकुचकुम्भपालि राधा व्रजति मुकुन्दमुखेन्दुवीक्षणाय ।
विरचयति न मध्यभङ्गभीतिं गणयति नापि नितम्बगौरवाणि ॥१६॥

हर्षमुदाहरति–**पुलकिते**ति । राधा राधिका । कर्त्री । मुकुन्दमुखेन्दुवीक्षणाय । श्रीकृष्णाननचन्द्रम् वीक्षितुम् । कुचौ कुम्भाविवेत्युपमितसमासः । तयोः पालिः प्रान्तः । पुलकिता कुचकुम्भपालिर्यस्यां क्रियायां यथा तथा । व्रजति गच्छति । किञ्च मध्यस्य उदरमध्यभागस्य यो भङ्ग लक्षणया भङ्गाभिनयस्तस्य भीतिं तज्जन्यचेष्टां न विरचयति । करोतीत्यर्थः । तथा नितम्बगौरवाणि[8] । अत्र तज्जन्यचेष्टाबाहुल्याद्बहुवचनम् । न गणयति । अत्र गणयतेरकारस्य स्थानिवद्भावा़दत **उपधाया**[9](पा०अ०७/२/११६)इति सूत्रेण प्राप्ता वृद्धिर्न । उपधा-काराभावात् । अत्र दूरतः श्रीकृष्णदर्शनं विभावः । पुलकोद्गमोऽनुभावः । औपच्छन्दसिकं वृत्तम् । यत्र प्रथमे तृतीये च पादे षोडश मात्राः द्वितीये चतुर्थे च

---

१ प्रसारद्वति । २ कल्पिक । ३ व्याख्याने । ४ कूयूराणि । ५ तेषा । ६ अनुमातुर ।
७ ०त्यागोबुभावः । ८ तम्बगौरवाणि । ९ ०तदुपधाया ।

पादेऽष्टादश मात्रास्तत्रौपछन्दसिकमिति सिद्धान्तः ॥१६॥

आकस्मिकेष्टानिष्टोपपातविवर्त्तः सम्भ्रमो वाऽऽवेगः । वैरिदर्शनप्रिय-श्रवणोत्पातादयो विभावाः । अनुभावास्त्वराशरीरस्खलनविपर्यासादयो यथा–

एको वाससि विस्लथे सहचरीस्कन्धे द्वितीयः करः
पश्चाद्गच्छति चक्षुरेकमितरद्भर्तुर्मुखे भ्राम्यति ।
एकं कण्टकविद्धमस्ति चरणं निर्गन्तुमुत्कण्ठते
चान्यद्वैरिमृगीदृशां रघुपतेरालोक्य सेनाचरान् ॥१७॥

आवेगमुदाहारति– **एक** इति । रघुपते रामचन्द्रस्य । वैरिमृगीदृशां शत्रुवनितानाम् । एकः करो हस्तः । रघुपतेः सेनाचरान् रामचन्द्रसैनिकानवलोक्य दृष्टवा । विस्लथे त्वराप्रसरणेन शिथिलीभूते वाससि[1] परिधानवस्त्रे । वर्तत इति शेषः । तथा द्वितीयः करः सहचरीस्कन्धे[2] स्थितोऽस्ति । वैरिवनिताभिरेकः करो भयोद्रेकाच्छिथिलीभूते वाससि द्वितीयस्तु सौकुमार्यातिशयात्स्वतः पलायितुं सामर्थ्याभावेन सखीस्कन्ध-स्थापित इति भावः । करे विलोकनधर्मोपचारात्समानकर्तृकत्वम् । यद्वा रामसैनिकानवलोक्य स्थितानामित्यध्याहारेण योजना । वैरिमृगीदृशामित्यत्र **सापेक्षत्वेऽपि गमकत्वात्समासः**(मल्लिनाथप्रणीतसञ्जीवनी–रघु०६/२)अत्र गमक-त्वम् नित्यसापेक्षत्वम् । तथाहि– यद्यपि कस्य वैरिसाकाङ्क्षायां वैरिशब्दो रघुपतिशब्देन सह साकाङ्क्षमसमर्थवद्वाच्यमिति वार्त्तिकादसामर्थ्ये **समर्थः पदविधि**(पा०अ०२/१/१)रित्यस्याप्रवृत्तेः सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषण-योगो नेति भाष्याच्च समासो न[3] स्यात्तथापि भवति च नित्यसापेक्षस्य वृत्तिरितिभाष्योक्तेर्भविष्यति । अत्र **कैयटः**–

सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते ।
वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयत ॥ (भाष्यप्रदीप–पा० अ०२/१/१)

इति । एवम् **रतेर्गृहीतानुनयेने**(रघु०६/२)त्यादयः प्रयोगाः समाधेयाः । सविशेषणेति वचनं नित्याकाङ्क्षाविरहितस्थलविषयमित्यलम् । प्रकृते दीयतां दृष्टिः । किञ्च एकं चक्षुर्नेत्रं पश्चात्पृष्ठतो गच्छति । इतरं द्वितीयं चक्षुः भर्तुर्निजस्वामिनः मुखे

---

१ वासभि । २ ०स्कन्धो । ३ कैयकः ।

विषये भ्राम्यति । अत्रापि भयोद्रेकात्तासामेवं चेष्टा जाता इति भावः । अत्रैकस्य प्राधान्यमाश्रित्य तत्त्वव्यपदेशः । तथा–एकं चरणं कण्टकैर्विद्धमस्ति च परमन्यद्द्वितीयं चरणं निर्गन्तुमग्रे गन्तुम् उत्कण्ठते । **पदङ्घ्रिश्चरणोऽस्त्रियामि** (अमर०२/६/७१)त्यमरः । चरणे उत्कण्ठात्वारोपात् । अत्र रामचन्द्रसैनिकानवलोकनं विभावाः । पलायनत्वरा अनुभावः शार्दूलविक्रीडितम् ॥१७॥

सकलव्यवहाराक्षमज्ञानवता जडता । न च मूर्छापस्मारनिद्रासुप्तेष्वतिव्याप्तिः । तत्र ज्ञानविरहात् । न चालस्यभीतित्रासेष्वतिव्याप्तिः । तत्र कतिपयव्यवहारस्य सत्त्वात् । इष्टानिष्टदर्शनादयो विभावाः । अनुभावाः अनवभाषणनिर्निमेष प्रेक्षणेष्टानिष्टापरिच्छेदादयः । यथा–

दुष्पारवारिनिधिपारमुदारवीर्यमागच्छतो हनुमतो हसितं वितेनुः ।
उद्वीक्ष्य नीरनिधिनीरमधीरवीचि चित्रार्पिता इव पुनःकपयो बभूवुः॥१८॥

जडतामुदाहरति– **दुष्पारेति** । कपयः शाखामृगाः । **कपिप्लवङ्गप्लवग शाखामृगवलीमुखा** (अमर०२/५/३)इत्यमरः । उदारवीर्यम् यथा । दुःखेन पार्यते तीर्यते इति दुष्पारः । स चासौ वारिनिधिः । पारः समुद्रपरतीरम् । **पारावारे परार्वाची तीरे** (अमर०१/१०/८)इत्यमरः । **इदुदुपधस्य चाप्रत्ययस्ये**(पा०अ०८/३/४१)ति षत्वम् । गत्वेति शेषः । आगच्छतो हनुमतः । प्रत्यागच्छतः आञ्जनेयस्य । हसितं वितेनुः। स्वजात्युचितमिदं कर्म किम् दुःसाध्यमित्युपहासं चक्रुरित्यर्थः । पुनः पश्चात् । अधीरवीचि उल्लोलत्तरङ्गम् । नीरनिधिनीरम् पारावारपयः । उद्वीक्ष्य दृष्ट्वा । चित्रार्पिता इव बभूवुः । अत्र सिन्धुदर्शनं विभावः । गम्यमाननिर्निमेषानवभाषणादयोऽनुभावाः । अत्र सिद्धा धर्मोत्प्रेक्षा । वसन्ततिलकावृत्तम् ॥१८॥

आत्मनि सर्वाधिकत्वबुद्धिः सर्वस्मिन्नधर्मत्वबुद्धिर्वा गर्वः । बलैश्वर्याभिजनलावण्यादयो विभावाः । अनुभावा अवज्ञाभ्रूदृष्टिचेष्टित हसितपौरुषप्रकाशादयः । यथा परशुरामवाक्यम्–

निष्पीते कलशोद्भवेन जलधौ गौरीपतेर्गङ्गया
होतुं हन्त वपुर्ललाटदहने याक्तकृतः प्रक्रमः ।
तावत्तत्र मया विपक्षनगरीनारीदृगम्भोरुह–
द्वन्द्वप्रस्खलदश्रुवारिपटलैः सुष्टा पयोराशयः ॥१९॥

---

१ ०भयोप्रेकांतासा । २ तत्र तत्र । ३ उद्वीक्ष्य । ४ दुःपारेति । ५ तीयते । ६ पारावार । ७ ०प्रत्ययस्येति । ८ दुःसाध० । ९ चित्रार्पितता । १० ०र्जलाट० । ११ यावत्सतः ।

गर्वमुदाहरति– **निष्पीत** इति। कलशोद्भवेन अगस्त्येन[1]। जलधौ समुद्रे। निष्पीते चुलुकिते सति। गङ्ग्या समुद्रकान्तया नद्या। गौरीपतेः शिवस्य। ललाटदहने भालनेत्राग्नौ। हन्त इति खेदे। वपुर्निजशरीरं होतुं यावत् प्रक्रमः उपक्रमः कृतः तावत् मया तत्र विपक्षनगरीणां या नार्यः स्त्रियस्तासां यानि दृगम्भोरुहाणि नेत्राब्जानि तेषां यानि द्वन्द्वानि युगलानि तेभ्यः प्रस्खलन्ति प्रस्रवन्ति यानि अस्रवारीणि अश्रुजलानि तेषां पटलैः समूहैः कृत्वा। पयोराशयः समुद्राः सृष्टाः कृताः। सृष्टः पयोधिः पुनरिति पाठः साधुः। अन्यथा गङ्गायाः पतिबाहुल्यं स्यात्। अगस्त्यपीतनिजभर्तृसमुद्रविरहात् सहगमनं कर्तुमुद्यतायाः गङ्गायाः शत्रुबिभिता-वैधव्यापादनेन[##] तासां नेत्रजलजातपारावारनिर्माणात् पुनः सौभाग्यम् दत्तमिति भावः। शस्त्रास्त्रनिजबलं विभावः। पौरुषप्रकाशनमनुभावः[2]। शार्दूलविक्रीडितम्॥१९॥

इष्टसंशयोऽनिष्टजिज्ञासा[3] वा विषादः। इष्टपदेन जीवनधनयशशरीर-पुत्रकलत्रादय ऊहनीयाः। अपराधधनगमनादयो विभावाः। अनुभावाः उत्तमानां सहायान्वेषणोपायचिन्तादयो मध्यमानां विमनस्कता, अधमानां ध्यानधावनमुखशोषनिद्राम्वासादयः। यथा–

प्रत्यावृत्य[4] यदि व्रजामि भवनं वाचां भवेत्प्रच्यवो
निर्गच्छामि निकुञ्जमेव यदि वा को वेद किं स्यादितः।
तिष्ठाम्येव यदि क्वचिद्वनतटे किं जातमेतावता
मध्ये वर्त्म कलानिधेः समुदयो मातः किमातन्यताम्॥२०॥

विषादमुदाहरति–**प्रत्यावृत्येति**। यदि चेत् प्रत्यावृत्य परावृत्य[5]। भवनं निजगृहम्। व्रजामि गच्छामि तदा वाचां सङ्केतगिरां प्रच्यवः प्रच्युतिः। मिथ्यात्वमिति यावत् भवेत्। हेतुहेतुमद्भावाल्लिङ्। किञ्च– अहमित्यप्रयुज्यमानोऽपि भवति। **अस्मद्युत्तम**[6] (पा०अ०१/४/१०७)इति वचनात्। यदि वा निकुञ्जं प्रति निर्गच्छामि। इतो गमनात्किं स्यात्। पूर्ववल्लिङ्[7]। किञ्च यदि क्वचिदेव वनतटे वनप्रान्ते तिष्ठामि। एतावता किं जातं न किञ्चिदित्यर्थः। वर्त्मनो मध्ये इति मध्येवर्त्म[8]। **पारे मध्ये षष्ट्या वे**(पा०अ०२/१/१८)ति निपातनादलुक्समासः। कलानिधेश्चन्द्रस्य। समुदयो जात इति शेषः। हे मातः मया किमातन्यताम्। संप्रश्ने लिङ्। शङ्काऽत्र

---

१ अगस्तित। २ ०मनुभवः। ३ इष्टसंशये०। ४ वाचा। ५ चेत्स्वत्यावृत्य। ६ अस्मद्युतम। ७ ०ल्लिंग। ८ मध्येवत्मेर्त्म। ## Text is doubtful.

विभावः चिन्तानुभावः । शार्दूलविक्रीडितम् ॥२०॥

औत्सुक्यं कालासहिष्णुता सकलेन्द्रियाणामेकदैव क्रियारम्भो वा । प्रियसंस्मरणादयो विभावाः । अनुभावास्तन्द्रागात्रगौरवादयः । यथा–

आद्यः कैरपि केलिकौतुकमनोराज्यैर्द्वितीयः पुन–
र्मल्लीकेसरचारुचम्पकनवाम्भोजस्रजां गुम्फनैः ।
काञ्चीकुण्डलहारहेमवलयन्यासैस्तृतीयस्ततो
नीतः सुन्दरि वासरस्य चरमो यामः कथं यास्यति ॥२१॥

औत्सुक्ये **आद्य** इति । हे सुन्दरि सखि । आद्यो यामः प्रथमः प्रहरः । कैरपि कतिपयै[1]ः। केलिकौतुकानि च मनोराज्यानि च तैः । करणे तृतीया । नीतः । मयेति समाप्तिमिति च शेषः । नयतेर्द्विकर्मकत्वं प्रसिद्धेर्गम्यमानत्वादप्रयोगः । यद्वा निगमनार्थस्य नयतेर्न द्विकर्मकत्वमित्यपि केचित् । किञ्च द्वितीयो यामः । मल्लीनां केसराणां चारुचम्पकानां नवाम्भोजानां च याः स्रजस्तासां गुम्फनैर्ग्रथनैः यद्यपि गुम्फनानन्तरं स्रगित्युच्यते[2] तथापि पूर्वप्रसिद्ध्यनुरोधादवश्यम्भाविनि[3] भूतवदुपचार इति परिभाषया वा तद् व्यवहारः । नीतः । ततोऽनन्तरम् । काञ्ची च कुण्डले च हारश्च हेमवलयानि च तेषां न्यासैर्धारणैः तृतीयो यामो नीतः अतः परं वारस्य दिवसस्य चरमश्चतुर्थो याम[4]ः कथं केन प्रकारेण यास्यति। अत्र प्रियस्मरणं विभावः । कालाक्षमत्वमनुभावः । प्रौढोक्ता नायिका । शार्दूलविक्रीडितम् ॥२१॥

इतरदिन्द्रियमपहाय मनस्त्वचि यदा वर्तते तदा निद्रा । सुप्तस्य कारणत्वात् सुप्तात् प्राङ्निद्रा भरतेनोक्ता । स्वप्नवहनाडि[5]कायां मनो यदा वर्तते तदा स्वप्नादिसम्भवः । तत्र विभावाः प्रभावचिन्तालस्यक्लमादयः । अनुभावाः पार्श्वकरचरणनयनभ्रूचलनविभ्रमवचनस्वप्नदर्शनादयः। यथा–

गच्छन्कच्छं तपनदुहितुः पिच्छगुच्छावतंसः
पश्यन्नस्मद्वदनमसकृ[6]च्चक्षुषा कुञ्चितेन ।
स्निग्धापाङ्गः शिथिलचरणः स्तोकविस्पष्टहासः
स्वप्ने दृष्टः कमलकलिकामण्डितो मेघखण्डः ॥२२॥

निद्रामुदाहरति– **गच्छन्निति**। तपनदुहितुः सूर्यतनयायाः यमुनाया इति यावत् ।

---

१ कतियैः । २ स्रत्युच्यते । ३ ०दवश्यभाविनि । ४ कालाक्षमत्वामनुभावः । ५ स्वप्नवाहना० । ६ पश्यन्नामद्वदन० ।

कच्छं जलप्रायदेशम्। भोवादिकस्य **कचिंदीप्तिबन्धनयोरि(धा०पा०१६९)**[1]ति धातोः कचे छः। **जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविध**(अमर०२/१/१०) इत्यमरः। गच्छन्। तथा पिच्छानां[2] बर्हाणां[3] यो गुच्छः समूहः स एवावतंसो यस्य स तथोक्तः। तथास्मद्वदनम्। असकृत् पुनः। कुञ्चितेन वक्रीकृतेन। चक्षुषा नेत्रेण पश्यन्। तथा स्निग्धो मसृणः अपाङ्गो नेत्रप्रान्तो यस्य स तथोक्तः। तथा शिथिलचरणः मंथरपादन्यासः। स्तोक ईषत् विस्पष्टः प्रकाशो हासो यस्य स तथोक्तः। तथा कमलकलिकया विनोदार्थम् हस्तधृतकमलकुड्मलेन मण्डितो भूषितः ईदृशो मेघखण्डः मेघशकलसदृशः श्रीकृष्ण इत्यर्थः। स्वप्ने दृष्टः मयेति शेषः। अत्र मेघखण्डे पूर्वोक्तविशेषणविशिष्टत्वाभावात् श्रीकृष्णस्याधिक्यस्योक्तेरधिका भेदरूपकातिशयोक्तिः। प्रेमजन्या चिन्तात्र[4] विभावः। श्रीकृष्णस्य स्वप्ने दर्शनमनुभावः। मन्दाक्रान्ता वृत्तम्॥२२॥

ग्रहाद्यावेशोऽपस्मारः। तत्र विभावाः अपावित्र्य[5]शून्यस्थितिधातुवैषम्योत्कट-दुःखभयादयः। अनुभावाः कम्पफेननिःश्वासभूपतनविपर्यासजिह्वालोलना-दयः। यथा–

उद्वेलन्नवपल्लवाधररुचः पर्यस्तशाखाभुजाः
स्फूर्जत्कोरकफेनबिन्दुपटलव्याकीर्णदेहश्रियः।
भ्राम्यद्भृङ्गकलापकुन्तलजुषः[6] श्वासानिलोत्कम्पिताः
शैलं प्रेक्ष्य कपेर्निपातितमपस्मारं दधुर्भूरुहाः॥२३॥

मूर्छा चात्रैवान्तर्भवति।

अपस्मारमुदाहरति–**उद्वेलन्निति**। भूरुहाः वृक्षाः कपेः सकाशान्निपातितं निपतन्तं शैलं पर्वतम्। प्रेक्ष्य दृष्टवा। अपस्मारं व्याधिविशेषं दधुरिव। इव शब्दस्य गम्यमानत्वात् गम्योत्प्रेक्षा। कीदृशाः उद्वेलन्नन्तश्चञ्चला ये नवपल्लवास्त एवाधरा ओष्ठास्तेषां रुचो येषां ते तथाभूताः। पुनः कीदृशाः। पर्यस्ताः पुनः क्षिप्ताः शाखा एव भुजा यैस्ते तथाभूताः। स्फूर्जन्तो ये कोरकास्त एव फेनबिन्दुपटलानि येषां ते तथाभूतास्ते च ते व्याकीर्णदेहश्रियो विक्षिप्तशरीरशोभा इति विशेषणसमासः। स्फायतीति फेनः। **स्फायीङ वृद्धौ**(धा०पा०४८७)। **फेनमीनावि** (उणादि०२९०)–त्युणादिसूत्रेण फीभावो गुणश्च नक्प्रत्यये निपात्यते। तथा भ्राम्यन्तो ये भृङ्गास्तेषां

---

१ वत्व०। २ पिछाना। ३ बर्हाणा ४ चिन्तान्त०। ५ अपावित्र०। ६ ०जुषाः।

कलापाः समूहास्त एव कुन्तला अलकास्तान् जुषन्ति । सेवन्ते तथाभूताः[1] । भरति बिभर्ति वा भृङ्गः । **भृञ् धारणे** (धा०पा०१०८७)भौवादिकस्य । जौहोत्यादिकस्य भृञ्धातोर्वा **भृञः किन्नुट्चे**(उणादि०१३०)तिसूत्रेण[2] नक्प्रत्यये रूपम् । तथा श्वासा-निलोत्कम्पिताः[3]। भयमत्र विभावः। फेनकम्पादयोऽनुभावाः[4] । अत्र वृक्षेषु पुरुषधर्मा-रोपणादपस्मारोत्प्रेक्षणमविरुद्धम् । रूपकानुप्राणिता चेयम् । तेनाङ्गाङ्गिभावसङ्करः । शार्दूलविक्रीडितम् ॥२३॥

त्वचमपि विहाय मनः पुरीततीं[5] यदा वर्तते तदा सुप्तम् । निद्रा विभावः । अनुभावा नेत्रनिमीलनप्रलयश्वासोच्छ्वासादयः । यथा–

श्वासोच्छ्वासप्रचलदधरोपान्तमामीलिताक्षं
क्रीडाकुण्डे तपनदुहितुः सुप्यतः श्रीमुरारेः ।
अन्तःस्मेरं निभृतनिभृतं कापि कर्णावतंसं
काचिद्बाहोः कनकवलयं दाम मुष्णाति काचित् ॥२४॥

सुप्तमुदाहरति–**श्वासे**ति । कापि गोपी तपनदुहितुः कालिन्द्याः । क्रीडाकुण्डे श्वासोच्छ्वासेन प्रचलन्नधरोपान्तः[6] ओष्ठप्रान्तो[7] यस्यां क्रियायाम् । तथा आमीलिते ईषत्सङ्कुचिते[8] अक्षिणी नेत्रे यस्यां क्रियायाम् । तथा निभृतनिभृतं गूढं यथा तथा । कर्णावतंसम् कर्णपूरम् । मुष्णाति **हरति** । यद्यपि **पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखर**(अमर०३/३/२२७)इत्यमरवचनादवतंसपदेन गतार्थत्वे कर्णपदोपादानात् पौनरुक्त्यापत्तिस्तथापि **करिकलभकर्णावतंसादिषु प्रतिपत्तिविशेषकरेषु न दोष** (का०सूत्रवृत्ति–२/२)इति **वामन**वचनात्समाधेयमिति । तथा चोक्तम् **काव्यप्रकाशे-कर्णावतंसादिपदेकर्णादि ध्वनिनिर्मितिः संनिधानादिबोधार्थं[9] स्थितेष्वेतत् सम्मर्थनमि**(का०प्र०७/५०)ति । किञ्च कापि गोपी बाहोर्हस्तात् । अपादाने पञ्चमी । कनकवलयं हेमकटकम् । मुष्णाति । तथा काचित् । दाममालां[10] मुष्णाति । निद्राऽत्र विभावः। नेत्रमीलनश्वासोच्छ्वासादयोऽनुभावाः । अत्र स्वर०यञ्जनसमुदाययोरेकदा-ऽऽवृत्त्या छेकानुप्रासः । मन्दाक्रान्तावृत्तम् ॥२४॥

इन्द्रियाणां प्रथमः प्रकाशो विबोधः । निद्राच्छेदो विभावः । अनुभावाः अङ्गाकृष्टिजृम्भाऽक्षिमर्दनाङ्गुलीमोटनादयः[11] । यथा–

---

१ तथाभूतोः। २ किलुटच्जेतिसूत्रेण । ३ फेनकम्पादयानुभावाः। ४ ०धर्मारोपणदपस्मारो० । ५ पुरीततौ । ६ प्रचलन०। ७ उष्ट०। ८ संकुते । ९ ०बौधार्थम् । १० दाममांला । ११ ०मोठनादयः ।

राधायाः सहसा दृशा कुवलयद्रोणीदरिद्रं नभः
कुर्वन्त्याः कलकण्ठकण्ठनिनदैः साङ्केतिकैर्जाग्रतः ।
अङ्गाकृष्टिविवर्त्तमानवपुषो देवस्य कंसद्विषो
लोलापाङ्गतरङ्गभङ्गचतुरं नेत्राम्बुजं पातु वः ॥२५॥

विबोधमुदाहरति[1]– **राधाया** इति[2]। दृशा दृष्ट्या । नभोऽन्तरालम् । कुवलयद्रोण्यां विषये । दरिद्रं कुर्वन्त्याः । सुप्ताया इति यावत् । नेत्रसङ्कोचेन नेत्रान्तराला-भावादित्यर्थः । यद्वा नभो दृशा संयुक्तं कुर्वन्त्या प्रातः प्रबुद्धायाः इति यावत् । रात्रौ कमलस्य दिवा पद्मस्य सङ्कोचात् तदन्तर्वर्ति नभसो दरिद्रत्वमिति योजना । राधायाः साङ्केतिकैः सङ्केतस्थले कुञ्जे भवैः कलकण्ठानां पिकानां कण्ठनिनदास्तैः । कण्ठग्रहणं माधुर्यातिशयद्योतनार्थम्[3]। कलकण्ठः परभृतस्ताम्राक्षः कोकिल[4]ः पिकः इति हैमः । सहसा अकस्मात् । जाग्रतः अत एव अङ्गाकृष्ट्यै राधिकाङ्गाश्लेषाय विवर्त्तमानवपुषः परिवर्त्तमानस्वशरीरस्य[5] । यद्वा अङ्गानामाकृष्टिरामोटनं यस्य तथाभूतं विवर्त्तमानं वपुर्यस्येति । कंसद्विषो देवस्य श्रीकृष्णस्य । लोलौ यावपाङ्गौ नेत्रप्रान्तौ तयोस्तरङ्गभङ्गचतुरं[6] वीचिभङ्गिसुन्दरं नेत्राम्बुजम् । वो युष्माकम् पातु रक्षतु । आशिषि लोट् । निद्राविच्छेदोऽत्र विभावः । अङ्गाकृष्टिरनुभावः । अत्र कण्ठकण्ठेति द्वयोः स्वरव्यञ्जनसमुदाययोः सकृदावृत्त्या छेकानुप्रासः। गकारस्यासकृदावृत्त्या वृत्त्यनुप्रास इत्ययोः[7] संसृष्टिः । अनुस्वारबाहुल्या-न्माधुर्याख्यो गुणः । अनेकस्य व्यञ्जनस्य सकृत्सादृश्यं छेकानुप्रासः । **एकस्या-नेकस्य वा व्यञ्जनस्य द्विबहुकृत्वो वा सादृश्यं वृत्त्यनुप्रास**(का०प्र०९–वृत्ति) इति काव्यप्रकाशलक्षणात् । तथा च **किरातार्जुनीय**काव्यप्रारम्भश्लोके **वने वनेचर**[8] (किरात०१/१) इत्यत्र मल्लिनाथेन वृत्त्यनुप्रासो भवतीत्युक्तं[9] तत्र मूलम् मृग्यम्। सुप्ताया इति वक्तव्ये भङ्ग्यन्तरेण तत्कथनात्पर्यायोक्तमलङ्कारः । अङ्गाकृष्टिं प्रति निनदै[10]र्जाग्रत इति वाक्यार्थस्य हेतुत्वात्काव्यलिङ्गमलङ्कारः । इत्यनयोरर्थालङ्कारयोः पूर्वं शब्दालङ्कारयोरिव[11] तिलतन्दुलवत्संसृष्टिः । शार्दूलविक्रीडितम् ॥२५॥

पराहङ्कारप्रशमनोत्कटसमीहाऽमर्षः । विभावा अवमानाधिक्षेपादयः ।
अनुभावाः स्वेदशिरःकम्पनयनारुण्यादयः । यथा–

---

१ विवाद० । २ राधायाति । ३ ०द्योततनार्थम् । ४ कोकलः । ५ ०स्वशशरीरस्य । ६ रुयोस्त । ७ इत्यतयोः। ८ वनेवनेवनेचर । ९ भवतीत्यक्तम् । १० ०निनंदे । ११ शब्दालकारयोरिव ।

अद्याज्ञा नैव भर्तुः सरसिजनयनासूनुसेनासमेतं
बद्ध्वा[1] लाङ्गूलमूले दशमुखमभितो भूतले भ्रामयामः ।
शश्वन्मार्गावलोकप्रचलनयनया सीतया साकमेतां
लङ्कामुत्पाट्य[2] किंवा रघुपतिचरणाम्भोजयोर्योजयामः[3] ॥२६॥

अमर्षमुदाहरति– **अद्येति** । भर्तुः रामचन्द्रस्य अद्य आज्ञा नैव अस्ति । अन्यथा । सरसिजनयनाः स्त्रियः सूनवः पुत्राः सेनाचरा तैः समेतम् सहितम् । सपरिवारमिति यावत् । दशमुखं रावणं लाङ्गूलमूले पुच्छमूले बद्धवा । अभितः समन्तात् । भूतले विषये भ्रामयामः वयमिति शेषः । मवत इति मूलम् । **म्वादिकस्य[4] मव बन्धने[5]**(धा०पा०५९९) इति धातोर्**मूशक्यबिभ्यःक्लः**(उणादि०५५८) इत्युणादि–सूत्रेण क्लप्रत्यये रूपम् । किञ्च । अथवा शश्वन्नित्यं मार्गावलोकेन राममार्गनिरीक्षणेन प्रचले चञ्चले नयने यस्यास्तया सीतया साकं एताम् लङ्काम् । एनामित्यपरपाठः । अन्वादेशलक्षणस्याप्रवृत्तेः उत्पाट्य उन्मूल्य । रघुपतिचरणाम्भोजयोः । रामचरण–कमलयोर्विषये योजयामः । सीताहरणजन्यावमाननात्र विभावः स्वप्रौढि–प्रकाशनमनुभावः । सहोक्तिरलङ्कारः । स्रग्धरावृत्तम् ॥२६॥

आकार[6]व्यवहारसंगोपनमवहित्थम् । विभावाः व्रीडाधाष्ट्यं[7] कौटिल्य–गौरवादयः। अनुभावाः अन्यथाकरणाऽन्यथाप्रेक्षणाऽन्यथाकथनादः । यथा–

त्यक्त्वा सद्म विभीषणः स गतवान् बद्धः स पाथोनिधिः
किञ्च कुध्यति सोऽपि सारणिरतः सीता परित्यज्यताम्[8] ।
इत्याकर्ण्य सुहृद्गणस्य वचनं स्मेराननो[9] रावणो
मुक्तादाम करेण कण्ठसविधे कीरस्य विन्यस्यति ॥२७॥

अवहित्थमुदाहरति– **त्यक्त्वेति** । स विभीषणः सद्म गृहम् । त्यक्त्वा गतवान् । कर्मणोऽविवक्षितत्वादत्राप्रयोगः । तथा स पाथोनिधिः समुद्रः बद्धः । किञ्च स सारणिरपि सारणाख्यमन्त्रिपुत्रोऽपि क्रुध्यति तुभ्यमिति शेषः । अतो हेतोः सीता परित्यज्यताम् । अनिष्टपरिहारार्थमिति भावः। इतीत्थं य(सुहृद्)गणस्येष्टजनसमूह–स्य वचनमाकर्ण्य श्रुत्वा । स्मेराननः सस्मितवदनः रावणः। मुक्तादाम मौक्तिकस्रजं करेण कीरस्य पञ्जरस्थशुकस्य । कण्ठसविधे कण्ठसमीपे । विन्यस्यति । सीतां मुञ्चे–

---

१ वध्वा । २ ०मुत्पाद्य । ३ रघुपतिवारणोभोजयो० । ४ भौवादिकस्य । ५ मृङ्बन्धन । ६ अकार०। ७ कौटिल्ये । ८ परित्यज्यंता । ९ स्मेरानतो ।

त्यादिवाक्यश्रवणजन्यविकारं गोपयितुं शुकालापकौतुकं दर्शयितुं सहसा रावणेन तत्कण्ठे मुक्ताहारविन्यासः कृतः इति भावः। औद्धत्यं विभावः । हितश्रवणानादरोऽनुभावः। अनेकवाक्यार्थहेतुकं काव्यलिङ्गम् । शार्दूलविक्रीडितम् ॥२७॥

उग्रता निर्दयता । विभावा अपराधदोषकीर्तनचौर्यदौर्जन्यादयः अनुभावास्तर्जनताडनादयः । यथा–

कोदण्डं रणभिन्नभूपतिभुजादण्डैः प्रचण्डैः कृतं
तत्र ज्या प्रतिपक्षराजरमणीवेणीगुणैर्गुम्फिता[1]।
क्रूराकारकुठारतारपतनप्रभ्रष्टदुष्टद्विप–
त्रुट्यद्दन्तदलैः कृतोऽस्ति विशिखस्तल्लक्ष्यमुद्वीक्ष्यते ॥२८॥

उग्रतामुदाहरति–**कोदण्डमिति** । प्रचण्डैः प्रोढैः रणे भिन्ना ये भूपतिभुजादण्डास्तैः कृत्वा कोदण्डं कार्मुकं कृतमस्ति । **धनुश्चापौ[2] धन्वशरासनकोदण्ड[3]कार्मुकमि–**(अमर०२/८/८३)त्यमरः । तत्र कार्मुकम् । प्रतिपक्षाः । शत्रुभूता ये राजानस्तेषां या रमण्यस्तासां ये वेणीगुणाः केशपाशसूत्राणि । तैर्ज्या मौर्वी[4] गुम्फिता रचिता । **मौर्वी[5]ज्या शिञ्जिनी[6] गुण**(अमर०२/८/८५) इत्यमरः । तथा मया क्रूराकारो यः कुठारस्तस्य[7] तारं तीक्ष्णं यत्पतनं तेन प्रभ्रष्टा ये दुष्टद्विपास्तेषां त्रुट्यन्ति यानि दन्तदलानि[8]। विशिखो बाणः **कृतोऽस्ति** । तत्तस्माद्धेतोर्लक्ष्यं शरव्यम् । उद्वीक्ष्यते । जमदग्निवधापराधोऽत्र विभावः । तर्ज्जनोक्तिरनुभावः । परशुरामोक्तिरियम् । लक्षोद्वीक्षणं प्रत्यनेकवाक्यार्थस्य हेतुत्वात्काव्यलिङ्ग[9]मलङ्कारः। शार्दूलविक्रीडितम् ॥२८॥

यथार्थज्ञानं मतिः । तत्र विभाव[10]ाः शास्त्रचिन्तनादयः । अनुभावाः शिष्योपदेशभ्रूक्षेपकरचालनचातुर्यादयः । यथा–

लाटीनेत्रपुटीपयोधरघटीकीडाकुटीदोस्तटी
पाटीरद्रुम[11]वर्णनेन कविभिर्मूढैर्दिनं नीयते ।
गोविन्देति जनार्दनेति जगतां[12] नाथेति कृष्णेति च
व्याहारैः समयस्तदेकमनसां पुंसां परिक्रामति ॥२९॥

मतिमुदाहरति–**लाटीति** । मूढैः कविभिः । केति कवते कूयते वा इति कविः। **कु शब्दे अदादिकः**।(धा०पा०१०४२)**कुङ् अव्यक्ते शब्दे भ्वादिकः**।(धा०पा०९५१)अनयोर–

---

१ वेणीर्णैर्गुम्फिता । २ धनुश्चोपो । ३ कोदण्डं० । ४ वीमौवी । ५ मौर्वा । ६ संञ्जिनी । ७ यानिं । ८ दतलानि । ९ हेतुत्वाकाव्यलिङ्ग० । १० तत्रविर्भावाः । ११ पाटीवदुम । १२ जगता ।

न्यतरस्य इत्युणादिसूत्रेणेत्प्रत्यये रूपम् । लाट्यः लाटदेशोद्भवा[1] नार्यः । **टिड्ढाणे-त्यादिना ङीप्** (पा०अ०४/१/१५)। तत्समबन्धिनीनां नेत्रपुटीनां तथा पयोधरघटीनां[2] क्रीडाकुटीनां दोस्तटीनां पाटीरद्रुमस्य च वर्णनेन । दिनं अहः नीयते । पुट्यादिषु[3] जातिवाचित्वात् ङीष् । तस्मिन्नीश्वरे एकमविच्छिन्नं मनो येषां तथोक्तानां पुंसां भक्तानामित्यर्थः । अत्रैकशब्दः केवलवाची । तथा च मेदिनीकोशः एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽल्पे सङ्ख्यायां च प्रयुज्यत इति ॥ अत्रैकशब्दस्य तद्वार्थविशेषणत्वं स्यात्[4] । **पूर्वकालैके** (पा०अ०२/१/४९) त्यादिना तत्पुरुषे तत्पूर्वे निपातत्वात्तैः। गोविन्देत्यादिनाम्नां व्याहारैरुच्चारणैः । **अत्र दूरात्सम्बोधनाभावात् दूराद्धूते चे**(पा०अ०८/२/८४)ति प्लुता भावसन्धिः । यद्वा प्लुत्वेऽपीति शब्दस्यानार्षत्वादप्लुतवदुपस्थित इत्यस्य प्रवृत्तिरिति । समयः कालः। **समयाः शपथाचार कालसिद्धान्तसंविद** (अमर०३/४/१४९)इत्यमरः । परिक्रामति परिवर्तते । **क्रमः परस्मैपदेष्विति** (पा०अ०७/३/७६)दीर्घः । अत्र शास्त्राध्ययन-सत्सङ्गादिकं विभावः । सरासारविचारणमनुभावः । अत्र दण्डिमते विरोधालङ्कारः । टकारस्यासकृदावृत्त्या वृत्त्यनुप्रासश्च । शार्दूलविक्रीडितम् ॥२९॥

नयविनयानुनयोपदेशोपालम्भा[5] अत्रैवान्तर्भवन्ति । उपदेशो यथा–

वसु प्रदेयं खलतोऽवधेयं मनो निधेयं चरणे हरस्य ।
निजं[6] विधेयं कृतिभिर्विधेयं विधेर्विधेयं[7] विधिरेव वेत्ति[8] ॥३०॥

नयेति नयादयश्चत्वारोऽत्रैवान्तर्भवन्तीत्यर्थः[9] । उपदेशमुदाहरति– वसु इति[10] । कृतिभिः कुशलैः वसु धनम् । वसु तोये धनमणाविति वैजयन्ती । प्रदेयम् । पात्रेभ्यः इति शेषः । किञ्च–खलतः दुर्जनात् । पञ्चम्यर्थे तसिल् । अवधानतया स्थेयम् । भयादिति शेषः। तथा मनः स्वान्तम् । **स्वान्तं हृन्मानसं मन**(अमर०१/४/३१) इत्यमरः । हरस्य शिवस्य । चरणे निधेयम् । तथा निजं विधेयम् स्वकीयं कार्यम् विधेयं कर्त्तव्यम् । विधेर्ब्रह्मणो विधेयं कार्यम् । विधिरेव ब्रह्मैव । वेत्ति वेद । **विदो लटो वे-**(पा०अ०३/४/८३)ति विकल्पाल्लिङभावः। यद्यपि कथितपदं दोषस्तथापि विषय-भेदेन समाधेयम्। पूर्वश्लोकोक्तौ विभावानुभावावत्रापि ज्ञेयौ। उपेन्द्रवज्रा जत-जास्ततो गाविति(वृ०र०३/२९) लक्षणात् ॥३०॥

---

१ लाटंदैशोद्भवा । २ ०घटीना । ३ तथोक्काना । ४ तस्यात् । ५ विनयानुयो० । ६ निज ।
७ विधेर्विधेयं is not there. । ८ वत्ति । ९ नयादयादय० । १० वसुमिति ।

उपालम्भो द्विविधः । प्रणयात्मा कोपात्मा च । प्रणयात्मा यथा–

पाषाणे यदि मार्दवं यदि पयोधारा हुताशोदरे[1]
व्यालीनां वदने सुधा यदि रवेर्गर्भे हिमानी यदि ।
स्थेमा किञ्च समीरणे यदि तदा स्वप्ने भवेत्सत्यता
किन्नाम स्मरभूमिपालभगवन् कोधान्मुधा धावसि ॥३१॥

उपालम्भो द्विविधः । प्रणयात्मा कोपात्मा च । तत्र प्रणयात्मा[2] यथापाषाणे[3] इति । पाषाणे मार्दवं यदि । स्यादिति शेषः । तथा हुताशोदरे वह्निमध्ये । पयोधारा[4] जलधारा यदि । तथा व्यालीनां सर्पिणीनाम् । जातिवाचित्वान्ङीष् । **आशीविषो**[5] **विषधरश्चकी व्यालः सरीसृप**(अमर०१/८/७)इत्यमरः। वदने मुखे सुधा अमृतं यदि। तथा रवेः सूर्यस्य गर्भे मध्ये हिमानी । [महर्धिमं] **हिमानी हिमसंहतिरि** (अमर०१/३/१८)त्यमरः । **इन्द्रवरुणे** (पा०अ०४/१/४९)त्यादिना ङीषानुगागमश्च । यदि स्यात् । किञ्च समीरणे वायौ । यदि स्थेमा स्थैर्यम् । **पृथ्वादि–मनि** (पा०अ०५/१/१२२) **प्रियस्थिरे**....(पा०अ०६/४/१५७)त्यादिना स्थिरस्य स्थादेशः । तदा स्वप्ने सत्यता भवेत् । हे भगवन् स्मरभूमिपाल कामदेव । कोधात्[6] । मुधा व्यर्थं धावसि । किमिति प्रश्ने । नामेति सम्भावनायाम् । कुत्साप्रश्नवितर्केषु क्षेपे किं शब्द उच्यत इति शाश्वतः । तस्मात् स्वप्नदृष्टां प्रियतमां स्मरन् ते मां प्रति तव प्रसरण[7]मयुक्तमिति भावः । **काव्यप्रकाश**मतेऽतिशयोक्तिरियम् । **कुवलयानन्द**मते तु सम्भावनमलङ्कारः। शार्दूलविक्रीडितम् ॥३१॥

कोपात्मा अमर्ष एवान्तर्भवति । यथा–

जनयसि जगदेव देवदेवाभरण सुधारसशीतलं हिमांशो ।
उरसि वहसि मे तथापि तापं यदुपतिवक्त्रसखासि किं ब्रवीमि ॥३२॥

कोपात्मोपालम्भो यथा–जनयसीति । हे देवदेवस्याभरण । हे हिमांशो चन्द्र । त्वमिति भावः । जगद्विश्वम् । सुधारसेनामृतरसेन शीतलम् । **तृतीया तत्कृतार्थेन गुणवचनेने** (पा०अ०२/१/३०)ति तत्पुरुषः । एतादृशं जनयस्येव । तथापि मे मम उरसि हृदि तापम् विरहज्वरलक्षणं वहसि[8] । करोषीत्यर्थः। नेत्रान्तर्भवतीत्यर्थोऽयम्[9] । यतस्त्वं यदुपतिवक्त्रं कृष्णमुखम्[10]। तस्य सखा असि। अतः किं ब्रवीमि ।

---

१ हुतोशोऽदरे । २ प्रणयात्म । ३ ०पाषाणा । ४ पयोधरे । ५ आशीविशो । ६ कोत् । ७ प्रसरेण । ८ नेत्रांतर्भवितण्यर्थोयं । ९ यतत्वं । १० कृष्णमुख । [ ] Unreadable text.

प्रतीयमानकृष्णमुखसादृश्येन तन्मित्रे[1] त्वयि परुषोक्तिर्न घटते किन्तू[2]-पालम्भमात्रमिति भावः । अत्र प्रतीयमानस्य चन्द्रोपमेयत्वस्य सत्त्वात् प्रतीपालङ्कारः। अत्र जगत् शैत्यंकरस्य तापकरत्व[3]वर्णनेन विभावनाभेदः । औपच्छन्दसिकं वृत्तम् ॥३२॥

ज्वरादिविकारो व्याधिः । कुपितधातुभयकामक्लेशादयो विभावाः । अनुभावाः दशोपद्रवाः । यथा–

दातुं स्वीयमनर्घ्य[4] दीधितिपदं तस्याः कुरङ्गीदृशः
केयूरं कनकाङ्गुलीयकमिवानेतुं[5] बहिर्गच्छति ।
अन्यत्कृष्ण निवेदयामि किमितो वेणीमिषात्कालियो
दृष्टवा लोचनवारि कालियसरोभ्रान्त्या परिभ्राम्यति ॥३३॥

एवं मतिप्रभेदानुक्त्वा व्याधि[6]मुदाहरति– **दातुमिति** । तस्याः कुरङ्गीदृशः मृगीदृशः । अनर्घ्यदीधिति[7]अतिशयितकिरणम् । दीधिति[8]षूपचयते । भानुः करो मरीचिः । **स्त्रीपुंसयो दीधितिः स्त्रियामि**(अमर०१/३/३३)त्यमरः । केयूरं कर्तृ । स्वीयं पदं निजं बाहुरूपं स्थानम्[9] । **पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वि**[10] (अमर०३/३/९३) त्यमरः । दातुम् कनकस्य[11] सुवर्णस्याङ्गुलीयकमूर्मिकाम् । **केयूरमङ्गदं तुल्ये अङ्गुलीयकमूर्मिकेत्युभयत्राप्य**(अमर०२/६/१०७)मरः। आनेतुमिव[12] बहिर्गच्छति । गलतीत्यर्थः । यद्यपि इवेन सह नित्यसमासो भवितुमर्हति तथाप्युद्वाहुरिव वामन (रघु०१/३)इत्यादिष्विव सामर्थ्याभावान्नभवति । फलोत्प्रेक्षेयम् । हे कृष्ण इतोऽस्मात्काश्र्य[13]र्यादन्यत्परमधिकम् । कष्टमिति । शेषः । किं निवेदयामि । **अन्यारादिना**(पा०अ०२/३/२९) पञ्चमी । यतः लोचनवारि रोदनोत्पन्नमश्रुजलं दृष्ट्वा । कालियो नागविशेषः कालियसरोभ्रान्त्या ।कालिय सर इति तस्य ह्रदस्य लोकप्रसिद्धाभिधानानुवादः। वेणीमिषात्केशपाशव्याजात् । परिभ्राम्यति[14] प्रचलति । विरहज्वरोऽत्र विभावः । रोदनकेशप्रसारशरीरशैथिल्यादयोऽनुभावाः। अत्र वेणीत्य-पह्नुत्य[15] कालियत्वाभिधानात् वेणीप्रचलने तत्परिसर्पणसम्भावनाच्च सापह्नवा-क्रियास्वरूपोत्प्रेक्षा[16]। कालियस्य निजह्रदभ्रमाभिधानात् भ्रान्तिमदलङ्कारश्चेति संक्षेपः।

---

१ तन्मित्रा । २ किंत्वू । ३ तायकरत्व । ४ अनर्घ० । ५ ०मिवोनेतुं । ६ त्याधि०। ७ अनर्घदीधिति । ८ दीधित०। ९ स्यान । १० पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुवस्तुष्वि । ११ कनस्य । १२ आनेसुमिव । १३ ०काश्र्या० । १४ परिभ्रामत्ति । १५ अपहुत्य । १६ ०स्वरूपीत्प्रेक्षा ।

शार्दूलविक्रीडितम् ॥३३॥

विना विचारमाचार उन्मादः । न चागम्यागमनेऽतिव्याप्तिः । विना विचारमिति पदेन तद्व्यावर्तनात् । तत्र सुखमुद्देश्यं तदंशे विचार एव किया न समीचीनेत्यन्यदेतत्[1]। अन्यप्रेक्ष्यकारिता उन्माद इति यस्य मतं तत्रेदं[2] दूषणम् । तत्र विभावाः[3] प्रियवियोगविभवभ्रंशादयः । अनुभावाः वृथालपितवृथाहसितवृथारोदनादयः । यथा–

नैषा कापि चकास्ति काञ्चनलता सैवास्ति मे राधिका
पृष्टा चेन्न कुतोऽपि जल्पति तदा सम्मूर्च्छिता वर्तते ।
इत्थं हन्त विचिन्त्य सिञ्चति मुहुर्नीरैरधीरैर्दृशो
वातं वा तनुते करेण भुजयोराधाय सम्भाषते ॥३४॥

उन्मादमुदाहरति–**नैषेति** । एषा काप्यन्या[4] काञ्चनलता सुवर्णवल्ली । न चकास्ति । किन्तु मे मदीया सैवानुभूता राधिका अस्ति । कुतोऽपि कारणात् । पृष्टा सती चेद्यदि न जल्पति । न भाषणं करोति । तदा सम्मूर्च्छिता वर्तते । हन्त[5] इति विस्मये । इत्थं विचिन्त्य । हरिरिति प्रकरणात् गम्यते । दृशोः नेत्रयोरधीरैर्बहुलैरित्यर्थः । नीरैः अश्रुभिः सिञ्चति । स्वमिति कर्मणो गम्यमानत्वादयोगः । किञ्च वा शब्दः समुच्चये वा । <u>स्याद्विकल्पोपमेयोरिवार्थेऽपि समुच्चय इत्यमरः</u>[+] । करेण कृत्वा वातं नुते । वीजयतीत्यर्थः । तथा भुजयोर्मध्ये आधाय संश्लिष्येत्यर्थः । सम्भाषते सम्बोधयति । राधावियुक्तकृष्णस्योन्मादाऽवस्थावर्णनं दूत्या राधिकासमीपे कृतमित्यवधेयम् । राधिकावियोगोऽत्र विभावः। वृथालपितरोदनादयोऽनुभावाः।शार्दूलविक्रीडितम्॥३४॥

प्राणनिष्क्रमणं निधनम् । विभावानुभावौ स्पष्टौ । यथा–

पर्यस्ताङ्घ्रिविकीर्णबाहुपतितः[6] संग्रामभूमौ[7] भिया
लङ्केशस्य न केशपाशमनिलः स्प्रष्टुं समाकाङ्क्षति ।
उष्णं नोष्णकरः करं किरति वा वक्त्रारविन्देन वा
स्वे स्वे धाम्नि मिथः कथामपि सुराः प्रव्यक्तमातन्वते ॥३५॥

निधनमुदाहरति–**पर्यस्तामिति** । संग्रामभूमौ रणांगणे । पर्यस्ताङ्घ्रि विक्षिप्तचरणम् । **अङ्घ्र्यादयश्चेः**(उणादि०५६१)त्युणादिसूत्रेण निपातनात् साधुः । विकीर्णबाहु यथा ।

---

१ त्यनदेतत् । २ तंत्रेदं । ३ विभाः । ४ काप्यनिया । ५ हत । ६ ०चिकिर्ण० । ७ ०पवतः०।

+ Not traced out in अमरकोश

पततो लङ्केशस्य रावणस्य केशपाशं स्प्रष्टुमनिलो[1] भिया भयेन[2] हेतुना न समाकाङ्क्षति। नेच्छति। पदार्थहेतुकम् काव्यलिङ्गम्[3]। तथोष्णकरः सूर्यः। तस्य वक्त्रारविन्दे मुखकमले। उष्णकरं किरणं न किरति न विक्षिपति। किञ्च। अपिश्चार्थे। **अपिः पदार्थे** (पा०अ०१/४/९६)त्यादिसूत्रे तथा दर्शनात्। स्वे स्वे धाम्नि स्थिताः सुराःदेवाः प्रव्यक्तं प्रकटं यथा कथामातन्वते। मृतोऽयं जीवति वेत्यन्योन्यं वार्तां कुर्वन्ति। वस्तुतस्तु न व्यक्तमातन्वते इति पाठः साधु। तत्पक्षे कथामपि व्यक्तमातन्वते इत्यन्वयः। रामास्त्रप्रहारो विभावः। क्षितौ पतनकरचरणादिप्रसारणादिकमनुभावः। शार्दूलविक्रीडितम् ॥३५॥

मनोविक्षोभस्त्रासः। तथा च विचारोत्थ मनःक्षोभोभीतिराकस्मिकमनःक्षोभस्त्रास इति विक्षोभेनैव द्वयोरप्येकत्वेनोपसङ्ग्रहः[4]। तत्र विभावाः घोरस्वनश्रवणघोरसत्वदर्शनादयः। अनुभावाः स्तम्भस्वरभेदरोमाञ्चस्रस्तगात्रतापादयः। यथा–

श्रुण्वानो हरिनाम रामवदनादिन्द्रस्य शङ्कां वहन्
कुर्वन् कातरमान्तरं स भगवान्मैनाकभूमीधरः[5]।
कुञ्चत्पक्षति[6] भुग्नितश्रुतिकृतप्रत्यङ्गचोलावृति
व्यक्तव्याहृति[7] सिन्धुपङ्कुहरे निर्मङ्क्तुमाकाङ्क्षति ॥३६॥

त्रासमुदाहरति–**श्रुण्वान** इति। रामवदनात् प्रसङ्गात् उच्चरितं हरिनाम विष्णुनाम कपिनाम श्रुण्वानः। अत एवेन्द्रशङ्का वहन् धायन्। हरिशब्दस्यानेकार्थत्वादिति भावः। अत एवान्तरं मानसं कातरं दीनं कुर्वन्। पक्षच्छेदभयादिति भावः। एतादृशो भगवान् मैनाकभूमिधरः[8] मैनाकाख्यपर्वतविशेषः। कुञ्चत्पक्षति सङ्कुचितपक्षमूले। **पक्षमूलं तु पक्षतिरि**(अमर०२/५/३६)त्यमरः। भुग्निते वक्रीकृते श्रुती यस्यां क्रियायां यथा[9] तथा। तथाकृतप्रत्यङ्गचोलावृतिः। कृतप्रत्यङ्गवस्त्राच्छादनं यथा। तथा त्यक्ता व्याहृतयो यस्यां क्रियायां सिन्धोः समुद्रस्य पङ्कयुक्तं[10] यत्कुहरं मध्ये गर्त्तस्तस्मिन्विषये निर्मङ्क्तुं[11] बुडितुम्। आकाङ्क्षति इच्छति। हरिशब्दश्रवणमत्र विभावः। पक्षतिसङ्कोचादयोऽनुभावाः। वाक्यार्थहेतुकं काव्यलिङ्गम्। शार्दूलविक्रीडितम्॥३६॥

विचारो वितर्कः। विभावा विप्रतिपत्तिसंशयसाधकमानसमुद्भावनादयः।

---

१ स्पष्टम०। २ भयेत। ३ काव्यलिङ्ग। ४ ०नोपग्रहः। ५ मोनाक० ६ कुञ्चत्यक्षति।
७ ०व्याहति। ८ मैनाकधरः। ९ तथा। १० र्पकयुक्तं। ११ निर्मुक्तुं।

अनुभावाः शिरःकम्पभ्रूचालनादयः[1] । वितर्कश्चतुर्विधः[2] विचारात्मा संशयात्मा अनध्यवसायात्मा विप्रतिपत्त्यात्मा चेति । अनध्यवसाय उत्कटकोटिकः संशयः । प्रत्येकमुदाहरणानि[3] ।

कालिन्दीविलुठत्कठोरकमठक्रूरं धनुः शाम्भवं
रामो बालमृणालकोमलवपुर्वंशोऽवतंसो भुवः[4] ।
व्याहारप्रखलाः खलाः क्षितिभृतां गोष्ठीगरिष्ठा पुन-
स्तस्मात्केवलमेष तिष्ठति मम श्रेयस्करो भास्करः॥३७॥

सौन्दर्यस्य मनोभवेन गणनालेखा किमेका कृता
लावण्यस्य विलोकितुं त्रिजगतामेषा किमुद्‌भ्रीविका ।
आनन्दद्रुमकन्दलीनयनयोः किंवा समुज्जृम्भते
राधायाः किमु वा स्वभावसुभगा रोमालिरुन्मीलति ॥३८॥

कथय कथय केयं स्वप्ननं खेलयन्ती[5]
विहरति यमुनायाः पाथसि स्वर्णवल्ली ।
अयमुदयति को वा शारदः शीतभानु-
स्तदुपरि तिमिराणामेष को वा विवर्त्तः ॥३९॥

इयं न विलसत्सुधाकरकलाऽधिका[6] राधिका
करं किरणमालिनः किमु सहेत तस्या वपुः ।
न वा कनकमञ्जरी वहति स्वञ्जरीटं यत-
स्ततः स्मरमदालसा कथय केयमुन्मीलति ॥४०॥

वितर्कं[7] निरूपयति । स चतुर्धा । तद्भेदा मूले एव स्पष्टाः । क्रमेणोदाहरणानि । आद्यो यथा **कालिन्दी**ति । शम्भोरिदं शाम्भवम् । धनुः कार्मुकम् । तस्येदमित्यण् प्रत्ययः । कालिन्द्यां यमुनायाम् विलुठन् । कठोरो यः कमठः कूर्मस्तद्वत्क्रूरं भयङ्करम् । अत्र कालिन्दीशब्देन कालियह्रदो विवक्षितस्तत्र हि स्थिता जन्तवस्सोभरिशापेन हिंसकप्रवेशाभावाच्चिरञ्जीविनो भवन्ति । तेन तत्रत्यानां कमठानामतिकाठिन्य-द्योतनार्थं कालिन्दीग्रहणम् । तथा रामः । बालमृणालवत् कोमलवपुर्वर्त्तत इति शेषः। सूर्यवंशः भुवः पृथिव्याः अवतंसम् आभरणम्। खलाः दुर्जनाः। व्याहारे[8]

---

१ शिरकम्पभ्रूक्लनादयः । २ कितर्कश्चविधः । ३ ०मुदाहरणामि । ४ मृणाकालमलवपु० ।
५ लेखयंती ६ सुधाकरलाधिका०। ७ तर्कं । ८ व्याहारै ।

भाषणे प्रखलाः[1] । रलयोरैक्यात्प्रखरा इत्यर्थः । **व्याहार उक्तिर्लपितं भाषितं**[2] **वचनं वच**(अमर०१/६/१)इत्यमरः। तथा क्षितिभृतां राज्ञाम् । गोष्ठी वार्ता । गरिष्ठातिगुर्वी[3] । मानभङ्गभयादित्यर्थः[4] । तस्मान्मम पुनः[5] । मम तु। केवलं भास्कर एव श्रेयस्करः। रामवंशमूलपुरुषत्वात् । मुदाऽऽराधितत्वाच्चेति भावः । रामे धनुर्भङ्गं कर्त्तुमुद्युक्ते सति विश्वामित्रोक्तिरियम् । महः श्रेयस्कर इति पाठे तु महसा धनुः सारशोषणहेतु-भूतेन श्रेयस्करत्वं बोध्यम् । अत्र धनुर्भङ्गनिश्चयो[6] विभावः । आक्षिप्ताः शिरः-कम्पादयोऽनुभावाः । अनेकवाक्यार्थहेतुको[7] समुच्चयश्च । शार्दूलविक्रीडितम् ॥३७॥ द्वितीयः संशयात्मा यथा – **सौन्दर्यमिति** । मनोभवेन[8] कामेन सौन्दर्यस्य लावण्यस्य । एषा राधोदरे दृश्यमाना[9] एका गणनार्थम् । लेखा कृता किम् । सौन्दर्यमेकमत्रास्तीति परिगणनार्थमेका[10] कामेन कृतेति भावः । किञ्च विलोकितुं सामान्यतो द्रष्टुम् । त्रिजगतां त्रिलोकानां लावण्यस्य[11] सौन्दर्यस्य । उद्ग्रीविका उन्नमितोर्ध्वीकृता या ग्रीवा सैवोद्ग्रीविका । स्वार्थे कन् । **प्रत्ययस्थात्कादि**नाकारस्येकारः (पा०अ०७/३/४४) । एषा किमु अस्तीति शेषः । तथा नेत्रयोः सम्बन्धिनी । आनन्दद्रुमस्य कन्दली[12] कन्दप्ररोहः । कन्दोऽस्ति अस्या इत्यस्त्यर्थे सिद्धादित्वा-ल्लच् । किंवा समुज्जृम्भते विकसति । अथवा राधायाः स्वभावसुभगा स्वतः सुन्दरी । रोमालिः रोमावली । अयं शब्दो विलग्नमध्यस्थरोमपङ्क्तौ रूढः उन्मीलति । किन्नु[13] पूर्वत्र भास्करः श्रेयस्करः इति विचारः । अत्र तु अनेकस्योल्लेखान्निश्चयाभावे संशय इति भेदः । **कुवलयानन्द**मते उल्लेखालङ्कारः । **काव्यप्रकाश**मते तु रूपकमिति विवेक इति दिक् । विभावानुभावौ पूर्ववत् । शार्दूलविक्रीडितम् ॥३८॥ अनध्यवसायोऽनिश्चयस्तं तृतीयं तर्कभेदमुदाहरति– **कथयेति** । खञ्जनं खञ्जरीटम् । **खञ्जरीटस्तु खञ्जन** (अमर०२/५/१५)इत्यमरः । खेलयन्ती रमयन्ती इयं का वर्तते । कथय कथय[14] । भृशार्थे द्विर्भावः । किञ्च यमुनायाः पाथसि जले । पाथोऽम्भोऽर्णोपयोऽम्बु चेति शाश्वतः । केयं स्वर्णवल्लिः सुवर्णलतिका विहरति[15] क्रीडति । तथा अयं प्रवर्त्तको[16] वा शारदः । शरदि भवस्तत् सम्बन्धी । शीतभानुः हिमांशुरुदयति[17] । अयतेरात्मनेपदस्यानित्यत्वात् परस्मैपदम् । यद्वा

---

१ रलयोरैक्यात् । २ भाषणं । ३ गरिष्ठातिगुर्व । ४ ज्ञानभंगभयदेत्यर्थः । ५ तस्मात्मम पुन ।
६ धनुभंगानिश्चयो । ७ ०वाक्यार्थहेतुफंका । ८ मनोभवनं । ९ दृस्यमाना । १० ०मेकाऐकी ।११ लावण्य ।
१२ कदली । १३ किनु । १४ कथय कय । १५ हिरति । १६ पुवर्तको । १७ हिमांशुर्दुदयति ।

इटईटी(पा०अ०८/२/२८)ति दण्डके प्रश्लिष्टस्य ईधातोरिति बोध्यम्। तथा तदुपरि चन्द्रोपरि एष तिमिराणां को वा विवर्त्तः। अन्यथा भासः। रूपान्तरमिति यावत्। अत्र खञ्जनादिशब्दैर्नेत्रादिनामध्यवसानाद्रूपकातिशयोक्तिः निश्चयाभावादनध्यवसायश्च। मालिनीवृत्तम्। **ननमययुतेयं मालिनीभोगिलोकैरितिलक्षणात्** (वृ०र०३/८७)॥३९॥ विप्रतिपत्तिर्विधेः हेतूक्तिः। सा यथा इयमिति। इयं सुधाकरस्य चन्द्रस्य। याः कलाः षोडशकलास्ताभ्य अधिका उत्कृष्टा राधिका। न विलसति। कुत इत्यपेक्षायामाह। तस्याः वपुः[1]शरीरम्। किरणमालिनः सूर्यस्य। करम् किरणम्। सहेत[2] किमु। अपि तु नेत्यर्थः। तस्माद्राधिकेयं न भवतीति[3]भावः। वा पक्षोत्तरे। कनकमञ्जरी[4]। अत्र मञ्जरी शब्दो वल्लरीवाचको लक्षणयेति बोध्यम्। यद्वा वल्लरीति पाठः। न भवति यत इयमिति शेषः। खञ्जरीटं खञ्जनं वहति[5]। चञ्जरीकमिति पाठः साधु। तथा सति सुवर्णलतायां सुगन्धाभावाद्भ्रमरस्य नित्यसम्बन्धाभावो अस्तु[6] न तथेति भावः। ततस्तस्मात्। स्मरमदेन अलसा मंथरा। न लसतीत्यलसा। स्मरमदेनाल्पं विलसतीत्यर्थः[7] अल्पार्थे नञ्। इयं पुरोवर्तिनी। का उन्मीलति। विलसति। केति प्रश्ने। त्वं कथय। अत्र चतुर्थपादवाक्यमध्ये कथयेति वाक्यान्तरप्रवेशात् गर्भिताख्यं दोषमाहुः **काव्यप्रकाश**कृतः। पूर्वार्धे काव्यलिङ्गम्। उत्तरार्धे तु रूपकातिशयोक्तिकाव्यलिङ्गयोरङ्गाङ्गीभावेन सङ्करः केयमिति सन्देहश्चेति[8] संक्षेपः। पृथ्वीवृत्तम्। **जसौजसयलावसुहयैश्च पृथ्वी गुरुरिति लक्षणात्** (वृ०र०३/९४)। इति चत्वारो वितर्कप्रकारा निरूपिताः ॥४०॥

ननु दशावस्थास्वभिलाषगुणकथाप्रलापा व्यभिचारिभावा अन्तरेणागणितास्तत् किं स्वतन्त्रा एवेति चेन्न। औत्सुक्ये अभिलाषस्य वर्णनात्मकस्मृतौ गुणकथायाः उन्मादे च प्रलापस्यान्तर्भावात्। अत्र प्रतिभाति छलमधिको व्यभिचारिभाव इति। ताम्बूलाहरणच्छलेन रभसाश्लेषोऽपि संविधित इति शृङ्गारे। रौद्रे चेन्द्रजालादयः। हास्ये च व्यपदेशाऽन्यापदेशादय इति दर्शनात्। वीरोऽपि भेदेन गणनाच्च। गुप्तक्रियासम्पादनं छलम्। विभावा अवमानप्रतिपक्षकुचेष्टादयः। अनुभावा वक्रोक्तिनिभृतस्मितनिभृतवीक्षणप्रकृतिप्रच्छादनादयः। यथा शृङ्गारे–

---

१ रपुः। २ सहेतु। ३ भवती। ४ ०मंजिरी। ५ वृहति। ६ अतु। ७ मदेनाल्पविविसतीत्यर्थः। ८ केयमिसंहश्चेति। ९ ०प्रकृतिप्रदनादभ्यः।

सङ्केतीकृतकाननं प्रविशतोरन्योन्यकौतूहला-
दन्यत्वप्रतिभानमारचयतोरन्योन्यमुत्त्रस्यतोः ।
कुञ्चत्कायमितस्ततः किसलयैरात्मानमावृण्वतो
राधामाधवयोर्निकुञ्जकुहरादुद्ग्रीविका[1] पातु[2] नः ॥४१॥

नन्विति । अभिलाषादयस्त्रयः दशसङ्ख्याका अवस्थास्तास्विति मध्यमपदलोपी समासः। तत्र प्रतीयमानास्तथा सति व्यभिचारिभावमध्ये[3] नोक्ता अतः किमेते स्वतन्त्रा भविष्यन्तीति चेन्न । तेषामौत्सुक्यादिष्वन्तर्भावात् । छलमप्यधिको व्यभिचारिभावो भवितुमर्हति शृङ्गारादिरसेषु तथा दर्शनादिति भावः । शृङ्गारे छले यथा **सङ्केतीकृतेति** । असङ्केतः सङ्केतः सम्पद्यते तथा कृतं यत्काननं तत्प्रविशतोः । अत्र काननविशेषणात्सङ्केतशब्दात् कृञयोगे च्विप्रत्ययः । काननशब्दात्तु[4] न सम्पद्यमानत्वाभावादभूततद्भावासम्भवाच्च । यतः प्राक् सिद्धं काननमुद्दिश्य सङ्केतत्वं विधीयते । विधीयमानस्यैव सम्पद्यकर्तृत्वं तस्यैवाभूततद्भावश्च सम्भवः । न तु काननरूपविशेष्यस्य तस्य प्राक् सिद्धत्वेनाभूतत्वायोगात् । सङ्केतत्वस्य च जायमानत्वेन प्राग्भूततया च तथाभवनसम्भवाच्चेति सर्वमनवद्यम् । अत्रेदमाकूतम्कृञयोगे कर्मण एव सम्पद्यकर्तृत्वं भ्वस्तिभ्यां योगे च कर्तुरिव तथात्वम् । ततः कर्मविशेषणात् कृञयोगे स्वार्थे च्विः । भ्वस्तिभ्यां योगे तु कर्त्तृविशेषणात् स्वार्थेच्विरिति निष्कर्ष इति । अन्योन्यं परस्परं यत्कौतूकं तस्मादन्यत्वप्रतिभानं आरचयतोश्चेष्टयान्योन्यं स्वस्मिन्नन्यथाबुद्धिर्यथा जायते तथा कुर्वतोरित्यर्थः । तथाऽन्योन्यम्[5] । उत्त्रस्यतोः[6] चकितयोः । तथा कुञ्चत्कायं सङ्कुचितदेहम् यथा तथा इतस्ततः । किसलयैः पल्लवैः । आत्मानम् निजदेहे आत्मादेहे धृतौ जीवे स्वभावे परमात्मनीति विश्वः । आवृण्वतो आच्छादयतोः । राधामाधवयोः निकुञ्जकुहरात् । उद्ग्रीविका[7] । ऊर्ध्वा ग्रीवा । नोऽस्माकम् । पातु । अत्रान्योन्यकौतुकं विभावः । भासादयोऽनुभावाः । शार्दूलविक्रीडितम् ॥४१॥

सङ्गमे यथा–

सप्तार्ति[8] वल्गुप्तान्कपटाम्बुराशीन्
पुरोपकण्ठे पुनरीक्षमाणः ।

---

१ ०माधवयोर्निकुंज० । २ पातुः । ३ ०भावमध्य । ४. कानशब्दा० । ५ तथान्योन्योन्यं । ६ उत्त्रसतोः । ७ उद्ग्रीविका । ८ सप्ताप्ति ।

दृशो कपीन्द्रस्य मुखे सखेद[1]–
मायोजयामास स रामचन्द्रः ॥४२॥

रौद्रे छलं दर्शयति–**सप्तातीति**[2] । पुनः मुख्यसमुद्रोलङ्घनानन्तरम् । पुरोपकण्ठे लङ्कासमीपे । अतिक्लृप्तान् । सप्तसङ्ख्यान् कपटाम्बुराशीन् मायासमुद्रान् । ईक्षमाणः[3] । स रामचन्द्रः । कपीन्द्रस्य हनुमतः । मुखे दृशौ नेत्रे । सखेदं सविषादम् यथा । आयोजयामास । अत्र मायया‌म्बुराशिनिर्माणं विभावः । तदवलोकनेन खिन्नस्य रामस्य नेत्रव्यापारोऽनुभावः । उपजातिवृत्तम् । अत्र प्रथमचतुर्थपादे इन्द्रवज्रा द्वितीयतृतीयपादे उपेन्द्रवज्राऽस्ति तेनोपजातिर्ज्ञेया ॥४२॥

सर्वाणि व्यभिचारिस्थानानि विस्तारभिया नोपदर्शितानि । आलस्योग्रत्व–जुगुप्सासम्भोगे[4] वर्ज्याः । विप्रलम्भे आलस्यग्लानिनिर्वेदश्रमशङ्कानिद्रौ–त्सुक्यापस्मारसुप्तविबोधोन्मादजाड्यासूया व्यभिचारिणः । हास्ये–ऽवहित्थालस्यनिद्राप्रबोधासूया व्यभिचारिणः । करुणे मोहनिर्वेददैन्य–जाड्यविषादभ्रमणापस्मारोन्मादव्याध्यालस्यस्मृतिवेपथुस्तम्भ–स्वरभेदाश्रुणि व्यभिचारिणः । रौद्रे उत्साहस्मृतिस्वेदावेगामर्षरोमाञ्च–चञ्चलस्तोग्रत्वस्वरभेदकम्पा व्यभिचारिणः । वीरे उत्साहधृतिमति–गर्वावेगामर्षोग्रतारोमाञ्चा व्यभिचारिणः । भये स्तम्भस्वेदगद्गदताश्रु–रोमाञ्चविश्रमा व्यभिचारिभावाः[1] । अन्ये च व्यभिचारिभावा रसानुकूला ऊहनीयाः । स्थायिनोऽपि व्यभिचरन्ति । हासः शृङ्गारे रतिर्हास्यकरुण–शान्तिषु[**2] । क्रोधो वीरे । भये शोकः । भयानकशृङ्गारयोर्जुगुप्सा । उत्साहविस्मयौ सर्वरसेषु व्यभिचारिणौ उत्साहो रौद्रहास्ययोरिति ।**

इतिश्री भानुदत्तविरचितायां रसतरङ्गिण्यां व्यभिचारिभावनिरूपणं
नाम पञ्चमस्तरङ्गः[6]॥५॥

---

१ सखेदल । २ सप्ताप्तीति । ३ समुद्रानक्षिमाणः । ४ ०सभोगे । ५ ०ग्नानि० ।

६ इतिश्रीमहोपाध्याया० भगवद्भट्ट वि० रसत० निनू० नामपंचमस्तरङ्गः ।

**१.....वैवर्ण्यशङ्कामोहवेगदैन्य चापलत्रासापस्मारप्रलयमूर्च्छा व्यभिचारिणः । बीभत्से–ऽपस्माररोहावेन वैवर्ण्यानि व्यभिचारिभावाः । अद्भुते स्तम्भस्वेदगदगदताश्रुरोमाञ्चविभ्रमस्मया ।..

.....This much text of रसतरङ्गिणी is dropped in the ms.

**२ भयशोकौ करुणशृङ्गारयोः ..This much text is not given in the ms.

शृङ्गारादिरसेषु त्रयस्त्रिंशद्[1]व्यभिचारिभावानां यथासम्भवं जलबुद्बुदन्यायेन स्थितिसम्भवमाह–**आलस्ये**ति। सम्भोगशृङ्गारे आलस्यौग्र्यजुगुप्सा इति त्रय एव वर्ज्याः न त्वन्ये। तेन त्रिंशतां व्यभिचारिभावानामुपयोगः। विप्रलम्भशृङ्गारे आलस्यादयस्त्रयोदश व्यभिचारिणः। हास्ये अवहित्थादय[2]ः पञ्च। करुणे मोहादयः पञ्चदश। रौद्रे उत्साहादयो दश। वीरे उत्साहादयोऽष्टौ। भये स्तम्भादयश्चतुर्दश। बीभत्सेऽपस्मारादयः षट्। अन्ये रसानुकूलाः स्वयं विचारणीया इत्यर्थः। स्थायिनोऽपीत्यादितरङ्गसमाप्तिपर्यन्तं मूले एव स्पष्टम्।

इतिश्रीमहोपाध्यायावटुजानन्दरामभट्टात्मजभगवद् भट्टविरचितायाम् रसतरङ्गिणीव्याख्यायां नूतनतरीसमाख्यायां व्यभिचारि-भावनिरूपणं नाम पञ्चमस्तरङ्गः॥५॥

---

१ त्रस्त्रिंशद्व्यभि०। २ अवहिसादयः।

॥ षष्ठस्तरङ्गः ॥

अथ रसा निरूप्यन्ते । विभावानुभावसात्त्विकव्यभिचारिभावैरुपचीयमानः स्थायिभावः परिपूर्णो[1] रस्यमानो रसः । भावविभावानुभावव्यभिचारिभावै-र्मनोविश्रामो यत्र क्रियते स वा रसः । प्रबुद्धस्थायिभाववासना रसः । प्रबोधकाः विभावानुभावसात्त्विकव्यभिचारिभावाः। न च यूनोः प्रथमानुरागेऽव्याप्तिः पूर्वानुभवाभावादिति वाच्यम् । तत्रापि जन्मान्तरीयाऽनुभवसत्त्वादिति[2] । स च रसो द्विविधः लौकिकः अलौकिकश्च । लौकिकसन्निकर्षजन्मा रसो लौकिकः । अलौकिकसन्निकर्षजन्मा रसोऽलौकिकः लौकिकः[3] सन्निकर्षः षोढा विषयगतः । संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवेतसमवायः, समवेत-(समवेत)समवायः, विशेषणविशेष्यभावश्चेति । अलौकिकसन्निकर्षो ज्ञानम् । तेषु तेषु चानुभूतेषु ज्ञानमेव तज्जन्माननुभूतेष्वपि तेषु प्राक्तनसंस्कारद्वाराज्ञानमेव प्रत्यासत्तिः[4] । अलौकिकोरसस्त्रिधा । स्वाप्निको मानोरथिक औपनायिकश्चेति । औपनायिकश्च काव्यपदपदार्थचमत्कारे नाट्ये च । परन्तु द्वयोरप्यानन्दरूपता । ननु मानोरथिको रसो न प्रसिद्ध इति चेत्सत्यम् ।

धन्यानां गिरिकन्दरे निवसतां ज्योतिः परं ध्यायता-
मानन्दाश्रुपयः पिबन्ति शकुना निश्शङ्कमङ्केशयाः[5] ।
अस्माकं तु मनोरथो परिचितप्रासादवापीतट-[6]
क्रीडाकाननकेलिकौतुकजुषामायुः परिक्षीयते[7] ॥

इत्यादि । मानोरथिकः शृङ्गारश्रवणात् शास्त्रेषु सुखस्य त्रैविध्यगणनाच्च रसेन च विना सुखाऽनुपपत्तेरिति ।

अथेत्यानन्तर्ये । रसस्वरूपमाह–विभावेत्यादि । उपचीयमानोऽभिव्यज्यमानः[8] । परि-पूर्णः स्वान्तमभिव्याप्तः । रस्यमानः स्वाद्यमानः[9] अनुभवगोचरीक्रियमाण इति यावत् । शेषम् स्पष्टम् । लक्षणस्य लक्षणान्तरादूषकत्वात्प्रकारान्तरमप्याह–

---

१ परिपूर्णे । २ ०ऽनुभाव० । ३ लौकिषः । ४ प्रत्यासंत्तिः । ५ the first two lines are not found in the text of ms. ६ परिचितप्रसाद० । ७ परिक्षीय इत्यादि । ८ ०भिव्यज्यमानः । ९ स्वाद्यमानैः ।

भावेति । भावस्य रत्यादेर्ये ते[1] विभावादयस्तैर्यत्र यस्मिन्वस्तुनि मनसो विश्रान्ति–रास्वादातिशयम् जाड्यमित्यर्थः । शेषं सुगमम् ।

ननु तर्हि नलादीनां पूर्वानुरागस्यापि विप्रलम्भत्वं कथं सङ्गच्छते इत्याशङ्क्य समाधत्ते । **न चेत्यादि** । **द्विविध** इति । लौकिकः स्वकीयः अलौकिकः परकीयः । काल्पनिक इति यावत् । प्रत्यासत्तिः[2] भोक्तृभोग्यसमवधानम् । **औपनयिकेति** । उपनयः स्वस्वस्य नाट्याद्यभेदभानम् तदुत्पन्नः । **विनयादि–**(पा०अ०५/४/१४)त्वात् ठक् । **नन्विति** । **नैषधे मनोरथेन स्वपतीकृतं नल**(नै०च–१/३९)मित्यादौ । तथा वर्णनाच्चेति[3] भावः । **शास्त्र** इति । उक्तरीत्या त्रैविध्यगणनमित्यर्थः ।

तत्र विशेषास्तत्र भरतः–

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भूतसंज्ञौ च नाट्ये चाष्टौ रसाः स्मृताः ॥ (ना०शा०६/१५)

सकलाधिदैवतं विष्णुः । स च शृङ्गारदैवतम् । तेन सकलाराध्यतया सकलाकाङ्क्षाविषयत्वेन वा प्रथमं शृङ्गारस्योपन्यासः । ननु वात्सल्यं लौल्यं भक्तिः कार्पण्यं वा कथं न रसः । आर्द्रताऽभिलाषश्रद्धास्पृहाणां[4] स्थायिभावानां[5] तत्र सत्त्वादिति चेन्न । तेषां व्यभिचारित्यात्मकत्वात् । ननु कस्य[6] रसस्य ते व्यभिचारिभावा इति चेत् सत्यम् । वात्सल्ये करुणः । लौल्ये हास्यः[7] । भक्तौ शान्तिः । कार्पण्ये हास्यः[8] । नन्वेवं परकल्पितत्वादत्र व्यभिचारित्वेनावश्यकत्वाद्धर्मिकल्पनातो धर्मकल्पनाया लघुत्वाच्च व्यभिचारिरतिरेवास्तु । किं करुणेनेति चेन्न । रतेः शोक इति शोककारण–तायां रतेरुपलक्षणत्वात् । किञ्च रतेः कस्य रसस्य व्यभिचारित्वम् । न शृङ्गारहास्यरौद्रवीराणाम् । युवमिथुनपरस्परप्रीतिहासक्रोधोत्साहानां तत्रा–भावात् । न बीभत्सस्य, जुगुप्साया तत्राभावात् । नाद्भुतस्य, तत्र विस्मय–स्यास्थिरत्वात्[9] । तस्माच्छोकस्य स्थायितया शोकस्थायिभावकः करुणा–ख्योऽतिरिक्तो[10] रस इति । ननु रतिरेवास्तु । किं हास्येनेति चेत् । स कस्यास्तु व्यभिचारी । करुणरौद्रवीरभयानकबीभत्सानां न तत्रानव–

---

१ ०र्येस्त० । २ प्रत्यासतिः । ३ वर्णानाच्चेति । ४ ०स्पृहानां । ५ स्यैस्थायिभावानां । ६ कस्यं । ७ हास्यं । ८ हास्यं । ९ विस्मयानीयतत्वा० । १० ०तिरिक्ता ।

काशात्। नादभुतस्य। सतोऽपि विस्मयस्य तत्रास्थिरत्वात्। न शृङ्गारस्य, रतेः स्थायित्वापत्तेः। परन्तु रत्या समं हासस्य साङ्कर्यम्। ननु रतिहास्ययोरसङ्कीर्णस्यास्थानाभावात् पृथक्त्वं कुतः स्यादिति चेन्न। हेतोरसाधारण्यात्[1]। असाधारण्यमत्र स्थायित्वम्। यथा रतेः साङ्कर्येऽपि स्थायिशोकादसाधारणात् करुणो भिद्यते, तथा तत्साङ्कर्येऽपि स्थायिहासभावादसाधारणात्कारणाद्धास्यो[2] भिद्यते। शान्तावप्येवमूह्यम्। न च वात्सल्यादावप्यसाधारणहेतव आर्द्रतादयः सन्ति। तथा च तेषामपि रसापत्तिरिति वाच्यम्। आर्द्रतादीनामपि रतित्वात्। तस्याश्च तत्रासाधारण्ये शृङ्गाररसत्वापत्तिः।

ननूत्साहकोधावुभयत्र[3] तस्माद्वीररौद्रयोरन्यतर[4] एक एव वर्त्ततामिति चेन्न। स्थायिभेदेन भेदात्। उत्साहवासना वीरे न तु रौद्रे। कोधवासना रौद्रे न तु वीरे। अनेन मन एव तत्र साक्षीति। यूनोः[5] परस्परं परिपूर्णः प्रमोदः शृङ्गारः। सम्यक् सम्पूर्णरतिभावो वा शृङ्गारः। यूनोरेकत्र प्रमोदस्य रतेर्वाधिक्येऽन्यत्र न्यूनताया व्यतिरेके परिपूर्तेरभावात्[6] रसाभास इति। स च द्विविधः सम्भोगो विप्रलम्भश्चेति। तत्र दर्शनस्पर्शनसंलापादिभिरितरेतरमनुभूयमानं सुखम् परस्परं संयोगेनोत्पद्यमान आनन्दो वा सम्भोगः। सम्भोगो बहिरिन्द्रियसम्बन्धः। तस्य दैवतं विष्णुः। वर्णः श्यामः। यथा—

स्तोभेन* चाटुवचनानि पराहतानि
पाणिः[7] पयोधरगतो जडतां जगाम[8]।
लक्ष्म्याः परन्तु पृथुवेपथुरेव नीवीं
विस्रंसयन्सुहृदभून्मधुसूदनस्य[9] ॥१॥

निद्राणं क्षणमुन्नमय्य वदनं कान्ते कुचान्तः स्पृशि
स्रस्तव्यस्तदुकूलदर्शितवलिप्रव्यक्तनाभिस्त्रियः।
राधाया दरधूर्णदुत्फुल्लदलद्रोणीमदद्रोहिभि-
र्दृक्कोणस्य तरङ्गितैर्विरचितो दीर्घायुरेव स्मरः[10] ॥२॥

रसविशेषानाह—शृङ्गारेति। सकलेति। श्रीकृष्णेनादृतत्वादिति भावः। सकलस्य

---

१ असाः साधारण्यमंत्रस्यायित्वम्। २ ०द्वास्यं। ३ ननूत्साहक्तोवुभयत्र। ४ ०न्यनर०। ५ यूनाः। ६ परिपूतेरभावात्। ७ पाणि। ८ जगान। ९ सहृद०। १० श्रीकृष्णेनादतत्यादिति।

लोकस्याकाङ्क्षितस्य[1] विषयत्वेन गोचरत्वेनाराध्यतयाऽऽसेव्यतया प्रथमं शृङ्गार-वर्णनमित्यर्थः । ननु कथमष्टावेव रसास्[2]तदतिरिक्तानामपि सम्भवादित्याशङ्क्य समाधत्ते । नन्विति । व्यभिचार्यात्मकत्वादिति । उक्तं च **काव्यप्रकाशे-रतिर्देवादिविषया व्यभिचारी तथाञ्जितः**[3] ।(का०प्र०४/३५-४८)भावः प्रोक्तः इति । एवं च पुत्रादिविषयं वात्सल्यमपूर्णत्वान्न रसो नापि रत्याख्यः स्थायी तस्य दम्पत्योरिव स्थैर्यस्या[4]दर्शनात् । तस्माद्वात्सल्याख्यो रतिभावः करुणस्य व्यभिचारीति सङ्क्षेपः । एवमग्रेऽपि विवेचनीये ननु सप्तैव रसाः । करु[5]णाख्यो रसो माऽस्तु । तस्य करुणस्य वात्सल्यापरनाम्ना रत्याख्यव्यभिचारिणा गतार्थत्वादि-त्याशङ्क्य समाधत्ते- **नन्वेवमिति** । परत्र शृङ्गारे क्लृप्तत्वात् स्थायित्वेना-ङ्गीकृतत्वादत्र करुणे व्यभिचारित्वेनावश्यकत्वाद्धर्मिकल्पनातः करुणरसकल्पना-पेक्षया रतिभावव्यभिचारित्वधर्मकल्पनाया लाघवादित्यर्थः । करुणस्य तथा स्वीकारे हेतुं दर्शयति- रयतेरिति** ? **रतेः शोक** इति । प्रागुक्तस्य विभावत्वस्य व्यभिचारि-त्वकल्पनया भङ्गापत्तेरिति भावः । रतेर्व्यभिचारित्वकल्पने विरोधमुद्भावयति- **किञ्चेत्यादि** करुणाख्योऽतिरिक्तो **रसो युक्त** इति पर्यन्तं मूले एव स्पष्टम् । एवमग्रे हास्यादावपि योजनीयम् । हास्ये[6] विशेषमाह-**परन्त्विति** । सङ्कर एव साङ्कर्यम् । चातुर्वर्ण्यादित्वात्स्वार्थे घञ्[7] । **नन्विति** । **शान्तावप्येवमिति**पर्यन्तं स्पष्टम् । ननु वीररौद्रयोर्विषये[8] उत्साहक्रोधयोः सत्त्वात्तयोर्मध्येऽन्यतर एवास्त्वित्याशङ्क्य समाधत्ते-**ननूत्साहेति** । रसविशेषशृङ्गारलक्षणमाह **युनोरिति** । शृङ्गारद्वैविध्य-माह-**सम्भोगेति**। आद्यो यथा **स्तम्भेनेति***। स्तम्भेन[9] जाड्येन मधुसूदनस्य कृष्णस्य[10]। चाटुवचनानि प्रियवचनानि । यद्यपि चटु चाटुप्रियं वाक्यमित्यभिधानाच्चाटुनि कुर्वन्नपीत्यादिवच्चाटुशब्दमात्रप्रयोगेणेष्टसिद्धिः तथापि कर्णावतंसादिवत् समाधेयम् । तथा पयोधरगतः कुचं प्राप्तः करः । जडतां निर्व्यापारताम् । जगाम । परन्तु लक्ष्म्या[11]ः पृथुवेपथुर्महान् कम्पः । नीवी वसनग्रन्थि । नीवी परिपणे ग्रन्थौ स्त्री[12]णां जघनवाससीति विश्वः । विस्रंसयन् । सुहृत् मित्रमभूत् । सुहृद्दुहृदौ मित्रामित्र-योरिति निपातनात् सा[13]धुः । अत्र राधामाधवयोः परस्परमालम्बनत्वम् । स्तनादि-

१ लोकस्य लोकस्ययाकांक्षातस्याविषयत्वे०। २ रत्या०। ३ रतिर्देवौवादिविषयाव्यभिचारीतया जितः । ४ स्थिरस्या०। ५ ०व्यभिचारणा । ६ हस्ये । ७ ध्यञ् । ८०रौद्र्योविषये । ९ स्तम्भेनन । १० कृष्ण । ११ लक्ष्म्यः । १२ स्त्रीणा । १३ ०साधः । ** Text to be dropped as it is inconsistent to the context

दर्शनमुद्दीपनम् । वेपथुरनुभावः । जाड्यं व्यभिचारिभावः । एतैरत्र[1] सम्भोगशृङ्गारा-भिव्यक्तिः[2] । वसन्ततिलकावृत्तम् ॥१॥ द्वितीयो यथा– **निद्राणमिति** । कान्ते कृष्णे क्षणम् । अत्यन्तसंयोगे द्वितीया । निद्राणं लक्षणया मुकुलितम् । निपूर्वस्य द्रातेः कर्तरि क्तः । **संयोगादेरातोधातोर्यण्यतः**(पा०अ०८/२/४३)इति निष्ठा तस्य नः । **रषाभ्यामि**(पा०अ०८/४/१)त्यपवायेऽपि णत्वम् । एवम्भूतं वदनं मुखम् । उन्नमय्य ऊर्ध्वं कृत्वा । कुचयोरन्तः अन्तरालम् । तत् स्पृशतीति । तथोक्ते सति स्रस्तं व्यस्तं यदुकूलम्[3] । तेन दर्शिता या वलयस्ताभिः प्रव्यक्ता नाभिश्रीर्यस्याः। यद्वा दर्शितवलि इति क्रियाविशेषणम् । तथाभूताया राधायाः दृक्कोणस्य नेत्र– प्रान्तस्य । दरमीषत् । ईषदर्थे तदव्ययमित्यमरः[+] । धूर्णत् यदुत्पलं तस्य दलानां या द्रोणी गर्भं तस्या[4] यो मदस्तस्य द्रोहिभिः सदृशैः । मित्रशत्रुज्ञातिसहोदरादिशब्दानां सदृशार्थमित्या[5]-लङ्कारिकाः । तरङ्गितैः गतागतैः । कर्तरि तृतीया । स्मरः कामः । दीर्घायुः चिरस्थायी । विरचितः कृतः । घूर्णदित्यत्र यद्यपि **घूर्ण भ्रमणे** (धा०पा०४३८/१३४०) इति धातुरात्मनेपदी तथापि तस्य नित्यत्वात् **योषितामतिमदेन जुघूर्णुरि**(शिशु०१०/३२)ति माघप्रयोगदर्शनाच्च परस्मैपदमविरुद्धम् । वस्तुतस्तु भ्वादिगणे पाठादात्मनेपदप्रयोगः । अदादिगणेऽप्यस्य पाठात्परस्मैपदप्रयोग इत्युभयपदप्रयोगसिद्धिः । तेन **घूर्णते दैपमर्चिरि** (शिशु०११/१८)ति **योषितामतिमदेन जुघूर्णु**(शिशु०१०/३२) रिति चेति माघे प्रयोगद्वयमविरुद्धम् । विभावादयः स्पष्टाः । शार्दूलविक्रीडितम् ॥२॥ **देशानां समयानां नायिकानां[6] च भेदेन नायकयोरवस्थाभेदेन[7] बहवो भेदाः[8] रसमञ्जर्यां प्रदर्शिता इति ।**

अथ हावा[9] लिख्यन्ते । तत्र भरतः–

लीला विलासो विच्छित्तिर्विभ्रमः किल किञ्चितम्[10] ।
मोट्टायितं कुट्टमितं विव्वोको[11] ललितं तथा ॥
विहृतं चेति विज्ञेया दश हावास्तु योषिताम् ॥(ना०शा०२२/१२–१३)

नारीणां शृङ्गारचेष्टा हावः । स च स्वभावजो नारीणाम् ननु विव्वोक[12]-विलासविच्छित्तिविभ्रमाः पुरुषाणामपि सम्भवन्तीति[13] चेत् सत्यम् । तेषां

---

१ एतेरत्र । २ शृङ्गारभिव्यक्तिः । ३ यदुकूलं । ४ सस्या । ५ सदृशार्थतमि० । ६ नायिकानां नायिकानां । ७ नायिकायो० । ८ भेद । ९ हाव । १० किंचतम् । ११ ब्ल्लिोकं । १२ विश्वेक० । १३ संभवति इ । + Not traced out in अमरकोश

सोपाधिकाः स्वभावजाः नारीणामेव*। नन्वेवं यदि सदैव तासां ते कथं न भवन्ति इति चेत् सत्यम्। उद्दीपकान्वयव्यतिरेकाभ्यां तासां हावाविर्भावतिरोभावाविति[1]। लीलाविलासविच्छित्तिर्विभ्रमललितानि शारीराणि मोट्टायितकुट्टमितविव्वोकः विहृतान्यान्तराणीति[2]। किलकिञ्चितमुभयसङ्कीर्णमिति। प्रियभूषणवचनाद्यनुकृतिर्लीला[3]। तत्र विभावः सस्मितकौतुककलापः। अनुभावः प्रियपरिहासः। यथा–

चण्डांशौ चरमाद्रिचुम्बिनि मनो जिज्ञासितुं सुभ्रुवां
न्यञ्चत्कौतुकया तया विरचिते वंशीरवे राधया।
एष स्फूर्जति कस्य निस्वन इति क्रोधाद्व्रजन्काननं
राधां वीक्ष्य लताप्रतानपिहितां स्मेरो हरिः पातु वः ॥३॥

अथेति। **लीलेति**। योषितां स्त्रीणां लीलादयो दश विज्ञेया इत्यन्वयः। **स चेत्यादि स्त्रीणामित्यन्तं*** सुगमम्। **नन्वेवमिति**। हावानां[4] स्त्रीस्वभावत्वे सर्वदावस्थानमाशङ्क्य समाधत्ते–**उद्दीपकेत्यादि**[5]। यदवश्यसत्त्वे यत्सत्त्वमन्वयः यदभावेऽवश्ययदभावो व्यतिरेक इति **तर्कप्रकाशे** द्वयोर्लक्षणमुक्तम्। **लीलेति**। लीलादि पञ्च शारीराणि, मोट्टायितादि चत्वारि आन्तराणि। लीलामुदाहरति– **चण्डांशाविति**। चण्डांशौ सूर्ये। चरमाद्रिमस्ताचलम्[6]। चुम्बतीति तथा भूते सति। सायंकाले जाते सतीत्यर्थः। सुभ्रुवामन्यगोपिकानाम्। मनो[7] मानसम्। जिज्ञासितुं वेदितुम्। न्यञ्चत्कौतुकया उत्पन्नकुतूहलया। तया राधया। वंशीरवे विरचिते सति। कस्यैष निस्वनः[8] शब्दः। स्फूर्जति स्फूरद्रूपो भवति। यद्यपि **स्फूर्ज धातुर्वज्रनिर्घोषे**[9] (धा०पा०२३५) प्रवर्तते तथापि धातूनामनेकार्थत्वादयमर्थः इति विचिन्त्य क्रोधात्। क्रोधमाश्रित्य[10]। ल्यब्लोपे[11] पञ्चमी। काननं प्रति व्रजन् गच्छन्। तथा लताप्रतानैः[12] वल्लीकुटिलतन्तुभिः। पिहितामाच्छादिताम्[13]। राधां वीक्ष्य दृष्ट्वा। स्मयते इति स्मेरः। **नमिकम्पिस्म्यजसकमहिंसदीपो रः**[14] (पा०अ०३/२/१६७) इति रप्रत्ययः। हरिः कृष्णः पातु। गोपिकासु[15] कौतुकं विभावः। प्रियपरिहासोऽनुभावः। अत्र भेदानुक्तर्निश्चयोत्तरः

---

१ ०तिरोभाव इति। २ मोटायितुं विंब्विक कुट्टमितविद्रुतानि०। ३ ०द्यनुकृतीलीला। ४ हावाना। ५ रुद्दीपकेत्यादि। ६ चरमाद्रिनस्ताचलं। ७ मनां। ८ निस्वतः। ९ ०निर्घोष।
१० क्रोधेमाश्रित्य।११ ल्यव्रलोपे। १२ लताप्रतैः। १३ ०माच्छादितम्। १४ नमिकवि०।
१५ कोपिकासु।

संशयालङ्कारः । तदुक्तं **काव्यप्रकाशे–ससन्देहस्तु भेदोक्तौ तदनुक्तौ तु संशय** (का०प्र०१०/९२)इति । शार्दूलविक्रीडितम् ॥३॥

गमननयनवदनभ्रूप्रभृतीनां यः कश्चिदुत्पद्यते विशेषः स विलासः । अत्र विभावाः प्रियदर्शनस्मरणादयः । अनुभावा अभिलाषवैदग्ध्यसङ्केतप्रकाश–प्रीतिप्रकटनादयः । यथा–

कूजत्काञ्चि दरस्फुरद्वलिनटद्*भ्रूवल्लिवेल्लद्वपु–
र्वल्गत्[१] कुण्डलकान्तिसाचिवलितग्रीवं लपन्त्या वचः ।
प्रातर्नर्तितपुण्डरीकपरिषत्पाण्डित्यपाटच्चरी–
दृष्टिर्यं प्रतिजायते वरतनोर्वका स शक्राधिकः ॥४॥

विलासमुदाहरति–**कूजदिति** कूजन्ती शब्दायमाना काञ्ची रशना यस्यां क्रियायाम् । दरमीषत् । स्फूरद्वलितटं* यस्य तथाभूता भ्रूवल्ली यस्यां क्रियायाम् । वेल्ल[२]च्चञ्चलम्। वपुर्यस्यां तस्याम् । वल्गति[३] चपला कुण्डला कान्तिर्यत्र क्रियायामिति । तथा साचि वक्रम् वलिता कृता ग्रीवा यत्रेति । पञ्चैतानि क्रियाविशेषणानि । वचः वचनम् । लपन्त्याः भाषमाणायाः । वरतनोः कान्ताया[४]ः । प्रातः प्रभाते । नर्तितं वायुनेत्यर्थलभ्यं यत् पुण्डरीकमुत्पलम् । **पुण्डरीकं सिताम्भोजमि**(अमर०१/१०/४१)त्यमरस्तथाप्यत्र सरोजसामान्ये लक्षणा । वेदभाष्ये पुण्डरीकशब्दो मर्कटगुदवाचक इत्युक्तम् । तदिह रसाननुगुणत्वान्न गृह्यते । तस्य परिषत्सभा समूह इति यावत्तस्यां पाण्डित्यं चातुर्यं लालित्यमिति यावत् । तस्य पाटच्चरी । **दस्युः पाटच्चरस्तेन** (अमर०२/१०/२५)इत्यमरः। दृष्टिः यमुद्दिश्य वक्राऽपाङ्गप्रसारिणी जायते भवति । स पुरुषः शक्राधिक[५]ः इन्द्रादप्यधिक इत्यर्थः । विभावादयः स्वयमूह्याः । खण्डिताया एते विलासा इति बोध्यम् । ज्ञातेऽन्यासङ्गविततते खण्डितेर्ष्याकषायितेति तल्लक्षणात् । अत्रेदमाकूतम्–खण्डितोदाहरणे प्रातःकालवाचि शब्दप्रयोगः । कलहान्तरितोदाहरणे तु नेति भेदोऽवगन्तव्यः । शार्दूलविक्रीडितम् ॥४॥

कतिपयभूषणविन्यासो विच्छित्तिः । तत्र विभावाः सौकुमार्य[६]प्रियसौभाग्य–सौन्दर्यगर्वक्रोधक्लेशप्रकाशादयः । अनुभावाः गर्वमानादयः यथा–

---

१ क्लात् । २ वेल्ल० । ३ वलाती । ४ तांकायाः । ५ शक्काधिकः । ६ सौकुमार्या० ।

मञ्जीरं[1] न पदे करे न कटकं मौलौ न मालां पुनः
कस्तूरीतिलकं तथापि तनुते संसारसारां[2] श्रियम् ।
सर्वाधिक्यमलेखि भालफलके यद्वेधसा सुभ्रुवो
जानीमः किमु मन्मथेन जगतीपालेन मुद्रा कृता ॥५॥

विच्छित्तिमुदाहरति–**केयूरमिति** । अस्या इति शेषः । अस्या नायिकायाः करे पाणौ केयूरमङ्गदं नास्ति । एवमग्रेऽप्यस्तीत्यध्याहारः । पदे चरणे हिरण्मयं[3] वलयम् । स्यात्कोशश्च– **हिरण्यं च हेमरूप्येकृताकृते** (अमर०२/९/९१) इत्यभिधानाद्धैम्यमय–मिति यावत् । **भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रिया** (अमर०३/३/१७–२३)–मित्यमरः । नास्ति पुनः समुच्चये । मौलौ शिरसि (शिर)मालामाल्यम्[4] । मालामाल्यं सौमनस्यमित्यमरः[+] । नास्ति तथापि सौन्दर्यगर्वेण भूषणेष्वनादरात्केयूरादीनाम–भावेऽपीत्यर्थः । कस्तूरीतिलकं मृगमदचन्द्रकः । त्रैलोक्ये सारम् श्रेष्ठाम् । श्रियं शोभां तनुते करोति । अत्रोत्प्रेक्षते । यद्यस्माद्ब्रह्मणा सुभ्रुवः अस्या नायिकायाः भालफलके ललाटपट्टे । सर्वाधिक्यं सर्वोत्कृष्टत्वम् । अलेखि । लिखितम् । लिखतेः कर्मणि चिण् । **चिणो लुगिति** (पा०अ०६/४/१०४)तस्य लुक् । तस्मात्तत्र भालफलके । मन्मथमहीपालेन । कन्दर्पेण राज्ञा । मुद्राकृता किमु । इति वयं जानीमः सम्भावयामः । अन्यथेतरभूषणवत्तद्धारणस्याप्यभावप्रसक्तेरिति भावः । वस्तुतस्तु सौभाग्यलक्षणत्वेनापरिहार्ये तस्मिन् काममुद्रोत्प्रेक्षा । सा च कामे महीपालत्वारोपादुपकानुप्राणितेत्यनयोरङ्गाङ्गिभावसङ्करः[5]। पूर्वार्धे पुष्कलकारणाभाव–निबन्धनाद्विभावनाभेदः । **हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मते** (कुव०/७८)त्येतल्लक्षणात्[6] । इत्यनयोः संसृष्टिः । अत्र सौन्दर्यगर्वो विभावःतत्प्रकाशमनुभावः । उभावप्येतौ गम्यमानावित्यवधेयम् । शार्दूलविक्रीडितम् ॥५॥

वस्त्राङ्गभूषणानां स्थानविपर्यासो विभ्रम[7]ः। विभावा धनमदरागौत्कट्या–दयः । अनुभावा[8]ः प्रियसख्याद्युपहासादयः । यथा–

त्यक्तं[9] केलिविधौ निजांशुकधिया पीताम्बरस्यांशुकम्
पद्मायाः परिधाय सद्मशयनात्प्रातः प्रयान्त्याः बहिः ।

---

१ केयूरं न पदे करे न कटकमिति पाठः । २ श्रियाम् । ३ हिरण्मंय । ४ मौलौ शिरशिरमालामाल्यं । ५ ०प्राणितेत्यनरोयोगांगीभाव० । ६ मतेतल्लक्षणात् । ७ विभ्रामः । ८ अनुभाव० । ९ त्यक्ते ।

+ Not traced out in अमरकोश

आदातुं वसनाञ्चलं[1] चपलयन् कोपं दृशा दर्शयन्
वाचा कौतुकमाचरन्स्मितसुधास्निग्धो[2] हरिः पातु नः ॥६॥

विभ्रममुदाहरति-**त्यक्तमिति** । केलिविधौ सुरतव्यापारे । त्यक्तं दूरे क्षिप्तम् । त्यक्ते इति पाठे सुरतव्यापारे त्यक्ते इति[3] योजना(स्यात्) । पीताम्बरस्य विष्णोः । अंशुकं चैलम् । निजांशुकधिया स्वशाटकभ्रान्त्या । परिधाय धृत्वा । प्रातः प्रभाते । पद्मभवनात्[*] पद्माख्यनर्मगृहात्[4] । नर्मसदनादिति पाठान्तरम् । बहिः प्राङ्गणे । प्रयान्त्याः[5] निःसृतायाः पद्मायाः लक्ष्म्याः । **लक्ष्मीः पद्मालया पद्मा पद्माकमला[6] श्रीर्हरिप्रिया** (अमर०१/१/२७)इत्यमरः । सम्बन्धि वसनाञ्चलं चैलाञ्चलम् । चपलयन् चञ्चलं कुर्वन् । **तत्करोति तदाचष्टे**(का०वा०४२६)इति णिजन्तात्लटः शत्रादेशः । तया दृशा दृष्ट्या । कोपं क्रोधाभिनयं दर्शयन् । वाचा वाण्या । उभयत्रापि करणे तृतीया । कौतुकं कौतुहलं आचरन् । तथा स्मितसुधया हास्यामृतेन । स्निग्धो हरिरच्युतः[7] । नः पातु रक्षतु । आशिषि[8] लोट् । अत्र गम्यमानमदो हि विभावः । हास्यमनुभावः[9] । भ्रान्तिमदलङ्कारः[10] । शार्दूलविक्रीडितम् ॥६॥

श्रमाभिलाषगर्वस्मितहर्षभयक्रोधानां सङ्करः किलकिञ्चितम् । तदाह-

श्रमाभिलाषगर्वाणां स्मितहर्षभयक्रुधाम्[11] ।
असकृत्सङ्करः प्राज्ञैर्विज्ञेयं किलकिञ्चितम् ॥

अत्र विभावाः नवयौवनोद्भेदचापलादयः । अनुभावाः कर्त्तव्यनिर्धारणादयः[12] । यथा-

कोदण्डमारोहति चण्डिमानं[13] मधुव्रतः काङ्क्षति शोणिमानम् ।
पद्मं सुधां वर्षति वेपमानं स्वर्णाचलः स्विद्यति किं निदानम् ॥७॥

(यथा वा)-

क्रोधागारसमुत्थिताः समुदयत्संत्रासतैलार्दिताः
व्रीडाभिः परिमर्दिता स्मितसुधा धाराभिरुद्वर्तिताः ।
स्नाताः स्नेहरसैर्मनोभवकलामालाभिराभूषिताः
पायासुर्मयि शैलराजदुहितुः स्फीताः कटाक्षच्छटाः॥८॥

---

१ वसनाचलं । २ ०आचरस्मित० । ३ त्यक्तेतीति । ४ ०नर्मग्रहात् । ५ प्रयन्त्याः । ६ पद्मक० । ७ हरैरच्युतः । ८ आशिशि० । ९ हास्योऽनुभावः । १० श्रान्तिमदलंकारेः । ११ ०स्मत० । १२ कर्त्तव्यानिर्धारण० । १३ चण्डमानं ।

किलकिञ्चितमुदाहरति। तल्लक्षणमाह–**श्रमे**ति। प्राज्ञैर्बुधैः[1] श्रमाभिलाषगर्वाणाम् तथा स्मितहर्षभयक्रुधाम्। असकृद्बहुशः। सङ्करो मिश्रीभावः। किलकिञ्चितं विज्ञेयम्। किल अलीकम्। किम् वितर्कस्ताभ्यां चितं व्याप्तं किलकिञ्चितम् नानाचेष्टितमिति क्षीरस्वामिना क्रोधाश्रुहर्षभीत्यादेः सङ्करः किलकिञ्चित[2]दिति व्याख्यातमिति दिक्। **कोदण्डमि**ति। कोदण्डं धनुः। चण्डिमानं वक्रि[3]माणम्। आरोहति। कोदण्डत्वेनाध्यवसितम् भ्रूमण्डलं कुतो वक्रीभवतीति सख्याः[4] प्रश्नः। पराङ्गनोपभोगहावलोकनजन्मा राधायाः क्रोधोऽभिव्यज्यते। किञ्च मधुव्रतो भ्रमरः। शोणिमानं रक्तताम्। काङ्क्षति। निजहेलनजन्यदुःखजन्याश्रुप्रादुर्भावो व्यज्यते। किञ्च पद्मं मुख[5]कमलं वेपमानं कम्पमानं सत्सुधां स्मितलक्षणामृतम्। वर्षति। स्वगृहागमनात् हर्षोत्पत्तेरिति भावः। किञ्च स्वर्णाचलः कुचमण्डलरूपः स्विद्यति चलति। मद्भ्रूभङ्गादिदर्शना[6]त्तस्यापि क्रोधः स्यादिति शङ्क्या कुचकम्प इति भावः। अत्र रूपकातिशयोक्तिः। इन्द्रवज्रावृत्तम् ॥७॥ उदाहरणान्तरमाह– **क्रोधागारे**ति। क्रोध एवागारं गृहम्। तस्मात् समुत्थिताः प्रसृताः। तथा सम्यगुदयता संत्रास[7]रूपेण तैलेन। अर्दिता विलिप्ताः। तथा व्रीडाभिर्लज्जारूपाभिर्युवतीभिः परिमर्दिताः। तथा स्मितसुधाधाराभिः हास्यामृतवृष्टिः उद्वर्त्तिताः उभयत्रापि कर्तरि तृतीया। तथा स्नेहजलैः प्रीतिरूपोदकैः कृत्वा। स्नाताः। अत्राकर्मकत्वात्कर्त्तरि क्तः। तथा मनोभवस्य कामस्य याः कलाः शिल्पं तद्रूपाभिर्मालाभिः पुष्पस्रग्भि[8]ः। आभूषिताः प्रसाधिताः। णिजन्तात् कर्मणि क्तः। **कला स्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके षोडशांशेऽपि चन्द्रस्ये**ति विश्वः। एतादृश्याः शैलराजदुहितुः पार्वत्याः। कटाक्ष–च्छटाः अपाङ्गवलोकनपरम्पराः। मयि मद्विषये स्फीताः पुष्टाः सत्यः पायासुः। आशिषि लिङ्। विभावानुभावौ मूल एव स्पष्टौ। अत्र तत्तद्विशेषणमहिम्ना नायिकाप्रतीतेः समासोक्तिः। शार्दूलविक्रीडितम् ॥८॥

वार्त्तावैमुख्ये सति निभृतभूयोदर्शनस्पृहा मोट्टायि[9]तम्। अत्र विभावाः सपत्नीत्रासलोकत्रासलज्जादयः। अनुभावाः मनःप्रेमकथनसङ्केतनिवेदना–दयः। यथा–

---

१ ०बुधौ। २ ०किंचित्यत्त। ३ विकि०। ४ संख्याः। ५ स्वग्रहा। ६ ०दर्शमात्त०। ७ संत्रारूपेण। ८ ०सृग्भिः। ९ मोटायितम्।

न स्नेहस्य कथारसं कथमपि श्रोतुं समुत्कण्ठते
राधा किन्तु विकीर्णरत्नकपटादागत्य सौधाद्बहिः ।
नृत्यन्नेत्रपुटीस्फुरत्कुचतटीस्वेदोल्लसद्दोस्तटी–
व्यालावद्भ्रुकुटीस्खलत्पटीपुनःकृष्णान्तिके भ्राम्यति ॥९॥

मोट्टायितलक्षणमाह–**वार्त्तेति** । मोट्टायितम् प्रियं स्मृत्वा साङ्गभङ्गविजृम्भणमिति । मुट मर्दने इति क्षीरस्वामी । मोट्टायितुमुदाहरति–**न स्नेहेति** । राधा स्नेहस्य प्रेम्णः । कथा रस इवेत्युपमितसमासः । सुधारससदृशां कथामित्यर्थः । कथमपि । गौरवेण । कथमादि तथाप्यन्तं यत्ने गौरववादयोरिति वैजयन्ती । श्रोतुं न समुत्कण्ठते नेहते । तर्हि किं करोतीत्यत्राह– **किन्त्विति** । विकीर्णरत्नकपटात् । त्रुटितहाररत्नव्याजात् । तत्कपटं कृत्वा । ल्यब्लोपे पञ्चमी । सौधान्निजसदनात् । बहिः आगत्य बहिः प्रदेशं निर्गत्येत्यर्थः । नृत्यन्ती नेत्रपुटी यस्यां क्रियायामिति । व्यावल्गन्ती चञ्चला भ्रुकुटी यस्यामिति । स्खलन्ती भ्रश्यंती पटी शाटी यस्यामिति । पञ्चेतानि क्रियाविशेषणानि । पुनर्वारं वारम् । कृष्णान्तिके कृष्णसमीपे भ्राम्यति । सङ्केतकथनेच्छया कृष्णं परितो भ्रष्टरत्नान्वेषणमिषाद्राधा भ्रमतीति भावः । विभावानुभावौ मूल एव स्पष्टौ । शार्दूलविक्रीडितम् ॥९॥

दुःखे सुखचेष्टा कुट्टमितम् । अत्र विभावाः रागौत्कट्यदशनकरजक्षत–कुन्तलाधरग्रहादयः । अनुभावाः कपटकायसङ्कोचकपटसीत्कारादयः। यथा–

रोद्धुं पाणिः प्रचलति चिरादङ्गुली निश्चलाऽसौ
भ्रूविक्षेपो भवति कुटिलो नेत्रमन्तः प्रसन्नम् ।
गाढाश्लेषे भवति सुतनोरर्धमात्रो नकारः
कम्पो मूर्ध्नः प्रसरति मुखं सम्मुखं च प्रयाति ॥१०॥

कुट्टमितलक्षणमाह–**सुखेति** । कुट्टच्छेदनादौ । तेन मितं कुट्टमितम् । दुःखोपचारः सौख्येऽपि हर्षात् कुट्टमितं मतमिति क्षीरस्वामी । तदुदाहरति–**रोद्धुमिति** । सुतनोः कामिन्याः । गाढाश्लेषे दृढालिङ्गनविषये। रौद्धुं निषेद्धुम् पाणिर्हस्तः प्रचलति

---

१ विकीरत्नर्ण०। २ कृष्णांतिको । ३ प्रिये । ४ श्रोतुं । ५ अगत्य । ६ कुटुमिते ।
७ दृढालिंगनेविषये ।

प्रसरति दुःखत्वोपचारसूचिका चेयं चेष्टा। किञ्च चिरात् चिरकालम्। असौ अङ्गुलिर्निश्चला वर्त्तत इति शेषः। सुखसूचिका चेष्टेयम्। एवमग्रेऽपि द्वैविध्यं बोध्यम्। भ्रूविक्षेपो भ्रूभङ्गः। कुटिलो भवति। नेत्रं तु अन्तः प्रगल्भं प्रसन्नम्। मूर्ध्नः मस्तकस्य। कम्पो धूननम्। प्रसरति प्रवर्त्तते। च परम् मुखमास्यम् सम्मुखं अभिमुखं प्रयाति एवमिति शेषः। अनेन प्रकारेण। नकारो निषेधः। अर्धः एवार्धमात्रो भवति। अर्धमात्रा उच्चारणकालविशेषो यस्येति वा। विभावानुभावौ मूल एव स्पष्टौ। स्वभावोक्तिरलङ्कारः। मन्दाक्रान्तावृत्तम् ॥१०॥

गर्वाभिमानसम्भूतो विकारोऽनादरात्मको विव्वोकः। अत्र विभावा यौवन-मदकुलमदधनमदप्रियापराधादयः[1]। अनुभावा अवहित्थदुर्वचनदुष्प्रेक्षणा-दयः। यथा–

कृताञ्जलिः कातरदृङ्निपातः प्राणेश्वरः पार्श्वमुपाजगाम।
सखीमुखे कुण्डलरत्नलेखामेषा पुनः प्रेक्षितुमाचकाङ्क्ष ॥११॥

विव्वोकलक्षणमाह–**गर्वेति**[2]। विप् क्षेपे। विपूर्वस्य बुक्कतेर्वा। अपभ्रंशो विव्वोकः। विव्वोकोऽभिमनन्[3] प्राप्तावपि गर्वादनादर इति स्वामी। उदाहरणमाह–**कृताञ्जलिरिति**। कृतो बद्धोऽञ्जलिर्येन स प्रणत इत्यर्थः। तथा कातरो दीनो दृङ्निपातो यस्य स तथाभूतः। प्राणेश्वरः कान्तः। पार्श्वं स्त्रीसमीपम्। उपाजगाम प्रपेदे। प्रातः समये इति शेषः एषा पुनः नायिका तु सखीमुखे स्वकान्तभुक्त-कामिनीवदने कुण्डलरत्नस्य रेखा ताम्। चिह्नभूतामित्यर्थः। प्रेक्षितुम् वीक्षितुम्। आचकाङ्क्ष चकमे। अत्र प्रियापराधो[4] विभावः। निजान्तिकागतकान्तोपेक्षानुभावः। खण्डिता चेयं नायिका। इन्द्रवज्रावृत्तम् ॥११॥

सकलाङ्गसमीचीनविन्यासो ललितम्। अत्रैव स्मितादयोऽन्तर्भवन्ति। तत्र विभावा मनःप्रसादप्रियतमदृढानुरागधीरत्वादयः। अनुभावाः प्रियवशी-करणलोकानुरागचमत्कारादयः। यथा–

कलक्वणितमेखलं चपलचारुनेत्राञ्चलम्
प्रसन्नमुखमण्डलं श्रवणसञ्चरत्कुण्डलम्।
स्फुरत्पुलकबन्धुरं लपितशोभमानाधरम्
विहस्य कमलेक्षणा व्रजति कस्य केलिगृहम् ॥१२॥

---

१ ०दुप्रेक्षणादयः। २ गर्वीति। ३ अभिमन्। ४ प्रियायराधो।

ललितलक्षणमाह-**सकलाङ्गे**ति । अनाचार्योपदिष्टं स्याल्ललितम् । रतिकूजित-मिति । तदुदाहरति-**कलक्वणिते**ति । कमलेक्षणा काचिन्नायिका । कलं यथा तथा । क्वणिता मेखला यस्यां क्रियायामिति तथाभूतम् । चपलः चारुः नेत्राञ्चलो नेत्रप्रान्तो यस्यामिति तथाभूतम् । प्रसन्नं मुखमण्डलं यस्यां क्रियायामिति । तथा श्रवणयोः कर्णयो सञ्चरती चञ्चले[1] कुण्डले यस्यामिति । सञ्चलदिति पाठः । स्फुरत्पुलकैर्बन्धुरं सुन्दरं यथा स्यात्तथाभूतम्[2] । लपितेन[3] भाषणेन शोभमानः अधरो यस्यां क्रियायामिति षट् क्रियाविशेषणानि । विहस्य स्मितं कृत्वा । कस्य धनस्य कस्यचिदित्यर्थः । केलिगृहं[4] विलाससदनम् । प्रति व्रजति गच्छति । अत्र प्रियतमं प्रति दृढानुरागो विभावः । प्रियवशीकरणार्थं गमनमनुभावः । पृथ्वीवृत्तम् ॥१२॥

प्रियसन्निधावभिलाषापरिपूर्तिर्विहृतम् । अत्र व्याजलज्जादयो विभावाः । अनुभावा अन्यथाचेष्टिताऽन्यथाव्यवहारादयः । व्याजाद्यथा-

अभिलषति कपोले चन्द्रचूडे विधातुं
तिलकमुदयदन्तः कोपभाजा भवान्या
फणिपतिभयकूटादङ्गमुत्कम्पयन्त्या
प्रचलवसनवातैर्विधिनता केलिदीपाः ॥१३॥

विहृतलक्षणमाह-**प्रियसन्निधे**ति । अवसरागतवचनं व्याजादिना विशेषेण[5] हृतम् विहृतम् । वक्व्याभाषणम् व्याजात् विहृतं दर्शिते हृतमिर्ति[6] स्वामी । तत्र व्याजात्[7] लज्जया चेति द्वैविध्येनोदाहरति-**अभिलषती**ति । चन्द्रचूडे शिवे । कपोले पार्वती-ललाटे । तिलकं पत्ररचनम् । विधातुं कर्त्तुम् । अभिलषति[8] इच्छति[9] सति । गङ्गोपभोगचिह्नदर्शनजन्यक्रोधापनोदो भविष्यतीति धिया शिवस्य पार्वतीलाभे पत्ररचनेच्छा जातेति भावः । उदयन् योऽन्तः कोपः सपत्नीसम्भोगचिह्न-दर्शनजन्यक्रोधस्तं भजतीति तया भवान्या पार्वत्या कर्त्र्या । फणिपतेः शेषात् । यद्भयं तस्य यत्कूटं विषं[10] तस्मात् तद्भयं निमित्तभूतम् कृत्वेत्यर्थः । ल्यब्लोपे पञ्चमी । **मायानिश्चलयन्त्रेषु**[11] **कैतवानृतराशिषु । अयोधने शैलशृङ्गे सीराङ्गे कूटमस्त्रियामि**(अमर०३/३/३७)त्यमरः । अङ्गम्[12] । उत्कम्पयन्त्या[13] । भयसूचका चेयं

---

१ स्फुरत्पुलकेकैः बन्धुरं । २ स्यातेथा० । ३ लपितने । ४ विभावाः । ५ विशेषण० ।
६ हृतमिति । ७ व्यात् । ८ अभिषति । ९ इछिति । १० मिषं । ११ मायानिलयन्त्रेषु ।
१२ अंग । १३ उत्कंपयसा ।

चेष्टा । प्रचलम् यद् वसनं वस्त्रम् । तस्य वाताः वायवस्तैः[1] कृत्वा । केलिदीपाः सम्भोगोपयोगिनः प्रदीपाः । विघ्नः सञ्जातो येषामिति विघ्निताः । नाशवन्तः कृता इत्यर्थः । तारकादित्वादच्[2] । अत्र भयव्याजरूपो विभावः । दीपनाशकरण–चेष्टानुभावः । मालिनीवृत्तम् ॥१३॥

लज्जातो यथा–

आनन्दभाजो यदुनन्दनस्य करावरोधं न करेण[3] कुर्याः ।
सखीं लपन्तीमिति सञ्जघान चकोरनेत्रा चुलुकोदकेन[4] ॥१४॥

लज्जात[5] उदाहरति– **आनन्देति** । त्वं आनन्दभाजः । आश्लेषानन्दसेविनः[6] । यदु–नन्दनस्य कृष्णस्य । करस्य पयोधरं प्रति प्रसारितस्य । अवरोधो निवारणम् । करेण स्वहस्तेन । कृत्वा न कुर्याः । मा कुरु । प्रार्थनायां लिङ् । चकोरनेत्रा खञ्जननयना राधा । इत्यनेन प्रकारेण भाषमाणां[7] सखीम् । चुलुकोदकेन अञ्जल्युदकेन । सञ्जघान ताडयामास । अत्र लज्जा विभावः[8] । ताडनमनुभावः । उदाहरणद्वयेऽपि प्रियसन्निधा–वप्यभिलाषापरिपूर्तिरूपं विहतं[9] इत्यवधेयम् । स्वभावोक्तिरलङ्कारः । इन्द्रवज्रावृत्तम् ॥१४॥

यूनोरन्योन्यं मुदितानां पञ्चेन्द्रियाणां सम्बन्धाभावो नाभीष्टप्राप्तिर्वा विप्रलम्भः । न च मानात्मके विप्रलम्भे अव्याप्तिः । मुदितपञ्चेन्द्रिय–सम्बन्धाभावरूपस्य विशिष्टाभावस्य तत्रापि सत्त्वात् । तदानीं यूनोरिन्द्रियाणां मुदितत्वाभावात्[10] । ननु प्रियमभिसर्त्तुम् या गच्छति सापि विप्रयुक्ता भवेदिति चेत् सत्यम् । सापि विप्रयुक्तैव । अचिरदर्शन–प्रत्याशाप्रमोदेन विरहधर्मस्याश्रुपातादेरसम्भव इति । स च विप्रलम्भः पञ्चधा । देशान्तरगमनात् गुरुनिदेशादभिलाषादीर्ष्यातिः[11] शापाच्चेति । समयाद्दैवात्[12] विद्वरादित्यादयोऽप्युन्नेयाः[13] । देशान्तरगमनाद्यथा–[14]

प्रस्थानाय कृतोद्यमे प्रियतमे दोःकङ्कणेन[15] च्युतं
धैर्येण स्खलितं मदेन गलितं नेत्राम्भसा निःसृतम् ।

---

१ यषामिति । २ ताराकादित्वादिच् । ३ करेणु । ४ लंपतीमिति । ५ लज्जेज्जात । ६ अश्लेषा० । ७ चलुकोदकेन । ८ विभाविवः ।९ विहत० । १० मुदितत्वात् । ११ ०दिष्यति० । १२ समयाद्वेवात् । १३ चिदाूलादित्यादयोपुंनयाः । १४ देशांन्तरगमाद्यथा । १५ पियतम० ।

जीवेनापि यियासुना शिव शिव प्रारम्भि* वामभ्रुवः
कम्पान्दोलितकिङ्किणीकलरव[1] व्याजेन वैन्यस्मृतिः ॥१५॥

यथा वा तातचरणानाम् –

वीणामङ्के कथमपि सखीप्रार्थनाभि[2]र्निधाय
स्वैरं स्वैरं सरसिजदृशा गातुमारब्धमेव।
तन्त्रीबुद्ध्या किमपि विरहक्षीणदीनाङ्गवल्ली–
मेनामेव[3] स्पृशति बहुशो मूर्च्छना चित्रमेतत् ॥१६॥

विप्रलम्भलक्षणमाह–**यूनोरिति**। **पुमान् स्त्रिया**[4](पा०अ०१/६/६७)त्येकशेषः। **नन्विति**। विप्रयुक्तैवेत्यर्थः। तर्हि अश्रुपातादयः कथं न भवन्तीत्यत्राह– अचिर[5]दर्शनेति। विप्रलम्भस्य पञ्चभेदानाह–**देशान्तरेति** अन्यान्नपि त्रीन्[6] भेदानाह–**समयेति**। उद्देशक्रमेण उदाहरणानि। देशान्तरगमनस्योदाहरणमाह–**प्रस्थानायेति**। प्रियतमे भर्त्तरि। प्रस्थानाय देशान्तरगमनाय। कृतोद्यमे कृतादरे सति। वामे सुन्दरे भ्रुवौ यस्या वामभ्रुवः सुन्दर्याः। वामं सव्ये प्रतीपे च दक्षिणे चापि इति विश्वः। दोः कङ्कणेन हस्तवलयेन। दोर्ग्रहणं तत्र दृढतर[7]स्थितिसूचनार्थम्। जातित्वादेकवचनम्। **प्रस्थानं वलयैः कृतमि**(अमरु०३१)त्यत्र तु व्यक्त्यपेक्षया बहुत्वम्। च्युत[8] स्खलितम्। भावे क्तः। धैर्येण स्खलितम्। च्युतमित्यर्थः। तथा मदेन अवलेपेन गलितम्। तथा नेत्राम्भसा अश्रुधारया निःसृत[9]म्। किञ्च **शिवशिवेति** खेदे। सम्भ्रमद्योतनाय द्वित्वम्। चादीनामाकृतिगणत्वात्तदन्तर्गतत्वमस्याहुः। **गीतगोविन्दे हरिहरिहतादरतये**(गी०गो०३/३)ति तत्र व्याख्यातम् चैतद्व्याख्यातृ[10]भिरिति बोध्यम्। यियासुना निःसरणेच्छुना। **आशङ्कायां सन् वक्तव्य**।(का०वा०)इति सन्प्रत्ययः। जीवेनापि प्राणेनापि। कम्पेन आन्दोलिता याः किङ्किण्यस्तासां यो कलरवो मधुरशब्दस्तस्य व्याजेन मिषेण[11]। आन्दोलन इति लौकिकधातोः कर्मणि क्तः। वैन्यस्य वेनपुत्रस्य पृथोः स्मृतिः स्मरणमारम्भि* । आरब्धा। प्रयाणे पृथ्वादीनां स्मृतिः शुभदेति भावः। तथा चोक्तम् –

वैन्यं पृथुं हैहयमर्जुनं च शाकुन्तलेयं भरतं नलं च।
रामत्रयं यः स्मरति प्रयाणे तस्यार्थलाभो विजयश्च हस्ते ॥

---

१ कलरिव। २ ०प्रार्थनाभि०। ३ ०मेनामेच। ४ स्त्रियंत्येकशेषः। ५ आचिर०। ६ अन्यानपि। ७ दृढतरा०। ८ व्युतं। ९ निःसृम्। १० चैतज्जद्व्याख्यातृभि०। ११ मिषेणः।

इति । अत्र प्रियप्रयाणे नायिकायाः कार्श्यं जातमिति विवक्षिते कङ्कणादीनां च्युति-स्खलनादिरूपकार्यनिबन्धनादप्रस्तुतप्रशंसाभेदः कैतवापह्नुतिश्च[1] । शार्दूल-विक्रीडितम् ॥१५॥ पुनः ग्रन्थकारतातकृतश्लोकोदाहरणमाह– **वीणामिति** । सरसि-जदृशा नायिकया । सखीप्रार्थनाभिः सखीनर्मोक्तिभिः । करणे तृतीया । कथमपि महता प्रयत्नेन न तूत्साहेनेत्यर्थः । वीणामङ्के उत्सङ्गे निधाय कृत्वा । स्वैरं स्वैरं मन्दं मन्दं प्रकारे वीप्सा । स्वादीरेरिणोरि(का०वा०)ति वक्तव्यात् वृद्धिः[2] । गातुम् आरब्धमेव । किञ्च मूर्च्छना सङ्गीतस्वरावयवविशेषः । मूर्च्छनेत्युच्यते ग्रामस्वरावयवलक्षणेति[3] तल्लक्षणात् । अवस्थाविशेषश्च । किमपि किञ्चित् । तन्त्रीबुद्ध्या तन्त्रीभ्रान्त्या[4] । क्षीणदीना[5] अङ्गवल्ली यस्याः सा तथाभूतां एतामेव नायिकामेव । बहुशः अत्यन्तम्[6] । स्पृशति[7] । आश्रयति । एतच्चित्रं आश्चर्यं भाति । वाक्यार्थः कर्त्ता देशान्तरप्रस्थितस्य प्रियस्य वियोगात् ईदृश्यवस्था अस्या[8] जातेति[9] भावः । परिकरसङ्कीर्णं काव्यलिङ्गम् । कविकल्पितभ्रान्त्युत्थापितासङ्गतिश्च । एषां सङ्करः । मन्दाक्रान्तावृत्तम् ॥१६॥

गुरुनिदेशाद्यथा–

भास्वान् चूततरुर्गुरुर्मनसिजः कोप्येडषभृङ्गस्तमो
मन्दो गन्धवहः सितो मलयजो दोषाकरो माधवः ।
अङ्गारो नवपल्लवः परभृतो विज्ञो गुरोराज्ञया
निर्यातोऽसि विचारिताः कथममी क्रूरास्त्वया न ग्रहाः ॥१७॥

गुरुनिदेशहेतुकस्योदाहरणमाह–**भास्वानिति** । चूततरुः आम्रवृक्षः । **आम्रश्चूतो रसालोऽसावि**(अमर०२/४/३३)त्यमरः[11]। भास्वान् दैदीप्यमानः सूर्यश्च । वर्त्तते इति शेषः । मनसि जातो मनसिजः[12] । कामः । **सप्तम्यां जनेर्डः**(पा०अ०३/२/९७)इति[13] डप्रत्ययः । गुरुः महान् । अनुल्लङ्घ्यः इत्यर्थः । बृहस्पतिश्च[14]। कोऽप्यतिसुन्दर एष भृङ्गो भ्रमरः । तमः तमःसदृशअतिकृष्णवर्ण इत्यर्थः । राहुश्च । वहतीति वहः । पचाद्यच्[15]। गन्धस्य वहः गन्धवाहो वायुः । मन्दः अल्पः शनैश्चरश्च । मन्दः शनैश्चरे मूर्खे चाल्पज्ञे रोगपीडिते इत्यमरः ।[+]मलयजः चन्दनलेपः । चन्दनवृक्षवाचिना

---

१ कैतवापान्हितश्च । २ गांतुं । ३ स्वरावयलक्षणे० । ४ तंतीभ्रांत्या । ५ क्षीणादीना । ६ अत्यंत । ७ स्पृशिति । ८ नस्या । ९ जाजातेति । १० आमृम्बसो । ११ रसालोसाविवित्यमरः। १२ मानासिजः। १३ जनेर्डमिति । १४ स्पृहस्पतिश्च । १५ पचेचाद्यत् । + Not traced out in अमरकोश

मलयजशब्देन कृतचन्दनलेपे लक्षणा। सितः शुभ्रः। शुभ्रस्य हृद्यत्वादिति भावः। शुकश्च तथा। माधवो वसन्तः। दोषाणां विरहिणीप्राणहरणादिरूपाणां आकरः खनिरूपः चन्द्रश्च। तथा नवपल्लवो नवाङ्कुरः। अङ्गारः। अग्निस्फुलिङ्गो मङ्गलश्च। परभृतः कोकिलः। विज्ञः पञ्चमोदञ्चने[1] निपुण इत्यर्थः। बुधश्च। अत्र सर्वत्र क्रियाध्याहारः। त्वया अमी सूर्यादयो ग्रहाः क्रूराः कथं न विचारिताः। विषयविषयिणोरभेदोपचारात् क्रूरत्वं बोध्यम्। अत्र भास्वानिति श्लिष्टगुप्तानां सूर्यादीनां कविना पुनर्ग्रहपदोपादानेनाविष्कृतत्वात् विवृतोक्तिरलङ्कारः। **विवृतोक्तिः श्लिष्टगुप्तं कविनाविष्कृतं[2] यदी**(कुव०/१५५)तिलक्षणात्। गुणीभूतव्यङ्ग्य[3]-त्वादस्य मध्यमकाव्यत्वम्। शार्दूलविक्रीडितम् ॥१७॥

अभिलाषाद्यथा–

आगाराभिमुखं[4] मुखं[5] रचयतोर्वक्रीकृतग्रीवयो–
र्व्यस्तं चोलमजानतोः[6]क्वचिदपि व्याजात्पुनस्तिष्ठतोः।
मार्गं विस्मरतोः क्वचित्क्वचिदपि त्यक्ताक्षरं जल्पतोः
साचि प्रेक्षितं[7]मावयोर्यदभवद्भूयस्तदाशास्महे ॥१८॥

अभिलाषहेतुकस्योदाहरणमाह–**आगारेति**। मुखं[8] आस्यम्। आगाराभिमुखं[9] निवास-गृहं[10]सम्मुखम्। रचयतोः कुर्वतोः। विद्यादगारमागारमपगामापगामपि। अराति-मारातिमथो अमश्च कीर्त्तित इति शब्दभेदप्रकाशे। वक्रीकृते ग्रीवे याभ्यां तौ तथा-भूतौ[11]। तयोः व्यस्त[12]मन्योन्य[13]वैपरीत्येन धृतमित्यर्थः। चोलं वसनं अजानतोः। अपि च क्वचित् व्याजान्निमिषात्। पुनः अप्रथमं तिष्ठतोः। क्वचित्कुञ्जादिषु मार्गं विस्मरतोः। तथा च क्वचित्। अपिश्चार्थे। त्यक्ता[14]क्षरम् गलिताक्षरम्। यथा जल्पतोर्वदतोः। आवयोः स्त्रीपुंसयोः साचि प्रेक्षित[15] यस्यां क्रियायामिति[16] यत् अभवत्। प्रियप्रस्थानात् पूर्वं यदासीत् तत् भूयः अत्यन्तम्। आशास्महे वाञ्छामहे। **आङ्शासुरिच्छायाम्**(धा०पा०१०२२)त्यात्मनेपदम्। शार्दूलविक्रीडितम् ॥१८॥

ईर्ष्यातो यथा– **प्राणेशस्य प्रभवति मनःप्रेमहेमप्रसूनं**
चेतश्चूतं दुगपि कमलं जीवनं बन्धुजीवम्।

---

१ पचमोदञ्चनं। २ ०विष्कृत०। ३ ००यंगत्वा०। ४ अगारा०। ५ The word मुखं is dropped. ६ चोलमजाननोः। ७ प्रक्षित०। ८ सुखं। ९ ०मुखुं। १० निवासग्रह०। ११ तथाभूतै। १२ अस्त०। १३ मनोन्यं। १४ सक्ताक्षरं। १५ प्रक्षितं। १६ क्रियामिति।

आशासूत्रे ग्रथितमखिलं वेधसा तस्य भङ्गे
स्यादेतेषामपि निपतनं चण्डिमानं विमुञ्च ॥१९॥

ईर्ष्या[1]हेतुकमुदाहरति–**प्राणेशस्येति**। हे सखि। चण्डिमानं कान्तापराधजन्यमानम्। विमुञ्च। जहीहि। कुत इत्यपेक्षायामाह[2]–प्राणेशस्य त्वत्कान्तस्य। मनसि प्रेम मनःप्रेम स्नेहः। **प्रेमा ना प्रियता हार्दं प्रेम स्नेहोऽथ दोहदामि**(अमर०१/७/२७)त्यमरः। हेमप्रसूनम् सुवर्णकुसुमम्। प्रभवति तदूपेण परिणमतीत्यर्थः[3]। तथा चेतोऽन्तःकरणम् चूतमाम्रकुसुमम्। पुष्पमूलेषु बहुलमित्यलो लुक्। अपि च दृक् नेत्रकमलम्। तदूपमित्यर्थः। जीवनम् प्राणनम्। बन्धुजीवम्। **बन्धुको बन्धुजीवक** (अमर०२/४/७३)इत्यमरः। इदमखिलं कुसुमजातम्। वेधसा[4] ब्रह्मणा। आशासूत्रे ग्रथितम् आशारूपे सूत्रे रचितमित्यर्थः। तस्य भङ्गो आशासूत्रस्य[5] भङ्गे विच्छेदे सति। एतेषामपि पूर्वोक्तकुसुमानामपि निपतनं पातो भविष्यतीति। अतस्तदाशाभङ्गो न कर्त्तव्य इति भावः। वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। तस्याशाविच्छेदेन प्रेमादीनां भङ्गो भविष्यतीति वक्तव्ये भङ्ग्यन्तरेण[6] कथनात् पर्यायोक्तं रूपकानुप्राणित[7]–मित्यनयोस्तिलतण्डुलव[8]त्संसृष्टिः। मन्दाक्रान्तावृत्तम्॥ १९॥

शापाद्यथा–

अन्यत्र यदि निर्गन्तुमिच्छा निर्गच्छ दूरतः।
प्रियाविरहतापेन शापदग्धो भविष्यसि ॥२०॥

शापहेतुकस्योदाहरणमाह–**अन्यत्रेति**। अन्यत्र स्थलान्तरे। निर्गन्तुम् इच्छा यदि। तवेति[9]शेषः। तर्हि त्वं दूरतः दूरदेशे। सप्तम्यर्थे तसिल्। निर्गच्छ प्रयाहि[10]। कुत इत्यपेक्षायामाह–त्वं प्रिया[11]याः यो विरहः स्त्रीसम्बन्धीवियो[12]गस्तज्जन्यो यस्ताप[13]–स्तद्धेतुना शापेन दग्धः स्वेष्टावाप्तिरहितो भविष्यसि। यद्वा केनचित्[14] शप्तं पुरुषं प्रति तन्मित्रस्येयमुक्तिः। तव अन्यत्र स्थलान्तरे निर्गन्तुं प्रयातुं इच्छा यदि वाच्छा चेत्। स्त्रीसङ्गो तव मरणं भविष्यतीति शप्तस्य मे स्त्रीसान्निध्येऽपि किम् निष्फलस्थित्येति धिया गमनेच्छा चेदित्यर्थः। तर्हि दूरतः निर्गच्छ। दूर एव प्रयाहि न समीप इत्यर्थः। कुतः शापेन[15] दग्धो ज्वलितस्त्वम्। प्रियाविरहतापे

---

१ ईर्षा०। २ ०इत्यपेक्षायमाह। ३ परिणमतात्यर्थः। ४ विधसा। ५ तस्या भंगोनकुशासूत्रस्म। ६ भग्यंतरेण। ७ रुपकानुप्राणित०। ८ तिलतण्डुलवात्। ९ तवति। १० प्रियाहि। ११ प्रियाः। १२ स्त्रीसम्बन्धीयोग०। १३ यास्ताप०। १४ केनाचित्। १५ शार्पेन।

स्त्रीसन्धिविरहतापे जाते सति न भविष्यसि । शरीरमात्रेणाप्यवशिष्टो न भविष्यसीत्यर्थः । लोके हि गृहादिदाहे समीपस्थं दह्यते न दूरस्थम् तद्वदत्रापीति भावः। शापात् सम्भोगानुकूल्याभावेऽपीयम् त्वत्सान्निध्येनाऽऽत्मानं विनोदयिष्यतीति त्वयाऽन्यत्र न गन्तव्यमिति व्यज्यते । युग्मविपुलावृत्तम् । **यस्यां लः सप्तमो युग्मे सा युग्मविपुला मते**(वृ०र०२/२५)ति लक्षणात् ॥२०॥

समयाद्यथा–

विश्लेषजीवनव्रीडापीडाविप्लुतमानसा ।
तस्थौ प्रातः प्रियं प्रेक्ष्य चकी वकीकृताननां ॥२१॥

समयहेतुकस्योदाहरणमाह–**विश्लेषे**ति । विश्लेषे जीवनम् । तेन या व्रीडा तया पीडा । तया विधुरं विह्वलं मानसम् यस्याः सा तथाभूता । चकी रथाङ्गनामाङ्गना । कोकीति यावत् । प्रातः प्रातःसमये । प्रियं चक्रवाकं प्रेक्ष्य दृष्ट्वा । वक्रं तथाभूतं कृतम् आननम् यया सा एतादृशी सती तस्थौ । अस्मिन् व्याख्याने दूषणमुत्पाद्य प्रकारान्तरेण व्याख्यानमाहुराशाधरभट्टा गुरवः । तथा हि–परस्परानिष्ठायाः रतेराभासत्वमिति **काव्यप्रकाशे** निरूपणादस्य विप्रलम्भशृङ्गारोदाहरणानौचित्यमिति । प्रातः समये प्रियं प्रेक्ष्य काचिन्नायिकेति शेषः । चक्र्या चक्राकारभ्रमणेन वक्रीकृतं आननं यया सेति योजना । शेषं पूर्ववत् । युग्मविपुलावृत्तम् ॥२१॥$

दैवाद्यथा–

जीवने सति विश्लेषो विश्लेषे सति जीवनम् ।
द्वयोरप्यनयोर्यूनामहमेव निदर्शनम् ॥२२॥

दैवहेतुकविप्रलम्भशृङ्गारस्योदाहरणम् । दैवाद्वर्त्तत इति शेषः । द्वयोरप्यनयोरर्थयोर्विषये । अन्वादेशत्वादनादेशः । अहमेव निदर्शनम् दृष्टान्तः । यथा ममेदमुभयं दैवाज्जातम् तथा कयोश्चित्स्त्रीपुंसयोरिति भावः । युग्मविपुलावृत्तम् ॥२२॥

विद्धराद्यथा–

---

१ शरीरमात्रेणप्यवशिष्टो । २ तद्वत्रापीति । ३ त्वत्सान्निध्यना । ४ तस्यौ ।
५ बाला प्रिये पातः प्रेक्ष्य वक्रीकृतानना । ६ विहलं । ७ अवक्तं । ८ कृते ।
९ राशापरभट्टा० । १० ०कृते । ११ निदर्शन । १२ ०दाहरणनं । १३ द्विद्धराद्यथा ।

$ The scribe has added the word श्रीॐम् here.

केलीगृहे वा मणिमन्दिरे वा शशाम लङ्कानगरे हुताशः[1] ।
इतस्ततः प्रस्थितयोर्न यूनोर्वियोगजन्मा विरराम वह्निः ॥२३॥

इतिश्री भानुदत्तविरचितायां रसतरङ्गिण्यां शृङ्गारनिरूपणं
नाम षष्ठस्तरङ्गः[2]॥६॥

विड्वरहेतुकस्योदाहरणमाह-विड्वरशब्दो भाषाशब्दः। इंगालशब्दवत् । **केलीगृह** इति । लङ्कानगरे विषये । केलीगृहे नर्मसदने । तथा मणिमन्दिरे मणिबद्धगृहे । हुताशोऽग्निः । हनुमता प्रक्षिप्त इति शेषः । शशाम विरराम[3] । इतस्ततः[4] क्वचित्-क्वचित्प्रस्थितयोः। यूनोः सामान्याभिप्रायमेतत् । वह्निदाहोपद्रवात् सर्वत्र पलायितानां स्त्रीपुरुषाणामित्यर्थः । वियोगजन्माः वह्निः । विरहजन्योऽग्निः । न विरराम न शशाम । विरहजन्यतापे वह्नित्वारोपादूपकातिशयोक्तिः । इन्द्रवज्रावृत्तम् ॥२३॥

इतिश्रीमहोपाध्यायावटङ्कानन्दरामभट्टात्मजभगवद्भट्टविरचितायाम्
रसतरङ्गिणीव्याख्यायां नूतनतरीसमाख्यायां
शृङ्गारनिरूपणं नाम षष्ठस्तरङ्गः[5] ॥६॥

---

१ हताशः । २ षष्टमस्त० । ३ विररामं । ४ इतिस्तुतः । ५ षष्टमस्तरंगः ।

॥ सप्तमस्तरङ्गः ॥

हासस्य परिपोषो हास्यः । वर्णोऽस्य शुक्लः । दैवतं माया । स च द्विविधः– स्वनिष्ठः परनिष्ठश्च । तावप्युत्तममध्यमाधमभेदात्त्रिविध[1] इति षड्विधः। स्वनिष्ठोऽपि षड्विधः । एवं परनिष्ठोऽपि इति द्वादशभेदो हास्यः । तथा हि उत्तमानां स्वनिष्ठे परनिष्ठे च स्मितहसिते । मध्यमानां स्वनिष्ठे परनिष्ठे विहसितोपहसिते[2] अधमानां स्वनिष्ठे परनिष्ठे चापहसितातिहसिते[3] । उत्तमानामीषद्विकसितकपोलमव्यक्तदशनमपाङ्गसुष्ठु वीक्षितं स्मितम् । स्वनिष्ठं परनिष्ठं च । उत्तमानां विकसितकपोलमुत्फुल्लाननमीषल्लक्षितदन्तहसित[4] स्वनिष्ठं परनिष्ठं च। मध्यमानां समयोचितमुत्तमस्वनमाकुञ्चितमुखमाविर्भवदनुरागं विहसितं स्वनिष्ठं परनिष्ठं च । मध्यमानां उत्फुल्ल[5]नासापुटं कुटिलदृष्टिवीक्षित[6] कुञ्चितग्रीवं स्फुटतरस्वनमुपहसितं स्वनिष्ठं परनिष्ठं च । अधमानां उद्यदश्रुकम्पितमौलिस्फुटतरस्वनमपहसितं स्वनिष्ठं परनिष्ठं च । अधमानामत्युद्धत[7]मतिबहुलाश्रुस्फुटतरस्वनमाश्लिष्टपार्श्वजनमारब्धकरतलमतिहसितं स्वनिष्ठं परनिष्ठं च।

अथ शृङ्गारं निरूप्य हास्यं निरूपयति– **हासस्येति** । स्थायितो हासस्य पुष्टेर्हास्यरसाभि[8]व्यक्तिरित्यर्थः । एवं सर्वेषु रसेषु तत्तत्स्थायिपरिपोषात्तत्तद्रसाभिव्यक्तिरित्यवधेयम् । तद्भेदानाह– **स्वनिष्ठोऽपीति** । स्वनिष्ठोऽपि च प्रत्येकं स्मितहसितादिभेदद्वयेन द्वादशविधो[9] भवति । **तथाहि** इति । तानेव भेदान् दर्शयति । उत्तमानां स्वनिष्ठे स्मितमित्येको भेदः । उत्तमानां परनिष्ठहसितमिति चतुर्थो भेदः इति उत्तमानां चत्वारो भेदाः । मध्यमानां स्वनिष्ठम् विहसितमित्येको भेदः । मध्यमानां स्वनिष्ठमुपहसितमिति द्वितीयो भेदः । मध्यमा[10]नां परनिष्ठं विहसितमिति तृतीयो भेदः । मध्यमानां परनिष्ठमुपहसितमिति चतुर्थो भेदः इति मध्यमानां चत्वारो भेदाः। अधमानां परनिष्ठमुपहसितमिति तृतीयः । अधमानां परनिष्ठमतिहसितमिति चतुर्थः। इत्यधमानां चत्वारो भेदाः । एवं सकलतायां द्वादशभेदाः भवन्ति । उत्तमादिसम्बन्धिनां स्वनिष्ठपरनिष्ठ[11]स्मितादीनां स्वरूपमाह– **उत्तमानामिति**।

---

१ भेदात्त्रिविधचा २ विहसितोपहपरनिष्टेते । ३ स्वनिष्टेसिचन्न० । ४ ०दतहसितं । ५ उत्फल्ल०।
६ ०वीक्षितुं । ७ ०मत्युधत०। ८ हास्यरसौसाभि० । ९ द्वादशविद्या । १०अध्यमध्य०। ११०परिनिष्ठ० ।

उत्तमानां स्वनिष्ठं परनिष्ठं[1] च स्मितम् ईषद्विकसितकपोलमित्यादिविशेषण-विशिष्टं भवति । हसितं च विकसितकपोलमुत्फुल्लेत्यादिविशेषणविशिष्टं भवतीत्यर्थः । तथा मध्यमानां स्वनिष्ठं परनिष्ठं च विहसितं समयोचितमित्यादि विशेषणविशिष्टं भवति । उपहसितं चोत्फुल्लनासापुटमित्यादि[2]विशेषणविशिष्टं भवतीत्यर्थः । तथाऽधमानां स्वनिष्ठं परनिष्ठं चापहसितमुद्भसितमित्यादिविशेषण-विशिष्टं भवति । तथाभूतमतिहसितं चात्युद्धतमित्यादिविशेषणविशिष्टं भवतीत्यर्थः। अथोत्तमादीनां स्मितहसितविहसितोपहसितापहसितातिहसितानां षण्णां क्रमेण स्वनिष्ठपरनिष्ठभेदाभ्यामुदाहरणानि । तत्रादौ श्लोकद्वयेन स्वनिष्ठपरनिष्ठ-स्मितहसितयोरेकेन श्लोकेन परनिष्ठस्मितहसितयोश्चोदाहरणमाह–

स्वनिष्ठं स्मितं तद्यथा–

लेखनीमित इतो विलोकयन् कुत्र कुत्र न जगाम पद्मभूः ।
तां पुनः श्रवणसीम्नि संस्थितां[*3] प्राप्य सन्नतमुखः स्मितं दधौ ॥१॥

स्वनिष्ठस्मितमुदाहरति–**लेखनीमिति** । पद्मभूः ब्रह्मा । लिख्यतेऽनयेति लेखनी । ताम् । अक्षरलेखनशलाकाम्[3] । इत इत अस्मिन् अस्मिन् प्रदेशे भविष्यतीति । विलोकयन् विलोकयितुम् । कुत्र कुत्र स्थले न जगाम । अपि तु सर्वत्रेत्यर्थः । लटः शत्रादेशः । पुनःपश्चात् श्रवणसीम्नि कर्णप्रदेशे । योजितां[*4] स्थापिताम्[4] । तां लेखनीं प्राप्य लब्ध्वा । नतमुखः नुन्नास्यः सन् । यद्वा सम्यक् नतमुखम् यस्य स एतादृशः सन् । स्मितं दधौ हास्यं चकारेत्यर्थः । रथोद्धतावृत्तम् ॥१॥

स्वनिष्ठहसितं यथा–

रोमाङ्कुरं व्योमगतं रदाग्रमुग्रद्युतिं स्वीयमुदीक्ष्य विष्णोः ।
यदास हास्यं किमु तत्पयोधावद्यापि फेनस्तबकायमानम्॥२॥

स्वनिष्ठहसितस्योदाहरणमाह–**रोमाङ्कुरमिति** । स्वीयं स्वकीयम् । विष्णुसम्बन्धी-त्यर्थः । रोमाङ्कुरम् शरीरलोमाङ्कुरम् । व्योमगतम् आकाशगतम् । तथा रदाग्रम् । दशनाग्रम् । उग्रद्युतिम् प्रचण्डम् । उदीक्ष्य दृष्ट्वा । विष्णोर्नारायणस्य । यत् हास्यं आस बभूव । तत् हास्यम् अद्यापि सम्प्रति । पयोधौ समुद्रविषये[5] । फेनः स्तबक इवाचरते इति तथाभूतम् फेनस्तबकायमानम् किमु । अत्र हास्ये फेनस्तबक-

---

१ परिनिष्ठं । २ ०कपोलयासित्यादि०। ३ ०शल्कम् । ४ स्यापिताम् । ५ समद्रेविषये ।

सादृश्योत्प्रेक्षणादुक्ता स्याद्[1] वस्तूत्प्रेक्षा इन्द्रवज्रावृत्तम् ॥२॥

परनिष्ठं स्मितं हसितं यथा–

हरवृषभमुखे सखेलमायोजयति सुवर्णसवर्णकान्तिपर्णम् ।
दृशि भुजगपतेःशिशुः षडास्यः कलयति कज्जलमन्तिके भवान्याः॥३॥

पूर्वार्धे परनिष्ठस्मितस्योत्तरार्धे परनिष्ठहसितस्योदाहरणमाह–**हरवृषभेति** । शिशु–रजातदशनः षडास्यः स्वामिकार्त्तिकः भवान्याः पार्वत्याः अन्तिके समीपे[2] स्थितः सन् । हरवृषभमुखे शिवनन्दीवदने । पर्णम् पक्वपत्रम् । आयोजयति । निवेशयते । किञ्च भुजगपतेः शेषस्य । दृशि नेत्रे । कज्जलं कलयति रचयति । अत्रोभयत्रापि विभावमात्रौ निबद्धौ । अनुभावव्यभिचारिणौ तु न निबद्धौ तथाप्याक्षेपलभ्यौ बोध्यौ[3]। विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति भरतसूत्रोक्तेरिति[4] । एषां त्रयाणां मध्ये यस्यैकस्य द्वयोर्वानुपादानं तस्याध्याहारः कर्तव्य[5] इति निर्णीतं **भूदेवशुक्लेन रसविलासे** । स्मितपूर्वम् वृषभमुखे शुष्कपर्णनिवेशनरूपां च चेष्टां कुर्वन्तम्[6] पुत्रं दृष्ट्वा पार्वत्या[7]ः स्मितहसिते जाते इति भावः । पुष्पिताग्रावृत्तम् ॥३॥

परनिष्ठं विहसितं यथा–

निशा सुतैलस्य धिया गृहीतैर्मषीजलैर्लिप्तमुखारविन्दम् ।
गोपं प्रभाते स्खलदश्रुनीरमधीरनादं जहसुस्तरुण्यः ॥४॥

परनिष्ठविहसित[8]स्योदाहरणमाह– **निशेति** । तरुण्यो गोपवध्वः । निशायां रात्र्याम् । सुतैलस्य सुगन्धितैलस्य । धिया भ्रान्त्येत्यर्थः । हेतौ तृतीया । गृहीतैः करे[9] धृतैः । मषीजलैः[10]। करणे तृतीया । धनाढ्यगृहे उष्ट्रिकायाम् सुगन्धितैलादिकं भवतीति लोकप्रसिद्धिः । तैः कृत्वा लिप्तमुखारविन्दं यस्य तम् गोपम् श्रीकृष्णम् । प्रभाते प्रातःकाले स्खलन्ति अश्रु[11]नीराणि यस्यां क्रियाया[12]म्। तथा अधीरो महान्[13] नादो यस्यां क्रिया[14]यां तथा जहसुः । मषीलेपे[15]नातिकृष्णवदनं कृष्णम् वीक्ष्य हास्यं चक्रुरित्यर्थः । अत्र निशासु इति पदच्छेदमाहु[16]ः केचित्तन्मन्दमाभाति न सर्वदा रात्रिषु मषीजलेन मुखलेपस्तस्य कदाचित्कत्वात् । भ्रान्तिमदलङ्कारः । उपजातिवृत्तम् ॥४॥

---

१ स्यदा० । २ समीपो । ३ बौध्यौ । ४ विभावानुभाव्यभि० । ५ कर्त्तव्या । ६ कुर्वंते ।
७ पार्वत्या । ८ ०विहांसित०। ९ करो । १० मशीजलैः । ११ अत्रु० । १२ क्रियाणाम् । १३ महान ।
१४ क्रियां । १५ मशीलेयेना० । १६ यदछेदमाहुः ।

उपहसितं परनिष्ठं यथा–

यो निरोधो मयारब्ध[1] इति पद्यं पठन् बुधः ।
शश्वदुत्फुल्ल[2]नासेन तटस्थेनोपहस्यते ॥५॥

परनिष्ठोपहसितमाह– **यो निरोध** इति । मया कर्ता । यः निरोधः परोपमर्द[3]ः निरोधः परपीडनमित्यभिधानात् । आरब्धः उपक्रान्तः इति एतावदेव पद्यम् । श्लोक– चतुर्थांशपठन् उच्चरन् बुधः पण्डितः कर्म । शश्वत् चिरकालम् । उत्फुल्ला नासा यस्य सः । तथाभूतेन तटस्थेन केनचित्[4] पुंसा । उपहस्यते । योनिरोधो भगरोध इत्यपरार्थं श्लेषेन परिकल्प्योपहसितमिति[5] भावः । अत्रोत्फुल्लेत्यत्र[6] **अनुपसर्गात्फुल्लक्षीबे**(पा०अ०८/२/५५)त्यादिना निषेधेऽपि **उत्फुल्लसंफुल्लयोरुपसङ्ख्यानमि**(का०वा०)ति वार्त्तिकान्निपातः । **लोध्रद्रुमं[7] सानुमतः प्रफुल्लमि**(रघु०२/२९)ति **रघुकाव्ये** प्रयोगस्तु प्रफुल्लतीति प्रफुल्ल इति पचाद्यचि सिद्धः । वक्रोक्त्यलङ्कारः । **वक्रोक्तिः श्लेषकाकुभ्यामपरार्थप्रकल्पनमि**(कुव०१५९)ति ॥५॥

अपहसितं परनिष्ठं यथा–

रतोत्सवे वल्लुभयज्ञसूत्रं कण्ठावसक्तं परिमोचयन्तीम् ।
द्विजाङ्गनां दीर्घतरं श्वसन्तीं तारस्वरं वारवधूर्जहास ॥६॥

परनिष्ठस्यातिहसितस्योदाहरण[9]माह[10]–**रतोत्सव** इति । वारवधूः वेश्या । रतोत्सवे सुरतक्रीडायाम् विषये[11] । वल्लुभस्य प्रियस्य । यज्ञसूत्रं यज्ञोपवीतम् । निजकम्बललग्नमिति शेषः । परिमोचयति सा परिमोचयन्ती ताम् । हेतुमणिजन्ताम् शतरिङीष् । द्विजाङ्गनाम् विप्रवधूम् । दीर्घतरम् अत्यन्तम् । श्वसन्तीम्[12] वीक्ष्येति शेषः । तारः प्रचण्डः स्वरो ध्वनिर्यस्यां क्रियायां यथा जहास[13] । उपजाति[14]वृत्तम् ॥६॥

अतिहसितं परनिष्ठम् यथा–

चौरः कामरिपोर्गृहं निशि गतः शूलं कपालं वहन्[15]*
बीजं धूर्त्तफलस्य तण्डुलधिया नीत्वा पुनर्भुक्तवान्[16] ।
व्याक्ल्गन्[17]प्रचलन्स्खलन्परिपतन्मुह्यन्विघूर्णन्वम[18]–
न्नट्टाट्टध्वनिमौलिमुक्तकुसुमं स्वर्वेश्यया हस्यते ॥७॥

---

१ मयालब्ध । २ शश्वदुत्फल्ल० । ३ परोपभवेर्द्रुः । ४ केचित् । ५ परिकल्यो० । ६ अत्रेत्फुल्लो० । ७ ०सफुल्लयो० । ८ रोधद्रुमं । ९ परनिष्ठाहसित० । १० ०हरणमाहा । ११ विप्रये । १२ श्वसंता । १३ जहासा ।१४ उपजति० । १५ वहनम् । १६ नीत्वार्भुक्तवान् । १७ व्यालान् । १८ ०स्स्खलपरिपतन् ।

परनिष्ठस्यातिहसितस्योदाहरणमाह– **चौर** इति । कामरिपोः शिवस्य । गृहम् । निशि रात्रौ गतः । चौर्यं कर्तुं प्रवृत्त इत्यर्थः चौरः एव चौरः स्वार्थेऽण् । शूलं च परं कपालं भिक्षापात्रम् । हरन् गृह्णन् । च परं धूर्त्तस्य यत्फलम् तस्य यद् बीजम् । **उन्मत्तः कितवो धूर्त्तो धत्तूरः कनकाह्वय**(अमर०२/४/७७)इत्यमरः। तण्डुलधिया तण्डुल–भ्रमेण । नीत्वा हृत्वा । पुनरनन्तरम् । भुङ्क्ते इति भुक्तवान् । व्रियन्ते लुट्यन्ते तन्यन्ते ताड्यन्ते वा तण्डुलाः संस्कृताः शालयः । **वृञ्लुटितनितण्डिभ्यउलच्** (उणादि०६९७)इत्युणादिदशपाद्यामुलच् प्रत्यये रूपम् । यद्यपि पञ्चपाद्यां निपातित–स्तथापि स्वरार्थं व्युत्पादनमिति । ततो व्यावल्गन् वल्गनां कुर्वन् । तथा प्रचलन् । तथा स्खलन् । तथा परिपतन् । तथा मुह्यन् । तथा विघूर्णन् । तथा विशन् । एतादृशः सन् दृष्टः इति शेषः । ततः स्वर्वेश्यया । कर्त्तरि तृतीया । अट्टाट्टोऽतिप्रखरो ध्वनिः । शब्दो यस्यां क्रियायाम् । तथा मुक्तानि पतितानि मौलिकुसुमानि यस्यां क्रियाया–मिति । हस्यते यद्वा । अट्टाट्टध्वनिः । तथा मुक्तमौलिकुसुमम् । यथा तथा विशन् इति योजना । कनकबीजभक्षणजन्यमत्र वातिहसन्तं चौरं दृष्ट्वा स्वर्वेश्ययाप्यति–हसितमिति भावः । शार्दूलविक्रीडितम् ॥७॥

शोकस्य परिपोषःकरुणः। आशाविच्छेदे सति सर्वेन्द्रियक्लम्मो वा करुणः । न च विप्रलम्भेऽतिव्याप्तिः । तत्रेष्टाशायाः सत्त्वात् । तद्विच्छेदे सति स च विप्रलम्भः करुण एव । शोको दुःखम् । वर्णोऽस्य कपोतचित्रितः । दैवतं वरुणः । स च करुणः स्वनिष्ठः परनिष्ठश्चेति । स्वशापस्वबन्धन–स्वक्लेशस्वानिष्टैर्विभावैः स्वनिष्ठः । परेष्टनाशपरबन्धनपरक्लेशादीनां दर्शनश्रवणस्मरणविभावैः परनिष्ठः । स्वनिष्ठो यथा–

तव नाथ शरः शरासनं तव देहेन सहैव भस्मसात् ।
अहमस्मि ततः प्रतीयते तव नास्मीति किमुच्यतामतः ॥८॥ +

एवं द्वादशविधं हास्यं निरूप्य करुणरसं निरूपयितुं तल्लक्षणमाह–**शोक** इति । शोकस्य दुःखस्य परिपोषः सम्पूर्णा पुष्टिः करुणरसो ज्ञेयः। अथ लक्षणस्य लक्षणा–**न्तर**ादूषकत्वाल्लक्षणान्तरमाह–**आशाविच्छेद** इति ।विप्रलम्भशृङ्गारे स्वामिजीविता–शासत्त्वम् करुणे तु न स्वाम्यादिजीविताशेति भेदो बोध्यः। शेषं मूले स्पष्टम् ।

१ चोर । २ भुक्ते । ३ इत्युणादिदपाद्य०। ४ व्याबलान् । ५ सबलन् । ६ सर्वेश्यया ।
७ ०विभवैः । ८ निरुपयितं । + Not traced out in कुमारसम्भवम्

अस्यापि स्वनिष्ठपरनिष्ठभेदेन[1] द्वैविध्यम्। स्वनिष्ठस्योदाहरणमाह- **तव नाथेति**[2]। **कुमारसम्भवे** कामदाहावसरे रतेरियमुक्तिः। हे नाथ स्वामिन्। शरो बाणः। शरासनं धनुः। तवैव[3] त्वदीयमेवेत्यर्थः। कुत इत्यपेक्षायामाह- यतस्तव देहेन सहैव भस्मसात्। सर्वं भस्म जातमित्यर्थः। कात्स्न्र्ये सा[4]ः। अतो हेतोः। अहमस्मच्छब्दवाच्या रतिः। अस्मि जीवितास्मीत्यर्थः। तेन हेतुना तव नास्मि त्वदीया न भवामीति प्रतीयते। अनुमानं दर्शयति। शरशरासने[5] कामसम्बन्धिनी। कामदाहे तद्दाहात् व्यतिरेकेण यथा- रतिः। रतिः कामसम्बन्धित्वाभाववती कामदाहे तद्दाहाभावात्। अन्वयदृष्टान्तेन यथा- **शरशरासने** इति। अत्रानुमानालङ्कारः। अनुमानं तदुक्तं यत्साध्यसाधनयोर्वच इति लक्षणात्। यत्र प्रसिद्धसाहचर्यनियमरूपा व्याप्तिस्तत्रानुमानप्रामाण्यम्। यत्र कविकल्पित-चमत्कृत्य[6]व्याप्तिस्तत्रानुमानालङ्कारः इति विवेचितम्[7] श्रीवत्सलाञ्छनेन। केचितु काव्यलिङ्गमेतदित्याहुः। वैतालीयं छन्दः ॥८॥

परनिष्ठो यथा- अनुवनमनुयान्तं बाष्पवारित्यजन्तं[8] [9]
मृदितकमलदामक्षाममालोक्य रामम्।
दिनमपि रविरोचिस्तापमन्तः प्रसूते
रजनिरपि च धत्ते तारकाबाष्पबिन्दून् ॥९॥

परनिष्ठ[10]स्योदाहरणमाह-**अनुवनमिति**। वने इति अनुवनम्। विभक्त्यर्थेऽव्ययीभावः। अनुयान्तं गच्छन्तम्। सीतान्वेषणार्थ[11]मित्यर्थः। बाष्पवारि अश्रुजलम्। त्यजन्तम्। सीतासमागमाशाविच्छेदेन दुःखोद्रेकाद्रुदन्तमित्यर्थः। मृदितं यत्कमलदाम[12] पद्म-मालिका तद्वत् क्षामम् कृशम्। रामम् दशरथात्मजम्। विलोक्य दृष्ट्वा। दिनमपि[13] दिवसोऽपि। रवेः सूर्यस्य। रोचिस्तेजस्तदेव तापः सन्तापस्तम्। अन्तर्मनसि प्रसूते जनयति। च परम् रजनिरपि रात्रिरपि। तारका एव बाष्पबिन्दवोऽश्रुकणास्तान्। धत्ते धारयति। अत्र दिनरजन्योस्तापतारकाधारणे स्वतः सिद्धे अपि रामदुःखा-वलोकनस्य हेतुत्वोत्प्रेक्षणाद्धेतूत्प्रेक्षा। सा च रविरोचिषि[14] सन्तापत्वारोपात्तारकासु बाष्पबिन्दुत्वारोपाच्च रूपकातिशयोक्त्य[15]नुप्राणितेत्यनयोरङ्गाङ्गीभावः सङ्करः।

---

१ ०भेदन। २ नार्येति। ३ तवैक। ४ कात्स्न्र्नेसाः। ५ शरशरशरासने। ६ ०चमकृत्यात्याप्ति०। ७ चिवेचिनं। ८ बाष्पवठी। ९ त्यजतं। १० परिनिष्ठ०। ११ सीतान्वेषेणार्थ। १२ कमलदास०। १३ प्रसूयते। १४ रविरोचिबिसं०। १५ रूपकातिशयोचानु०।

मालिनीवृत्तम् ॥९॥

परिपूर्णः क्रोधो रौद्रः । सर्वेन्द्रियाणामौद्धत्यं वा । वर्णोऽस्य रक्तः । दैवतं रुद्रः। यथा–

चण्डांशुः किन्न चक्रं भुजगपतिरसौ वर्त्तते किं न पाशः
कुन्ताः किं दन्तिदन्ता न च गिरिरशनिः किं न शस्त्रैः किमन्यैः ।
भीमोऽहं दुष्टदुर्योधननिधनसमुद्दण्डबाहुप्रकाण्डः
प्रत्यावृत्तिप्रकोपप्रलयहुतवहो नास्मि कस्यापि वश्यः ॥१०॥

यथा वा–

क्रीडोत्तुङ्गतुरङ्गटापपटलीखर्वीकृतोर्वीधर–
श्रेणिस्फूर्जितधूलिधोरणितमस्तोमावलीढं जगत् ।
बद्धस्कन्धकरीन्द्रवृन्दचरणाव्याभुग्नभोगीश्वर–
व्यग्रोदग्रशिरोग्ररत्नरुचिभिर्विद्योतयामो वयम् ॥११॥

रौद्ररसस्योदाहरणमाह– **चण्डांशुरिति** । चण्डांशुः सूर्यः । चक्रं न वर्त्तते किम् ? अपि तु वर्तत एवेत्यर्थः । किञ्च– असौ तु भुजगपतिः शेषः । पाशः न वर्त्तते किम् ? तथा दन्तिदन्ताः हस्तिरदाः कुन्ताः न किम् ? अपि तु वर्तन्त एव । गिरिः पर्वतः । अशनिर्वज्रं न किम् ? अन्यैः लोकप्रसिद्धैः शस्त्रैरायुधैः किं साध्यम् ? न किञ्चिदित्यर्थः । करणे तृतीया । किञ्च दुष्टो यो दुर्योधनस्तस्य यन्निधनं नाशस्तस्मै समुद्दण्डौ प्रचण्डौ यौ बाहुप्रकाण्डौ स्तम्भसदृशौ हस्तौ ताभ्यां प्रतिवर्त्तितः अन्तर्भावितव्यर्थोऽयं प्रकोपः । क्रोध एव प्रलयहुतवहः सङ्कर्षणाग्निर्येन स तथा–भूतः। **अस्त्री प्रकाण्डः स्कन्धस्यान्मूलाच्छाखावधिस्तरोरि**(अमर०२/४/१०)त्यमरः। भीमो भीमसेनोऽहम् कस्यापि वश्यो नास्मि । न कस्याप्यधीनो भवामीत्यर्थः । **वशंगत**(पा०अ०४/४/८६)इति यत्प्रत्ययः । स्रग्धरावृत्तम् ॥१०॥ रौद्ररसस्योदाहरणमाह–**क्रीडेति** । क्रीडया उतुङ्गा ये तुरङ्गास्तेषां याः टापपटल्यः खुराघात–श्रेणयस्ताभिः खर्वीकृताः न्यक्कृता ये उर्वीधराः पर्वतास्तेषां याः श्रेण्यस्ताभ्यः स्फूर्जिता उत्पतिता या धूलयः तासां धोरणिः श्रेणिः । सैव तमस्तोम अन्धकारपटलं तेनावलीढं व्याप्तं जगत् । कर्म वयम् । बद्धस्कन्धाः ये करीन्द्रा मातङ्गास्तेषां यद्–

---

१ रौद्ररस्यो० २ जगपतिः । ३ एक । ४ किञ्चि । ५ बाहुप्रकालौ । ६ व्यास्मि । ७ तेनावलीहेढं । ८ बत्धस्यधार्ये ।

वृन्दं[1] पटलम् तस्य ये चरणाः पादास्तैर्व्याभुग्नो नम्नीकृतो भोगीश्वरः शेषस्तस्य व्यग्रा[2] उदग्रा या फणास्तासां[3] यदुग्रं (शिरः)तत्र यानि रत्नानि। तेषां या रुचयस्ताभिः कृत्वा विद्योतयामः प्रकाशयामः । अत्र सन्नद्धं कौरवसैन्येत्यमरः[4]।(.....)[**]आकर्ण्य क्रुद्धस्य भीमसेनस्येयमुक्तिः। शार्दूलविक्रीडितम् ॥११॥

परिपूर्ण उत्साहः सर्वेन्द्रियप्रहर्षो वा वीरः। वर्णोऽस्य गौरः। दैवतं शक्रः। स च युद्धवीरदानवीरदयावीरभेदात्त्रिधा[5]। इयांस्तुविशेषः। स चोत्साहो[6] युद्धवीरे प्रतापाध्यवसायादिप्रभवः। दानवीरे दानसामर्थ्यादिप्रभवः[7]। दयावीरे आर्द्रताध्यवसायादिप्रभवः। अत एव पुत्रजन्मनि नातिव्याप्तिः। युद्धवीरो यथा–

सङ्ग्रामाङ्गणमागते दशमुखे सौमित्रिणा विस्मितं
सुग्रीवेण विचिन्तितं हनुमता व्यालोलमालोकितम्।
श्रीरामेण परन्तु पीनपुलकस्फूर्जत्कपोलश्रिया
सान्द्रानन्दरसालसा निदधिरे बाणासने दृष्टयः ॥१२॥

वीररसलक्षणमाह – **परिपूर्ण** इति । अस्य युद्धवीरदानवीरदयावीरभेदात्त्रैविध्यं ज्ञेयम्। तत्रादौ[9] युद्धवीरस्योदाहरणमाह– **सङ्ग्रामेति**। दशमुखे रावणे। सङ्ग्रामाङ्गणम् रणाङ्गणम्। आगते प्राप्ते सति। **यस्य च भावेना**(पा०अ०२/३/३७)दिना[10] सप्तमी। सौमित्रिणा लक्ष्मणेन। विस्मितम्। भावे क्तः। तथा सुग्रीवेण विचिन्तितम् विचारितम्। तथा हनुमता आञ्जनेयेन व्यालोलं चञ्चलं यथा तथालोकि विलोकितम्। **चिण् भावकर्मणो** (पा०अ०३/१/६६)रिति भावे चिण्। **चिणो लुगि**(पा०अ०६/४/१०४)ति लक्ष्मणादीनां भयसूचिका चेष्टा जातेत्यर्थः। परं तदनन्तरम्। पीनाः पुष्टा ये पुलका रोमाञ्चादयस्तैः[11] स्फूर्जन्ती स्फूरद्गुणकपोलश्रीर्यस्य स[12] तथाभूतेन श्रीरामेण तु शरासने धनुषि विषये। सान्द्रः परिपूर्णो य आनन्दरसः। युद्धोत्साहरस– स्तेन अलसा मन्थराः दृष्टयः व्यापारा निदधिरे निर्मिताः। युद्धोद्यतं रावणं वीक्ष्य हेलया धनुषोऽवलोकनेन रामस्य निर्भीकता[13] धीरोद्धतता च व्यज्यते[14]।

शार्दूलविक्रीडितम् ॥१२॥

---

१ यद्वृदं। २ व्यवग्रा। ३ फग्णस्तासां। ४ some text missing. the sentence incompatible to context. ५ ०भेदत्त्रिधा। ६ सचत्साहो। ७ वानाध्यवसायादिप्रभवः। ८ ०दयावार०। ९ नत्रात्रदौ। १० यस्य च भावेसादिना। ११ रोमाञ्चाचदयस्तै। १२ परिषुर्णो १३ निर्भीकला। १४ व्यञ्जते।

**some text missing here. it is a case of *lacuna*.

दानवीरो यथा–

अभ्यागच्छति मन्दिरं द्विजकुले खण्डाय खण्डाम्बुधिं
क्षाराब्धिं लवणाय दुग्धजलधिं दुग्धाय चेद्दास्यति।
दुर्वारो विरहो भवेदिति भियां[1] दीनेव दिव्यापगा
यस्याङ्घ्रिं न जहाति विप्रवपुषे रामाय तस्मै नमः ॥१३॥

दानवीरस्योदाहरणमाह– **अभ्यागच्छती**ति। द्विजकुले विप्रवृन्दे। मन्दिरम् निजाश्रमम्। अभ्यागच्छति सति खण्डाय शर्करार्थम् खण्डाब्धिं इक्षुरसोदधिम्। लवणाय। **लूञ् छेदने**(धा०पा०१४८४)इति धातोर्नन्दादित्वात्[2] ल्युः गणे निपातनात् णत्वम्। क्षाराब्धिम् लवणार्णवम्। तथा दुग्धाय पयसे दुग्धाम्बुधिं क्षीरसमुद्रं चेद् यदि दास्यति तदा दुर्वारो दुःसहो विरहः पतिवियोगो भवेत् इति भिया भयेन दीना इव खिन्नेव दिव्यापगा स्वर्धुनि। यस्य भार्गवस्य विष्णोः। अङ्घ्रिम् चरणम्[3] न जहाति। न त्यजति। तस्मै विष्णुरूपिणे रामाय परशुरामाय नमः। अत्र दैन्यहेतोर्भयस्यासिद्धत्वादसिद्धास्पदाहेतूत्प्रेक्षा। शार्दूलविक्रीडितम् ॥१३॥

दयावीरो यथा –

दयाबीजं हरेर्नेत्रमङ्कुरस्तत्र भास्करः।
ततः समुत्थितावेतौ पल्लवौ रामलक्ष्मणौ ॥१४॥

दयावीरस्योदाहरणमाह–**दयाबीजमि**ति। हरेर्विष्णोर्नेत्रं नयनम्। दयाबीजं करुणाकारणम्। वर्त्तत इति शेषः। तत्र बीजे भास्करः सूर्यः अङ्कुरः प्ररोहः। दक्षिणनेत्रस्य सूर्यात्मकत्वादित्यर्थः। ततो भास्कराङ्कुरात्। एतौ रामलक्ष्मणौ। **अल्पाच्तर**[4] (पा०अ०२/२/३४)पूर्वमिति रामशब्दस्य पूर्वनिपातः। पल्लवौ प्रवालौ। समुत्थितौ समुत्पन्नौ। **उदःस्थास्तम्भो**[5](पा०अ०८/४/६१)रिति सलोपः। पौलस्त्यपराभवापन्नानां सुरस्त्रीणां दयया दुःखदारणाय रामलक्ष्मणौ जाताविति भावः। अत्र रूपकमलङ्कारः। **रसविलासे** तु दयावीरस्य स्पष्टमेवोदाहरणम्[6]। तथाहि–

तथेति गामुक्तवते दिलीपः सद्य प्रतिष्टम्भविमुक्तबाहुः।
संन्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्येति[7]॥

(रघु०२/५९)

---

१ भया। २ धातोर्नदादि०। ३ चरणाम्। ४ अल्पाचतरं। ५ उदस्यास्तंभोरिति। ६ स्पष्टतामेवो०। ७ ०मिवमिषस्येति।

भयस्य परिपोषः सर्वेन्द्रियविक्षोभो भयानकः । वर्णः श्यामः । दैवतं यमः ।
स च स्वनिष्ठ परनिष्ठश्च । अपराधात् स्वनिष्ठो यथा–

गोपीक्षीरघटीविलुंठनविधिव्यापारवार्ताविदोः
पित्रोस्ताडनशङ्क्या शिशुवपुर्देवः प्रकाश्य ज्वरम् ।
रोमाञ्चं रचयन् दृशो मुकुलयन् प्रत्यङ्गमुत्कम्पयन्
सीत्कुर्वन् तमसि प्रसर्पति गृहं स्वीयं समागच्छति ॥१५॥

भयानकस्य लक्षणमाह–**भयस्ये**ति । अयमपि स्वनिष्ठपरनिष्ठभेदेन द्विविधः । स्वनिष्ठभयानकरसस्योदाहरणमाह– **गोपी**ति । शिशुवपुर्बालमूर्तिः । देवः श्रीकृष्णः । गोपी राधिका । तस्याः क्षीरघटी दुग्धघटः । तस्या विलुंठन[1]विधिर्हठात् हरणविधानं स एव व्यापारस्तस्य या वार्ता तां विदस्तौ[2] । तथाभूतयोः पित्रोर्नन्दयशोदयोः । ताडनशङ्क्या[3] प्रहरणभिया । ज्वरं प्रकाश्य । रोमाञ्चं रचयन् । तथा दृशो मुकुलयन् । प्रत्यङ्गवीप्सायामव्ययीभावः । उत्कम्पयन् । तथा सीत्कुर्वन् । सीत्कारं कुर्वन् । एतादृशः सन् । सायम्* सन्ध्याकाले । **सायंसाये प्रातरि**(अमर०३/४/१९)त्यमरः। तमसि अन्धकारे । प्रसर्पति सति । गृहं निजं मन्दिरं समागच्छति । स्वीयमित्यपि पाठः । स्वभावोक्तिरलङ्कारः । शार्दूलविक्रीडितम् ॥१५॥

परनिष्ठो[4] यथा–

गङ्गाया सलिले निमज्जति जटाजूटे परिभ्राम्यति
भ्रश्यत्यक्षि हुताशने फणिफणाभोगे क्वचिल्लीयते ।
कुञ्जीभूय हरस्य कर्णसुषिरं निर्गन्तुमुत्कण्ठते
राहोरास्यमुदीक्ष्य किं न कुरुते बालस्[5]तुषारद्युतिः ॥१६॥

परनिष्ठभयानकस्योदाहरणमाह–**गङ्गाया** इति । गङ्गाया मन्दाकिन्याः। सलिले जले विषये । हरे इति शेषः । निमज्जति स्नानं कुर्वति सति । जटाजूटे कपर्दे जटासम्भारे इति यावत् **कपर्दोऽस्य जटाजू[6]ट**(अमर०१/१/३४)इत्यमरः। परिभ्राम्यति समन्ताद्–भ्रमणं कुर्वति सति । तथा अक्षिहुताशने नेत्राग्नौ भ्रश्यति नश्यति सति । तथा फणिफणा शेषफणा क्वचिद्भोगे देहे लीयते लीना भवति । भोगः सुखे स्त्र्यादि–भृतावहेश्च फणाकाययोरिति वैजयन्ती। बालः कलारू[7]पः । तुषारद्युतिः शीतांशुः ।

---

१ विलुंठेन० । २ वित्रस्तौ । ३ ताडणशंकङ्क्या । ४ स्वनिष्ठो । ५ कुरुतेर्बाल० । ६ कपर्दोस्य जराजूट । ७ कालारूपः ।

कुञ्चीभूय देहसङ्कोचं कृत्वा । हरस्य शिवस्य । कर्णसुषिरं कर्णच्छिद्रम् । निर्गन्तुम् प्राप्तुम्[1] । उत्कण्ठते । तत्र प्रवेष्टुमिच्छतीत्यर्थः। **ऊषशुषी** (पा०अ०५/२/१०७) त्यादिना मत्वर्थीयो रप्रत्ययः । किञ्च इदं राहोः सैंहिकेयस्य । आस्यं मुखम् । किमित्युदीक्ष्य आशङ्क्य । न कुरुते । प्रवेशमिति शेषः । बालस्याल्पज्ञत्वेन तादृक्ज्ञानाभावे भ्रमसम्भवादित्यर्थः । अत्र बाल इति साभिप्रायविशेषणात् परिकरः अलङ्कारः । **परिकरः साभिप्राये विशेषण**(कुव०६२)इति लक्षणात् । तदुत्थापितोत्प्रेक्षे–त्यनयोरङ्गाङ्गिभावसङ्करः । शार्दूलविक्रीडितम् ॥१६॥

विकृतनिनदात् परनिष्ठो यथा–

कुर्वाणे दशभिर्मुखैर्दशमुखे नादं सुरैः कम्पितं
दिग्भोगैश्चकितं रवेरपि हयैरुत्पुच्छमाधावितम् ।
***[2] सुग्रीवस्तु समुच्छलज्जलनिधिव्यालोलवीचिभ्रमि–[3]**
भ्रश्यत्सेतुविशङ्क्या हनुमतो वक्त्रे दृशो[4] सन्दधे ॥१७॥

विकृतनिनदहेतूकपरनिष्ठभयानकस्योदाहरणमाह– **कुर्वाण** इति । दशमुखे रावणे । दशभिर्मुखैर्दशसङ्ख्याकैर्वक्त्रैः कृत्वा नादं शब्दम् । कुर्वाणे सति सुरैः देवैः कम्पितम् । भावे क्तः । दिग्भोगैः[5] दिग्गजैः । चकितं सहसा चलितम् । किञ्च रवेः सूर्यस्य । हयैर्बहिरपि । उदूर्ध्वम् पुच्छं यस्यां क्रियायां[6] यथा तथा । आधावितम् पलायितम् । सुग्रीवो वानरराजस्तु । *समुल्लसन् उल्लसन् । यो जलनिधिः समुद्र–स्तस्य व्यालोला या वीचयस्तरङ्गास्तासां या भ्रमिर्भ्रमणं तथा भ्रश्यत्यो सेतुस्तस्य या विशङ्का । सम्भावनां तया हेतुना हनुमतो वक्त्रे मुखे विषये दृशो सन्दधे व्यापार–यामास । **स्त्रियां वीचिरथोर्मिष्वि** (अमर०१/१०/५)त्यमरः । शार्दूलविक्रीडितम् ॥१७॥

जुगुप्सायाः परिपोषो सर्वेन्द्रियसङ्कोचो वा बीभत्सः । वर्णो नीलः। दैवतं महाकालः । स च स्वनिष्ठः परनिष्ठश्च । स्वनिष्ठो यथा–

कालीकुण्डलनीकुतूहलमिथः प्रारब्धथूथूत्कृति–
न्यञ्चद्वीचिचलद्विहायसि चलच्चिल्लीनिपातस्पृशि ।
बद्धस्पर्द्धविपक्षपक्षरुधिरस्रोतस्विनीस्रोतसि
भ्रश्यत्युद्भ्रमति स्खलत्यथ रणक्रोधाकुलो भार्गवः॥१८॥

---

१ प्राप्तं । २ समुच्छलज्ज० । ३ ०व्यालोभवीचिभ्रमि० । ४ दशौ । ५ दिग्भगैः । ६ कियां ।

अथ बीभत्सरसलक्षणमाह–**जुगुप्सेति** । अयं स्वनिष्ठपरनिष्ठभेदेन द्विविधः । तत्र स्वनिष्ठस्योदाहरणमाह– **कालीति** । काली कालिका । कुण्डलनी अपरा देवी । ताभ्यां कुतूहलेन मिथः अन्योन्यम् प्रारब्धाः कृताः याः थूकृतयः थूकाराः । अनुकरणशब्दोऽयम् । ताभिर्न्यञ्चन्तश्चञ्चलाः[1] वीचय ऊर्मयः । **स्त्रियाः पुंवदि** (पा०अ०६/३/३४)त्यादिना[2] निपूर्वस्याञ्चतेः शत्रं तस्य पुंवद्भावः । ताभिश्चलल्लोलं विहायः प्रतिबिम्बिताकाशं यस्मिन् तादृशि । **वियद्विष्णुपदं वा तु पुंस्याकाश-विहायसी** (अमर० १/२/२)त्यमरः। तथा चलच्चिल्लीनाम् । चञ्चलश्येनी पक्षिणी । ये निपातास्तान्[3] स्पृशतीति तथाभूते । तथा बद्धस्पर्धार्ये विपक्षपक्षाः शत्रुपक्षीयाः राजानस्तेषां यद्रुधिरम् । तस्य स्रोतस्वतीं नदी । तस्याः स्रोतसि प्रवाहे । रणक्रोधाकुलो भार्गवः परशुरामः । भ्रश्यति अथोद्भ्रमति । तथा स्खलति । यद्वा क्रोधाकुलः सन्निति विधेयविशेषणम् । शार्दूलविक्रीडितम् ॥१८॥

परनिष्ठो यथा–

छत्रं कुम्भीन्द्रकर्णैर्विरचय तनुतां चामरं वाजिपुच्छै–
र्मालां मुण्डैर्विशालां सृज गजजघनैर्मण्डपं योजयस्व ।
अन्त्रैर्नीराजनायाः कलय विधिमिति प्रेतवृद्धाङ्गनाना–
मालापःकुण्डलिन्यास्तनयपरिणयारम्भजन्मा बभूव ॥१९॥

परनिष्ठबीभत्सरसस्योदाहरणमाह–**छत्रमिति** । कुम्भीन्द्रकर्णैर्हस्तिकर्णैः । छत्रं विरचय कुरु । तथा वाजिपुच्छैर्हयपुच्छैः । चामरवालव्यजनं तनुताम् । तथा प्रचण्डैर्मुण्डैः शिरोभिर्मालां स्रजम् । सृज रचय । तथा गजजघनैर्हस्तिपादैर्मण्डपं विवाहमण्डपम् । योजयस्व कुरु । अत्र सर्वत्र विध्यर्थे लोट् । तथा अन्त्रैः शरीर-नाडिभिः नीराजनायाः । विधिम् विधानम् कलय रचय । प्रेतेषु या वृद्धाङ्गनास्तासां मध्ये । कुण्डलिनी[4] । काचिद्योगिनी । तस्याः तनयपरिणयारम्भजन्मा पुत्रविवाहसमा-रम्भारब्धः आलापः व्यग्रशब्दः बभूव । स्रग्धरावृत्तम् । शार्दूलविक्रीडितम्[##] ॥१९॥

विस्मयस्य सम्यक्समृद्धिरद्भुतः । वर्णोऽस्य पीतः । दैवतं ब्रह्मा । स च स्वनिष्ठः परनिष्ठश्च । स्वनिष्ठो यथा–

---

१ ०न्यंचतश्चंचचलाः । २ पुंविदित्यादिना । ३ ०तिपाता० । ४ ०समारभारब्ध० ।

The metre in the verse is स्रग्धरा but the name of the metre शार्दूलविक्रीडितम् is written here which makes the text doubtful.

लीलानिबद्धपाथोधिं[1] हेलाहतदशाननम्।
स रामः सीतयाश्लिष्टमात्मानं बहुमन्यत ॥२०॥

अथाद्भुतरसस्यलक्षणमाह– **विस्मस्येति**। अस्य वर्णो दैवतं च मूलं एव स्पष्टम्। अयं स्वनिष्ठपरनिष्ठभेदेन द्विविधः। अत्रेदमवधेयम्। स्वनिष्ठविभावादिभिः स्वनिष्ठो रसः। परनिष्ठ[2]विभावाद्यवलोकनेन परस्य विभावाद्यभिव्यक्तः परनिष्ठो रस इति ज्ञेय[3]ः। तत्र स्वनिष्ठाद्भुतरसस्योदाहरणमाह– **लीलानिबद्धेति**। स रामो रामचन्द्रः। लीलया निबद्धः। पाथोधिः समुद्रो येन तम्। तथा हेलया लीलया हतो व्यापादितः रावणो येन स तथाभूतम्। **हेला लीलेत्यमी हावा** (अमर०१/७/३२) इत्यमरः। तथा सीतया स्वकान्तया आश्लि[4]ष्टमालिङ्गितम् आत्मानं निजदेह[5]म् बहु अत्युत्कृष्टम्। अमन्यत। आत्मा देहे धृतौ जीवे स्वभावे परमात्मनीत्यमर[+]ः ॥२०॥

परनिष्ठो यथा–

त्यक्ता जीर्णदुकूलवद्वसुमती[6] बद्धोऽम्बुधि[7]र्बिन्दुवत्
बाणाग्रेण जरत्कपोतक इति व्यापादितो रावणः।
लङ्का काऽपि विभीषणाय सहसा मुद्रेव हस्तार्पिता
श्रुत्वैवं रघुनन्दनस्य चरितं को वा न रोमाञ्चति ॥२१॥

परनिष्ठाद्भुतरसस्योदाहरणमाह–**त्यक्तेति**। येनेति शेषः। येन वसुमती[8] जीर्णदुकूलवत् त्यक्ता उत्सृष्टा। पितुः प्रतिज्ञापालनाय भरताय दत्तेत्यर्थः। येन अम्बुधिर्बिन्दुवत् बद्धः। पञ्चभिर्हलैः कर्षति ग्रामं ग्रामणीरितिवत् हनुमत्प्रमुखवानरकर्तृकं सेतुबन्धनं रामे उपचयति। किञ्च बाणाग्रेण शराग्रेण कृत्वा जरच्चासौ कपोत[9]श्चेति। स एव जरत्कपोतकः। **पूर्वकालैके** (पा०अ०२/१/४९)त्यादिना तत्पुरुषसमासः। स्वार्थे कन् प्रत्ययः। स इव रावणः व्यापादितो विदीर्णः किञ्च विभीषणाय निजभक्ताय। काऽपि रमणीयाऽपि लङ्का रावणनगरी। सहसा अकस्मात्। मुद्रेव निजनामाक्षराङ्किता सुवर्णोर्मिकेव[10] हस्तार्पिता करे दत्ता। एवमनेन प्रकारेण रघुनन्दनस्य रामचन्द्रस्य चरितम् आचरणम् श्रुत्वा आकर्ण्य। को वा पुरुषः। रोम[11] जातित्वादेकवचनम्। लक्षणया रोमोद्गमम्। न अञ्चति। अपि तु सर्वः प्राप्नोतीत्यर्थः। रोमाञ्चभृदित्यपि पाठः। अत्रोपमानोपमेयवाचकसाधारणधर्मवाचकानां

---

१ ०पार्थोधिं। २ परिनिष्ठ०। ३ ज्ञयः। ४ आश्लिष्टे०। ५ निजदेहे०। ६ बद्धसुमती०। ७ बंधोंबुधिं। ८ वसुपती। ९ कपोततश्च। १० सुवर्णोर्मकेव। ११ रोमा। + Not traced out in अमरकोश

चतुर्णां जीर्णदुकूलादिपदानामुपादानात्पूर्णोपमालङ्कारः ॥ शार्दूलविक्रीडितम् ॥२१॥

अत्युक्तिभ्रमोक्तिचित्रोक्तिविरोधाभासप्रभृतयोऽद्भुत[1] एवान्तर्भवन्ति।

अत्युक्तिर्यथा–भूयादेष सतां हिताय भगवान् कोलावतारो हरिः

सिन्धोः क्लेशमपास्य यस्य दशनप्रान्ते स्थिताया भुवः।

तारा हारति वारिदस्तिलकति स्वर्वाहिनी माल्यति

कीडा दर्पणति[2] क्षपापतिरहर्देवश्च ताटङ्कति ॥२२॥

अथात्युक्त्यादीनां शृङ्गारदिष्वष्टविधरसेषु कुत्रान्तर्भाव इत्युत्थापिताशङ्कायां[3] अद्भुते एवेत्याशयेनाह[4]–**अत्युक्तिरिति** । तत्रादावत्युक्तिमुदाहरति– **भूयादिति** । कोलस्यावतारो[5] यस्य स तथाभूतः । वराहमूर्तिः । **वराहः सूकरो धृष्टिः वृष्टिः कोलः पोत्री किरः किटी** (अमर०२/६/२)त्यमरः[6] । भगवानेष[7] हरिर्विष्णुः । सतां[8] हिताय श्रेयसे भूयात् । आशिषि लिङ् । सिन्धोः समुद्रात् । उद्धृताया इति शेषः । क्लेशं हिरण्याक्षहरणादुत्पन्नं दुःखम् । अपास्य त्यक्त्वा । यस्य वराहमूर्तिः दशनप्रान्ते दंष्ट्राग्रे स्थितायाः । भुवः भूम्याः । कर्मणि षष्ठी । तारा नक्षत्राणि । जातित्वादेकवचनम् । हारति हार इवाचरतीति । आचार[##]विवंताल्लट् । एवमग्रेऽपि बोध्यम् । वारिदो मेघस्तिलकति । कस्तूरीचन्द्रक इवाचरति । **तिलकं..... स्त्रियामि**(अमर०२/६/६५)त्यमरः । तथा स्वर्वाहिनी मन्दाकिनी । मालानां समूहो माल्यम् । माल्यमिवाचरति माल्यति तथा क्षपापतिः[9] चन्द्रः । कीडादर्पण इवाचरतीति कीडादर्पणति । **दर्पणे मुकुरादर्शावि**(अमर०२/६/१४०)त्यमरः । अथ[10] अहर्देवः सूर्यः ताटङ्कति । ताटङ्क कर्णभूषणम् । तद्वदाचरति । अत्रोपमेयभूतानां तारादीनामुपमान-भूतानां हारादीनां चोपादानाच्च धर्मवाचकलुप्तोपमाभेदः । शार्दूलविक्रीडितम् ॥२२॥

दिव्यहरेर्मुखकुहरे विस्तीर्णे पर्णति व्योम।

चूर्णति चन्द्रः कमुकति कनकगिरिः खदिरसारति स्वरांशुः ॥२३॥

अस्यैवोदाहरणान्तरमाह–**दिव्येति** । दिव्यहरेः नृसिंहस्य । विस्तीर्णे विशाले मुखकुहरे वदनगह्वरे[11]। व्योमाकाशं पर्णति। पर्णसदृशं भवति। नागवल्लीदलमिवा–

१०अद्भुताएवा० । २ क्षणपति । ३ इत्युत्थापिताकांक्षायां । ४ ०त्याशयेवाह । ५ कोलस्यावतासे । ६ वराहः शूकरो धृष्टिः कोलः पौत्री कटिः किरिरित्यमरः । ७ भागवानेष । ८ संतां । ९ क्षयापति । १० अथा । ११ वदन०हरे । ## doubtful text

चरतीत्यर्थः । तथा चन्द्रः । चूर्णति श्वेतचूर्णमिवाचरति । ताम्बूलवीटिकायां श्वेतचूर्णादिकं निक्षिप्यते इति लोकप्रसिद्धिः । तथा कनकगिरिः सुवर्णाद्रिः । कमुकति पूगमिवाचरति । **द्योटां तु पूगः कमुक**(अमर०३/३/२०)इत्यमरः । खरांशुः सूर्यः खदिरसारति[1] । आत्मानमिति शेषः अन्यवाक्यान्वयायोगात्[2] आत्मानम् । खदिरसारः खदिरवृक्षरसः । कत्थमिति यावत् तद्वदाचरतीत्यर्थः । आर्याच्छन्दः ॥२३॥

भ्रमोक्तिर्यथा–

तीव्रैस्तीव्रुचः करैः परिचितां सेक्तुं कपोलस्थलीं
नीराणां निकरं करेण हरता तुच्छीकृते नीरधौ ।
मैनाकं समुदीक्ष्य पक्षपतितं शालूकशङ्काजुषो
हेरम्बस्य पुनातु दन्तशिखरव्यापारलीलारसः ॥२४॥

भ्रमोक्तेरुदाहरणमाह– **तीव्रैरिति** । तीव्रुचः भास्करस्य । तीव्रैः करैः उष्णांशुभिः । परिचितां तप्तात्यिर्थः । कपोलस्थलीम् गण्डस्थलीम् । सेक्तुं करेण शुण्डादण्डेन कृत्वा । नीराणां जलानाम् निकरं समूहम् । हरता हेरम्बेणेति शेषः । नीरधौ समुद्रे । तुच्छीकृते रिक्तीकृते सति । तत्र पक्षपतितम् । पक्षच्छेदभयात्[3]दित्यर्थः । मैनाकं हिमवत्पुत्रम् । समुदीक्ष्यावलोक्य । शालूकशङ्काजुषः । उत्पलकन्दभ्रान्तिभाजो हेरम्बस्य । **शालूकमेषां कन्दः स्यादि**(अमर०१/१०/३८) त्यमरः। दन्तशिखरं दन्ताग्रम् । तस्य यो व्यापारः प्रसारः स एव लीलारसः क्रीडारसः। पुनातु । आशिषि लोट् । भ्रान्तिमदलङ्कारः । शार्दूलविक्रीडितम् ॥२४॥

अन्तःक्रोधाग्निजाग्रत्कपटनरहरिस्फारनिःश्वास[4]वात–
व्याधूतावारिवाहाः कुलधरणभृतः सानुषु[5] प्रस्खलन्तः ।
दिङ्नागैर्नागबुद्ध्या वनहरिणकुलैः शङ्क्या शाद्वलानां
छायाभ्रान्त्या किरातैः शितिवसनधिया वीक्षिताः स्वर्वधूभिः॥२५॥

उदाहरणान्तरमाह– **अन्तःक्रोधाग्नीति** । अन्तर्मनसि । यः क्रोधाग्निः कोपानलस्तेन जायते दैदीप्यमानः स चासौ कपटेन हिरण्यकशिपुवधमिषेण नरहरिनृसिंहस्तस्य स्फारा बहुला ये निःश्वासवातास्तैर्व्याधूताः कम्पिताः अत एव कुलधरणिभृतः । कुलाचलस्य सानुषु[5] शिखरेषु प्रस्खलन्तः । प्रपतन्तः वारिवाहाः मेघाः । कर्म ।

---

१ खदिरसारतिः । २ अन्यथाक्यअत्ययायोगात् । ३ पक्षभेदे० । ४ ०निश्वस० । ५ मानुषु ।

दिङ्नागैः[1] दिग्गजैः । नागबुद्ध्या गजशङ्क्या वीक्षिता । वने यानि हरिणकुलानि मृगकदम्बानि । तैः शाद्वलानां नड्वलानाम् । **नडशादाद्ड्वलच्**(पा०अ०४/२/८८) इति[2] वलच्प्रत्ययः। डित्वाट्टिलोपः । एतौ मध्यतवर्गीयौ वैडूर्यमणिशाद्वलौ[3]विति शब्दभेदप्रकाशे । शङ्क्या वीक्षिता । तथा किरातैः शबरैः । **किरातभिल्लशबर-पुलिन्दाम्लेच्छजातय**(अमर०२/१०/२०)इत्यमरः । छायाभ्रान्त्या अनातपभ्रमेण । वीक्षिताः । छायात्वनातपे कान्तावित्यमर[+]ः । तथा स्वर्वधूभिर्नाकनितम्बिनीभिः । शितिवसनधिया कृष्णवस्त्रपुञ्जभ्रान्त्या । वीक्षिता[4] इति पदं सर्वत्र योज्यम् । अत्रैकस्य मेघरूपवस्तुनो दिग्गजादिभिर्बहुधोल्लेखालङ्कारः[5]। **बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यत** (कुव०२२) इति लक्षणात् । स्रग्धरावृत्तम् ॥२५॥

चित्रोक्तिर्यथा –

गिरिर्वमति मौक्तिकावलिमलिद्वयं स्थावरं
शरत्तुहिनदीधितिर्व्यजनमारुतं वाच्छति ।
धनुः स्वपिति मान्मथं शिथिलबन्धमन्धं तमो
नमो मनसिजाय ते किमपि कौतुकं तन्वते ॥२६॥

लाक्षणिकमखिलं चित्रोक्तिरेव ।

चित्रोक्तेरुदाहरणमाह-**गिरिरिति**[6] । गिरिः पर्वतत्वेनाध्यवसितं कुचमण्डलम् । मौक्तिकावलिं स्वेदोदबिन्दुश्रेणिम् वमत्युद्गिरति[7] । अत्र वमतीति गौणवृत्त्या-श्रयणान्नाश्लीलदोषः । यथाह दण्डी-

निष्ठयूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयात्[8]
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहत ॥इति॥ (काव्या०१/९५)

तथा अलिद्वयम् नेत्रद्वयम् । स्थावरं स्थिरतरं भवति । रतिसुखपरिवश्यादिति भावः । शरत्तुहिनदीधितिः[9]। शरच्चन्द्रत्वेनाध्यवसितमाननम्[10] । व्यजनमारुतम्[11] धवित्रा-निलम् । धवित्रं तालवृन्तम् स्यादुत्क्षेपो व्यजनं च तदित्यमर[+]ः । वाच्छति । रति-रभसघर्मापनोदार्थमिति भावः । किञ्च मान्मथं मन्मथसम्बन्धि । धनुः भ्रूयुगम् । स्वपिति । निश्चलं भवति । अन्धयतीति अन्ध एतादृशं तमःकेशपाशरूपम् । शिथिल-

---

१ दिग्नागैः । २ नडशादात्ड्वलच इति । ३ शाब्दला०। ४ ०बहुधोल्लेखाकारः । ५ The Scribe also mentions शार्दूलविक्रीडितम्। ६ गिरिति । ७ वमृत्युद्गिरिति ।८ ०व्यपश्रियात् । ९ शरतुरतुहिनदीधिति । १० ०चन्द्रत्वेनाध्यावसित० । ११ व्यजनमाररुतम् । + Not traced out in अमरकोश

बन्धम्[१]। श्लथबन्धनम् अस्ति। किमप्यनिर्वचनीयं कौतुकं निधुवनात्मकं तन्वते कुर्वते। मनसि जातो मनसिजस्तस्मै। **सप्तम्यां जनेर्डः**।(पा०अ०३/२/९७) **तत्पुरुषे कृति बहुलमि**(पा०अ०६/३/१४)त्यलुक्। ते तुभ्यं नमः। अत्र रूपकातिशयोक्तिरलङ्कारः। पृथ्वीवृत्तम्॥२६॥

विरोधाभासो यथा–

कोऽप्यसौ तव मुकुन्द नन्दको निन्दको भवति कंससम्पदः।
कुण्डली त्वमसि कालियं कुतो दूरतो नयसि तन्निवेदय॥२७॥

विरोधाभासस्योदाहरणमाह– **कोऽप्यसाविति**। हे मुकुन्द विष्णो। अत्र हे शब्दप्रयोगे विधायकसूत्राभावेऽपि हेहे प्रयोगे हैहेयोरिति ज्ञापकात् प्रयोगः। तव कोऽप्यलौकिको नन्दको नन्दको नामा खड्गः। श्लेषेणानन्दक इति च। कंसस्य या संपल्लक्ष्मीस्तस्या निन्दको द्वेषकर्ता भवति। य आनन्दकरो स एव द्वेषकर्ता भवति। य आनन्दकरो स एव द्वेषकर्त्तेति विरोधः। अस्य रूढं नामेति तत्परिहारश्च। किञ्च देहे विष्णो त्वम् कुण्डली। मकराकृतिकुण्डलवान् फणी चासि। **कुण्डलीगूढपाच्चक्षुः–श्रवाः काकोदरो फणी**(अमर०१/८/७)त्यमरः। तस्मात्कालियं सर्पं कुतः कस्माद्दूरतो दूरदेशं नयसि। श्लेषमहिम्ना कुण्डलीत्वेन सजातीयं कालियसर्पं कुतः कालिन्दीह्रदात्[२] स्थलान्तरं प्रापयसीति पूर्ववद्विरोधाभासः। नयतेर्द्विकर्मकत्वम्। तन्निवेदय कथय। रथोद्धत्तावृत्तम्॥२७॥

नाट्ये च सर्वे रसा आनन्दरूपा परनिष्ठा एवेति। अत्र प्रवृत्तिर्निवृत्तिश्च। निवृत्तौ यथा शान्तरसः प्रवृत्तौ[३] तथा मायारस इति प्रतिभाति। एकत्र रसोत्पत्तिरन्यत्र नेति वक्तुमशक्यत्वात्। न च स रतिरेव[४]। स कस्यास्तु व्यभिचारि। न शृङ्गारस्य, तद्वैरिणो बीभत्सस्यापि तत्र सत्त्वात्। अत एव न बीभत्सस्यापि। न हास्यस्य[५], तद्वैरिणः करुणस्यापि तत्र सत्त्वात्। अत एव न करुणस्यापि। न रौद्रस्य, तद्वैरिणोऽद्भुतस्यापि, तत्र सत्त्वात् अत एव नाद्भुतस्य। न वीरस्य, तद्वैरिणो भयानकस्य तत्र सत्त्वात् अत एव न भयानकस्यापि[६]। न शान्तस्य तद्विरोधित्वात्। न च सामान्य एव रसः। तद्विशेषा इतरे भवन्तीति। शान्तरसस्य[७] रसाभासत्वापत्तेः[८]। किन्तु विद्युत

---

१ शिथिलबन्धे। २ कालिन्दीह्रदास्थलान्तरं। ३ प्रवृत्तो। ४ साररेतिव। ५ महास्यनस्य। ६ भयानकरस्यापि। ७ शान्तरस्यस्य। ८ रसाभावस्यापत्तेः।

इव रतिहासशोककोधोत्साहभयजुगुप्साविस्मयास्तत्रोत्पद्यन्ते विलीयन्ते च । तत्र ते व्यभिचारिभावा इति । लक्षणं च प्रबुद्धमिथ्याज्ञानवासना[1]-मायारसः । मिथ्याज्ञानमस्य स्थायिभावः । विभावाः सांसारिकभोगार्जक-धर्माधर्माः अनुभावास्तत्र पुत्रकलत्रविजयसाम्राज्यादयः ।

यथा–

वाटी लाटी दृगम्भोरुहरभसकरी वापिका काऽपि कान्ता
तल्पं चन्द्रानुकल्पं प्रकटयति रहः कामिनी कामनीतिम् ।
रूपं कामानुरूपं मणिमयभवनं बन्धुरं बन्धुरङ्गे
लोके लोकेश कस्य त्वमसि न भवने सर्वदा सर्वदाता ॥२८॥

नाट्ये चेति । नाट्ये, न तु काव्ये । काव्ये हि **नैषधादौ** वर्णनीयो नलादिरेव रसाश्रयः । तत्राभिधीयमानो रसो हि तन्निष्ठत्वं न जहाति । नाट्ये तु नर्तके नलादित्वमारोप्याभिनीयमानो नर्तकसम्बन्धित्वं जहात्येव । सामाजिकानामपि रसोदय[2]स्वीकारात् । अधुना मुख्यनलादिशरीराणामविद्यमानत्वेऽपि ब्रह्मभूतस्य तदात्मनः सामाजिकात्मना सहभेदाभावात्काव्ये[3] स्वनिष्ठ एव रसः । तथा च श्रुतिः। **रसो वै स स ह्येवायं लब्ध्वाऽऽनन्दीभवती**(तै०उ०२/७)ति । रसो रसिक इत्यर्थः गुणवचनेभ्यो मतुपो लुगिष्ट इति भाष्यकारोक्तेः । **रसादिभ्यश्चे** (पा०अ०५/२/९५)ति सूत्रं न प्रवर्त्तते विभाषाधिकारात् । एवं च नित्यरसिकस्यात्मनो दशाद्वयमस्तीत्याह– **प्रवृत्तिर्निवृत्तिश्च** । वस्तुतस्तु प्रवृत्तौ मायारसो निवृत्तौ शान्तरस इति रसद्वयमेव । मायारसस्य रत्यादयोऽष्टौ व्यभिचारीभावाः । स्थायिभावविभावानुभावादिकम् मूल एव स्पष्टम् । मायारसस्योदाहरणमाह– **वाटी**ति । लाटी लाटदेशोद्भवा कामिनी । तस्या दृगम्भोरुहम् नेत्रकमलम् । तस्य रभसकरी हर्षजनी वाटी वाटिका । रभसो हर्षवेगयोरित्यमरः[+] । कापि कान्ता रमणीया । वापिका गृहदीर्घिका । किञ्च चन्द्रानुकल्पं चन्द्रसदृशम् । **तल्पं** शय्या । **तल्पं शय्याट्ट दारेष्वि**(अमर०३/३/१३१)त्यमरः[४]। किञ्च कामिनी नायिका । मिथ अन्योन्यम् । कामी विलासी तस्य या नीतिस्तां प्रकटयति । कामानुरूपं रूपं लावण्यम् । तथा बन्धूरं[५] सत्युत्कृष्टं मणिमयभवनम् । तथा बन्धुरङ्गः स्वजनसौहार्दम् । एतल्लोके दृश्यते । हे लोकेश

---

१ प्रबुद्धामिथ्या० । २ सामाजिकानावरसो० । ३ ०भावाकाव्ये । ४ तल्पं शय्यदृदारयोरित्यमरः ।
५ बंधुर । + Not traced out in अमरकोश

ब्रह्मन्[1]। त्वं कस्य जनस्य भवने सद्मनि। सर्वदा निरन्तरम्। सर्वदाता सकलप्रदः। न असि अपि तु सर्वस्यापीत्यर्थः। अत्र सकलमिथ्याज्ञानवासनास्थायिभावः। विभावानुभावौ मूले स्पष्टौ। स्रग्धरावृत्तम्॥२८॥

नाट्यभिन्नस्थले निर्वेदस्थायिभावः शान्तोऽपि नवमो रसः निर्वेदस्य परिपोषः शान्तः रसः दोषप्रशमो वा। दोषाः कामक्रोधलोभादयः। अत्र विषयदोषविचारविरक्त्यादयो[2] विभावाः। अनुभावा आनन्दाश्रुपुलकहर्ष-गद्गदवचनादयः[3]। यथा–

हेयं हर्म्यमिदं निकुञ्जभवनं श्रेयः[4]* प्रदेयं धनं
पेयं तीर्थपयो हरेर्भगवतो गेयं पदाम्भोरुहम्।
नेयं जन्म चिराय दर्भशयने धर्मे निधेयं मनः
स्थेयं तत्र सितासितस्य सविधे ध्येयं पुराणं महः॥२९॥

अथ शान्तरसस्योदाहरणमाह– **हेयमिति**। इदं हर्म्यम्। हेयं[5] त्याज्यम्। निकुञ्जभवनं लतागृहम्। चेयं* **चिञ् चयने** (धा०पा०१२५२)। **अचो यदि** (पा०अ०३/१/९७)ति य प्रत्ययः। धनं द्रव्यम् प्रदेयं न तु रक्षणीयम्। किञ्च तीर्थपयस्तीर्थोदकं पेयम्। सर्वदैवेति[6] शेषः। किञ्च भगवतो हरेः पदाम्भोरुहम् चरणकमलम्[7]। गेयम् गातुम् योग्यम्। किञ्च चिराय चिरकालं जन्म दर्भशयने दर्भास्तरणे नेयम्। अन्तमिति शेषः। किञ्च मनः सङ्कल्पविकल्पात्मकं धर्मे निधेयम्। किञ्च तत्र सिता चासिता चेत्यनयोः[8] समाहारः सितासितम् तस्य। प्रयागस्येत्यर्थः। सविधे समीपे। स्थेयम्। नित्यम् स्थातुमिति शेषः। तथा च श्रुतिः –

सितासिते सरिते यत्र सङ्गते तत्राप्लुतासो दिवमुत्पतन्ति।
एवै तन्वं विसृजन्ति धीरास्त जनासोऽमृतत्वं भजन्ते॥

इति। किञ्च पुराणं महः परब्रह्म। ध्येयम्[9]। कस्यचिद्विरक्तस्येयमुक्तिः। अत्र स्थायी निर्वेदः। विषयदोषविचारादयो विभावाः। गृहादित्यागोपदेशोक्तिरनुभावः। शार्दूलविक्रीडितम्॥२९॥

(यथा वा)– वेदस्याध्ययनं कृतं परिचितं शास्त्रं पुराणं श्रुतं
सर्वं व्यर्थमिदं पदं न कमलाकान्तस्य चेत् कीर्तितम्।

---

१ पद्मनि। २ विषयदोषविचरविरक्त्यादयो। ३ ०वचनादयाः। ४ श्रेयं। ५ हेहेयं। ६ सर्वदैवति। ७ चरणकमल। ८ चेत्पनायोः। ९ धेयम्।

उत्खातं सदृशीकृतं विरचितः सेकोऽम्भसा भूयसा
सर्वं निष्फलमालवालवलये क्षिप्तं न बीजं यदि ॥३०॥
इतिश्री भानुदत्तविरचितायां रसतरङ्गिण्यां रसनिरूपणं
नाम सप्तमस्तरङ्गः॥७॥

अस्यैवोदाहरणान्तरमाह-**वेदस्येति** । वेदस्य अध्ययनं यत्कृतं तथा शास्त्रं यत्परिचितं परिशीलितम् । किञ्च पुराणं यत् श्रुतं इदं सर्वं पूर्वोक्तं पुराणाध्ययनादिकं व्यर्थमस्ति । चेत् यदि कमलाकान्तस्य विष्णोः पदम् । **पदं व्यवसिति त्राणस्थान-लक्ष्माङ्घ्रि वस्तुष्वि**(अमर०३/३/९३)त्यमरः । न कीर्तितम् । ईश्वरचरणारविन्द-ध्यानेन वेदाध्ययनादिकं सफलमिति भावः। अत्र दृष्टान्तमाह-भूमितलमिति शेषः। उत्खातम् । कर्मणि क्तः । तथा सदृशीसमीकृतम् । तथा भूयसा प्रचुरेणाम्भसा सेकः सिञ्चनं विरचितः । इदं सर्वं निष्फलं यदि बीजं आलवालस्य यद्वलयं मण्डलम् तस्मिन् (न)क्षिप्तम्[1]। न रोपितम् । सति बीजप्रक्षेपे जलसिञ्चनादिकस्य साफल्यमिति भावः । अत्र विभावो पूर्ववत् । अत्र कमलाकान्तपदकीर्तनस्य बीजप्रक्षेपस्य च बिम्बप्रतिबिम्बभावात् दृष्टान्तालङ्कारः । **चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृति** (कुव०५२)रिति लक्षणात् । शार्दूलविक्रीडितम् ॥३०॥

इतिश्रीमहोपाध्यायावटुश्रीनन्दरामभट्टात्मजभगवद्भट्टविरचितायाम्
रसतरङ्गिणीव्याख्यायां नूतनतरीसमाख्यायां
शृङ्गारादिनिरूपणे सप्तमस्तरङ्गः ॥७॥

---

१ तस्मिक्षिप्तम् ।

॥ अष्टमस्तरङ्गः ॥

स्थायिभावजा दृष्टिरष्टधा स्निग्धा, हृष्टा, दीना, क्रुद्धा, दृप्ता, भीता, जुगुप्सिता, विस्मिता चेति । व्यभिचारिभावजा दृष्टिर्विंशतिधा शून्या, मलिना, शान्ता, लज्जिता, शङ्किता, मुकुलिता, अर्धमुकुलिता, ग्लाना, जिह्मा, कुञ्चिता, वितर्किता, अभितप्ता, विषण्णा, ललिता, केकरा, विकोशा, विभ्रान्ता, विद्युता, त्रस्ता, मदिरा चेति । रसभेदादष्टधा रसदृष्टिः कान्ता, हास्या, करुणा, रौद्रा, वीरा, भयानका, बीभत्सा, अद्भुता चेति षट्त्रिंशद्भेदा दृष्टेरूहनीयाः । कुणिता*, विकसिता, अर्धविकसिता, चकिता, सुप्ता, घूर्णिता, अलसा, विवर्त्तिता, अर्धविवर्त्तिता, नर्तिता, अर्धनर्तिता, पर्यस्ता, शून्या, स्तिमिता चेति दृष्टिभेदा ऊहनीयाः । ललिता यथा–

मनसिजनृपतिर्वा मण्डनं वा मदो वा
शशिमुखिभवनं वा यौवनं वा वनं वा ।
अखिलमपि कृतार्थं वीचिविक्षेपखेल–
त्कमलविजयलीलाशालिना लोचनेन ॥१॥

अथ सङ्गीतशास्त्रोक्ता रसादिदृष्टयः कथ्यन्ते– **स्थायीति** । तत्र स्थायीभाव–दृष्टिरष्टधा । व्यभिचारिभावदृष्टिर्विंशतिधा । रसदृष्टिरष्टधेति संकलनया षट्त्रिंशद्भेदा दृष्टयो भवन्ति । तासां[1] परिगणनं तु मूल एव स्पष्टम् । अन्या अपि क्वणितादयो* दृष्टयः सन्तीति विभावनायाम् । तत्र ललितोदाहरणमाह[2]–**मनसिजेति**। मनसिजः कामः । स एव नृपतिर्वाऽस्तु इति शेषः । अत्र सर्वत्र वा शब्दः समुच्चये। वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चय इत्यमरः+ । मण्डनं आभूषणं वा। तथा मदो वा तथा भवनं वास्तु । यौवनं वा । इदमखिलं पूर्वोक्तं सकलमपि । हे शशिमुखि । वीचिविक्षेपेण[3] तरङ्गक्षोभेण । खेलत् यत्कमलं तस्य यो विजयस्तस्य या लीला तया शालत इत्येवं शीलेन लोचनेन कृत्वा कृतार्थं सकलमित्यर्थः । एतेनासां रसादिदृष्टीनां तदुपयोगित्वमिति ज्ञेयम् । मालिनीवृत्तम् ॥१॥

(ग्लाना यथा)–

---

१ तासो । २ ललितञ्चललितोदा । ३ विविक्षेपेन । + Not traced out in अमरकोश

पर्यस्तालकरोचिषः[1] श्रमजुषः प्रस्विन्ननगण्डत्विषः[*][2]
शम्भौ शीकरशीतलेन शशिना वातं समातन्वति।
जीयास्तामचलाधिराजदुहितुर्निःस्पन्दनीलोत्पल-[3]
च्छायानिद्रितचञ्चरीकमिथुनस्पर्धासमृद्धे दृशौ ॥२॥

उलानोदाहरणमाह-**पर्यस्तेति**। पर्यस्ता विकीर्णा येऽलकास्तेषां रोचिर्[4]यस्यास्तथा-भूतायाः। किञ्च श्रमजुषः सुरतातिशयात् श्रान्तायाः। तथा प्रस्यन्देन[*] स्वेदोद्गमेन। गण्डयोः कपोलयोस्त्विट् यस्यास्तादृश्याः[5]। शैलराजदुहितुः पार्वत्याः। शम्भौ[6] हरे। शीकरवत् शीतलेन शशिना। वातं समातन्वति विजयतीत्यर्थः। निःस्पन्दं निश्चलम्। यन्नीलोत्पलं तस्य या छाया तत्र निद्रितं यच्चञ्चरीकमिथुनं भ्रमरयुग्मम्। तस्य स्पर्धासमृद्धे बद्धस्पर्धे तत्सदृशीति यावत्। एतादृशी दृशौ जीयास्ताम्। सर्वोत्कर्षेण वर्त्तेताम्। चंचूर्यते इति चञ्चरीकः। **पर्करीकादयश्च**[7](उणादि०४६८)त्युणादिसूत्रेण कन्प्रत्यये निपातितः। शार्दूलविक्रीडितम् ॥२॥

एवमन्या अप्युदाहरणीयाः। अथ रसानां जन्यजनकभावः। तत्र भरतः-

शृङ्गारात्तु भवेद्धास्यो रौद्राच्च करुणो रसः।
वीरात्स्याददद्भुतोत्पत्तिर्बीभत्साच्च भयानकः ॥(ना०शा०६/३९)

अयमुत्सर्गः परेषामपि रसानां कार्यकारणभावदर्शनात्। प्राचीनग्रन्थकारसम्मतिरपि-

कथानुग्रहयोगाच्च विवक्षावशतः कवेः।
अन्योन्यं जन्यजनकाः रसा भावा भवन्त्यमी ॥

यथा-

मातुर्दृष्ट्वा दृगम्भोरुहयुगलगलद्बाष्पधारामुदारां
तातस्य प्रेक्ष्य वक्षःस्थलरुधिरचयं कुध्यता भार्गवेण।
हस्ते न्यस्तः सहस्रार्जुनदमनसमारम्भगम्भीरवीर्य-
स्फूर्जद्दोर्वल्लिहल्लीसकसकलकलासूत्रधारः कुठारः ॥३॥

अत्र वीरं प्रति करुणबीभत्सयोः कारणता।

अथ रसानां जन्यजनकभावमास्पष्टं उदाहरणमाह-**मातुरिति**। मातुः रेणुकायाः

---

१ स्तालकारो०। २ प्रस्विन्नगल्लत्विषः। ३ ०धिरानदुहितु०। ४ राचि०। ५ ०स्तदृश्याः। ६ शांतौ। ७ पर्करीकादय०।

उदारां महतीम् । दृगम्भोरुहयुगलं नेत्रोत्पलयुग्मम् । तस्माद्बहुलम् । गलती या[1] बाष्पधारा तां दृष्टवा । तथा तातस्य जमदग्नेः । वक्षस्थले यो रुधिरचयस्तम् प्रेक्ष्य दृष्ट्वा । क्रुध्यता भार्गवेण सहस्रार्जुनस्य यो[2] दमनसंरम्भस्तस्मिन् । गम्भीरं दुरवगाहम् वीर्यं यस्य स तादृशः । तथा स्फूर्जत् स्फूरदूपदोर्वल्ल्याः बाहुलतायाः यत् हल्लीसकं नृत्यम् तस्य या सकलकला तस्याः सूत्रधारः । नाटकाचार्यः । हल्लीसकशब्दो सङ्गीतशास्त्रे नृत्यविशेषे रूढः । इंगालशब्दवद्[3]भाषाशब्दोऽयमिति केचित् । एतादृशः कुठारः हस्ते न्यस्तः धृत इत्यर्थः । अत्र मातुः परिदेवना-वलोकनेन बीभत्स इत्यनयोर्वीरं प्रति कारणता । स्रग्धरावृत्तम् ॥३॥

यथा वा तातचरणानाम् –

कुरङ्गाक्ष्या वेणीं सुभग विपरीते रतविधा-
वधिस्कन्धं[4] दृष्ट्वा किमपि निपतन्तीमरिभटः ।
अधिग्रीवं युष्मत्प्रचलकरवालव्यतिकरं
स्मरन्नन्तः सद्यो विरमति परिरम्भरभसात् ॥४॥

अत्र शृङ्गारस्य भयानकं प्रति कारणता ।

उदाहरणान्तरमाह- **कुरङ्गाक्ष्या** इति । हे सुभग राजन् । अरिभटः शत्रुः । कुरङ्गाक्ष्याः निजकान्तायाः । विपरीते रतिविधौ । सुरतव्यापारे पुरुषायिते इति यावत् । अधिस्कन्धम् स्कन्धयोर्विषये । किमपि निपतन्तीं वेणीं दृष्ट्वा[5] अधिग्रीवम् । उभयत्रापि विभक्त्यर्थेऽव्ययीभावः । युष्माकं प्रचलो यः करवालः खड्गस्तस्य व्यतिकरः सम्बन्धस्तं स्मरन् सन् सद्यस्तत्कालमेव परिरम्भरभसात् । आलिङ्गनहर्षात् विरमति । अत्र भयानकं प्रति शृङ्गारस्य कारणता[6] । कञ्चित् राजानं प्रति तदाश्रितपण्डितस्येयमुक्तिः । शिखरिणीवृत्तम् ॥४॥

यथा वा-

युधि कुपितकृतान्तस्यन्दनस्पर्धिनादं
दिशि दिशि दशकण्ठस्त्यक्तवान्वारिदास्त्रम् ।
तडिति जनकपुत्र्याः साम्यमालोकमान-
स्त्यजति न पवनास्त्रं राघवः खिन्नपाणिः ॥५॥

---

१ ०तीयो । २ या । ३ इंगाळशब्देव० । ४ ०स्कन्धे । ५ दृष्ट । ६ कारता ।

अत्र शृङ्गारं प्रति वीरस्य कारणता । एषामङ्गाङ्गिभावापन्नानां रससङ्कर इति नाम वदन्ति लोकाः । रसानां मिथो विरोधोऽपि । तत्र भरतः–

शृङ्गारबीभत्सरसौ रौद्र्यावीरभयानकौ ।
रौद्रादद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥

वैरिरस इव वैरिरसस्य विभावानुभावव्यभिचारीभावा अपि रसहानिकरा इति तत्तद्वारयेत् । तत्र प्राचीनसम्मतिः–

न च वैरिरसं ब्रूयाद्वैरीणां न विभावकम्[1] ।
न विभावं च सञ्चारीभावं नैव कदाचन ॥

किन्त्वङ्गाङ्गिभावापन्नयोरेकदा एकदेशे सति न वैरम् । देशभेदे सति न वैरम् । (वृक्षे)कपिसंयोगतदभावयोरिव । समयभेदे सत्यपि न वैरम् । भूतले घटतदभावयोरिव । वैरं यथा–

प्रियेणालिङ्ग्यमानायाः प्रियायाः कुचकुम्भयोः ।
करजक्षतनिर्मुक्तं रुधिरं कुङ्कुमायते ॥६॥

युधीति । दशकण्ठो रावणः । युधि सङ्ग्रामे कुपितकृतान्तस्य यः स्यन्दनो रथस्तस्य स्पर्द्धि[2]नादो यस्य तत् । एतादृशं वारिदास्त्रं मुक्तवान् । किञ्च तडिति विद्युति । जनकपुत्र्याः सीतायाः साम्यं आलोकमानः । अत एव खिन्नपाणिः । राघवो रामः । पवनास्त्रं मेघास्त्रनिवारकं वायव्यास्त्रं न त्यजति । न प्रक्षिपति । अत्र वीररसस्य शृङ्गारं प्रति कारणता स्पष्टा । मालिनीवृत्तम् ॥५॥ एवमेषामङ्गाङ्गिभावे सङ्करः । एषां परस्परं विरोधमाह– शृङ्गारेति । स्पष्टम् शेषम् । विरोधमुदाहरति– प्रियेणेति । अत्र शृङ्गारबीभत्सयोः परस्परं वैरम् ॥६॥

देशभेदे सति विरोधाभावो यथा–

एकः सिन्धुभुवः करे विलुलित[3]श्चक्रे द्वितीयः स्थितः
कामध्वंसिनि कालकूटकवलक्लिष्टे तृतीयो धृतः ।
भूयः क्षीरनिधेर्घनप्रमथने पाणि[4]स्तुरीयस्ततो
व्यासक्तः कमलापतेर्भगवतो नानारसाः पातु वः ॥७॥

अत्र शृङ्गाररौद्रकरुणाद्भुतरसानां विरोधाभावः ।

---

१ नाविभावकम् । २ ०स्तस्याद्वी० । ३ करोतिलुलित० । ४ याणि० ।

विरोधाभावमुदाहरति– **एक** इति । अब्धिमंथनसमये विष्णोश्चतुर्णां भुजानां मध्ये । एकभुजः । सिन्धुभुवः लक्ष्म्याः । करे पाणौ विलुलितः । तथा द्वितीयः। चक्रे सुदर्शने स्थितः । राहुशिरच्छेदार्थमित्यर्थः । कालकूटकवलेन हलाहलभक्षणेन । क्लिष्टे दुःखिते । कामध्वंसिनि शिवे । तृतीयः पाणिर्धृतः[1] । तथा तुरीयश्चतुर्थः । भूयः पुनः क्षीरनिधेर्दुग्धसमुद्रस्य घने निबिडे । प्रमथने मन्थने सक्तः । ततस्तस्मान्नानारसाः । अनेकरसाः। कमलापतेर्भगवतः विष्णोः । पाणयश्चत्वारो[2] हस्ताः पायाद्वः[3] । अत्र शृङ्गारादीनां चतुर्णां रसानां विषयभेदेन विरोधाभावः । शार्दूलविक्रीडितम् ॥७॥

समयभेदेन[4] यथा–

भग्नं कामरिपोर्धनुः परिहृतं राज्यं स्थितं कानने
निर्भिन्नस्त्रिशिराः खरस्य पिशितं स्पृष्टं कपिर्लोलितः ।
लङ्केशो दलितश्चिराय रुदितं लङ्कावधूनां श्रुतम्
नीता सद्म विदेहभूस्तदखिलं रामस्य लोकोत्तरम् ॥८॥

अत्राद्भुतभयानकरौद्रबीभत्सहास्यवीरकरुणशृङ्गाराणां विरोधाभावः । अङ्गाङ्गिभावापन्नानां रसानामेकत्र समावेशो यत्र[5] स च रसशबल इति तस्याप्येतदेवोदाहरणम् । अङ्ग्योर्वैरेऽपि न रसस्य हानिर्भटयोर्वैरेऽपि प्रभोरिव । यथा–

सीतां संस्मर्य[6] वीचिप्रचलकुवलयस्पर्धिचक्षुः क्षिपन्तीं
सेनां संवीक्ष्य रक्षःशरदलितवपुः शोणितासारसिक्ताम् ।
रामेण क्रोधदुष्प्रेक्षमुखनिपतन्मुण्डलाभप्रमोद–
क्रीडत्कालीकरालभ्रुकुटिसहचरी सन्दधे चापयष्टिः॥९॥

अत्र शृङ्गारबीभत्सयोर्वैरेऽपि न रसहानिः ।

समयभेदेन विरोधाभावस्योदाहरणमाह–**भग्नेति** । धनुर्भङ्गादिकं यद्रामेण कृतं तदखिलमस्य लोकोत्तरमिति भावः । अत्र नवानामद्भुतरसादीनां कालभेदाद्विरोधाभावः। शार्दूलविक्रीडितम्॥८॥ पुनरप्यविरोधविषयमाह–**सीतामिति** । वीचिभिस्तरङ्गैः। प्रचलं लोलम् यत्कुवलयं तेन सह स्पर्धते तत् । एतादृशं चक्षुः क्षिपन्तीं[7] सीतां संस्मर्य । किञ्च रक्षःशरैः रक्षसबाणैर्दलितानि यानि वपुंषि तेभ्यो यः शोणितासारः रुधिरधारासंपातस्तेन सिक्ताम् । **धारासंपात आसार(अमर०१/३/११)**इत्यमरः । सेनां

१ फणि० । २ पणय० । ३ पायासुः । ४ समयः भेदेन । ५ यत्रत्र । ६ संस्म्यं । ७ क्षिपतीं ।

वाहिनीम् । संवीक्ष्य दृष्ट्वा । रामेण । क्रोधेन दृप्यन् । यो दशमुखो रावणस्तस्य निपतन्ति यानि मुण्डानि[1] तेषां यो लाभस्[2]तेन यः प्रमोदस्तेन क्रीडन्ती या काली । तस्याः कराला वा या भ्रुकुटीः तस्याः सहचरी । तत्सदृशी वक्रेति[3] यावत् । एतादृशी चापयष्टिः सन्दधे । बाणेन सहेति शेषः । अत्र शृङ्गारबीभत्सयोः सहजविरोधेऽपि वीरस्य मुख्यत्वान्न हानिः । स्रग्धरावृत्तम् ॥९॥

एवमङ्गाङ्गिभावापन्नयोर्विरोधिनोरेकत्रभावेऽपि न रसहानिः । यथा –

भौजङ्गमं गिरिमयं जलदात्मकं वा
शस्त्रं यदैव मुमुचे दशकन्धरेण ।
सर्वं विदेहतनयाविरहातुरेण
रामेण वह्निमयमस्[4]त्रमिव व्यलोकि ॥१०॥

अङ्गाङ्गिभावापन्नयोर्नित्यविरोधिनो[5]रेकत्रभावेऽपि न हानिरिति तदुदाहरणमाह– **भौजङ्गममिति**[6] । दशकन्धरेण रावणेन । भुजङ्गमस्येदं भौजङ्गमम्[7] । सर्पास्त्रमित्यर्थः । गिरिमयं पर्वतास्त्रम् । तथा जलदास्त्रं मेघास्त्रम् । च परं शस्त्रम्[8] । यन्मन्त्रेण प्रयुज्यते तदस्त्रम् । यत्करस्थमेवायुधं प्रहरति तच्छस्त्रम् । यन्मुक्तं सत्पुनरायाति तन्मुक्तम् । यन्मुक्तं सत् न पुनरायाति तत्प्रयुक्तमिति भेदाः । तत्राद्यं सर्पास्त्रादि द्वितीयं खड्गादि । तृतीयं बाणादि चतुर्थं भुशुण्ड्यादीति भेदोदाहरणानि । यदैव यस्मिन्नेव समये मुमुचे तस्मिन्नेवावसरम् । सर्वं शस्त्रास्त्रम् । विदेहतनया-विरहा[9]कुलेन रामेण । वह्निमयमिव । व्यलोकि दृष्टम् । यद्वा भौजङ्गमादिशस्त्रम् । सर्पास्त्रादीत्यर्थः । शस्त्रशब्देनायुधसामान्येलक्षणा । अत्र रामनिष्ठवीरविप्रलम्भ-शृङ्गारयोरेकत्र समावेशेऽपि[10] परस्परमविरोधान्न रसहानिः। वसन्ततिलकावृत्तम्॥१०॥

ननु शृङ्गारबीभत्सयोः सह वैरं कुतः । मधु निपी[11]य निष्ठीव[12]न्तोः सम्भोगदर्शनादिति चेत्सत्यम् । बीभत्सस्य जुगुप्सास्थायिभावः । सा च तद्दर्शने[13]न तटस्थस्[14]य भवति । न तु तयो रागोत्कम्पादिति । ननु तथापि सति शृङ्गारो बीभत्से दृश्यते । तथा हि–

---

१ मृडानि । २ लोभ० । ३ ०सदृशा वक्तेति । ४ वन्हिमग्रमस्त्र० । ५ मविरोधिनौ० ।
६ भोजंगममिति । ७ भोजंगमं । ८ चस्त्रम् । ९ ०निरहा० । १० समोवेशोपि । ११ मधुनि०: ।
१२ निष्ठीवः तोः । १३ तद्वर्शनन । १४ तस्य ।

यद्यपि हृदि विशाला मुण्डमाला न पाणि-
स्त्यजति नरकपालं[*] रौरवं[1] चर्मचैलम्।
तदपि गिरिसुतायाः पक्षपातः पुरारौ
समुदयति विचित्रः कामिनोः प्रेमबन्धः ॥११॥

इत्यादाविति चेत्सत्यम् । निजभर्तुरधमेऽपि[2] भूषणे भक्त्यतिशयेन पत्न्यास्तदपि जुगुप्सैव न भवति । जुगुप्सितत्वेन प्रतीयमानं जुगुप्सोत्पादकम् । किञ्च प्रियसम्बन्धोपाधिकमधिकतरं[3] प्रेम तत्रोत्पद्यते । तेन स्थायिभावाभावाद्बीभत्सस्तत्र न भवति ॥११॥

ननु बीभत्सशृङ्गारयोः कुतो वैरमित्याशङ्क्याह- **मधु नीति** । मूले स्पष्टम् शेषम् । जुगुप्सा तु तटस्थस्यैव न यूनोरिति भावः। बीभत्से शृङ्गारस्योदाहरणमाह-**यदपीति** । यदपि यद्यपि । हृदि शिवस्येति शेषः । विशाला मुण्डमाला । अस्तीति शेषः। किञ्च पाणिः । शम्भुः करकपालं[*] भिक्षापात्रं न त्यजति । तथा रुरोः कृष्णसारस्येदं रौरवं चर्म । अजिनम् । तदेव चैलम् वस्त्रम् वर्तते । तदपि तथापि । गिरिसुतायाः पार्वत्याः। पुरारौ शिवे । पक्षपातोऽत्यादरोऽस्ति । तथाहि- कामिनोः विलासिनोः **पुमान् स्त्रिया-** (पा०अ०१/२/६७)त्येकशेषः । केलिबन्धः । विचित्रो नानाविधः समुदयति । अत्र सामान्येन विशेषस्य समर्थनादर्थान्तरन्यासः । अत्र पार्वतीपरमेश्वरयोर्जुगुप्साभावे स्थायिभावाभावान्न बीभत्सः । किन्तु शृङ्गार एवेत्यवधेयम् । मालिनीवृत्तम् ॥११॥

ननु वीरस्य युधि गच्छतः सर्पस्पर्शचकितता रौद्रे चाकस्मिकोत्पाते विस्मय इति चेत्सत्यम् । चकितता तत्र तत्र रसावेशान्न भवत्येव सति वा विषयभेदः । वीरे न प्रतिभटाद्भयम् किन्तु भुजङ्गमात् । रौद्रे न प्रतिबलबलाधिक्यात् किन्तूत्पाताद्विस्मय इति रसवैरस्योत्पादकस्किलम-वधेयम्। तत्र पुराणाचार्याः-

अन्यच्च रसवैरस्योत्पादकं वचनं तथा।
न वाच्यं रसभावज्ञैर्नाट्यशास्त्रविशारदैः ॥

वचनमित्युपलक्षणम्।

नन्विति। युधि वीररसाविष्टस्य वीरपुरुषस्य सर्पादिस्पर्शोऽपि न विस्मयो भवतीत्यर्थः। अथवा विषयभेदेन दोषपरिहारो भवतीत्याह-**वीरस्येति** । अत्र प्राचीनानां

१ रौरेवं । २ निजभर्तुधमेपि । ३ ०संबंधोपाध्यधिकतरं ।

सिद्धान्तमाह-**अन्यच्चेति** । नाट्यशास्त्रविशारदैर्भरतादिभिः । रसवैरस्योत्पादकं वचनं न वाच्यमिति योजना।

एवं भावविभावाऽनुभावेष्वपि द्रष्टव्यम् -

क्वाऽहं क्व त्वं क्व मधुसमयः कुत्र वा दूतिकाऽसौ
मेघच्छाया प्रविचलमिदं कुत्र वा प्रेम यूनोः ।
आयुर्वायुप्रचलबिसिनी*वारिबिन्दूपमानं
मानं मुग्धे विसृज सकलं तुच्छमेव प्रतीमः ॥१२॥

अत्र निर्वेदप्रतिपादकमखिलं शृङ्गारविरोधि।

रसवैरस्योत्पादकमखिलवचनमुदाहरति-**क्वाहमिति** । मानिनीमानमपनेतुं प्रवृत्तस्य कस्यचिदियमुक्तिः । हे मानिनि । अहं क्व तथा त्वं क्व । किञ्च मधुसमयो वसन्तः क्व तथासौ दूती शम्भली कुत्र ? किञ्च मेघच्छायावत्प्रविचलम् चञ्चलम् । यूनोर्विलासिनोः इदं प्रेम कुत्र। अत्र वा शब्दो विकल्पे समुच्चये वा। किञ्च प्रचला चञ्चला या नलिनी*। तत्र यो वारिबिन्दुः स एवोपमासादृश्यं यस्य तत् । एतादृशमायुः क्व। नैतच्चिरस्थायीति भावः । तस्मात् हे मुग्धे बाले। मानं विसृज। वयं इदं सकलं तुच्छमसारमेव प्रतीमः जानीमः । अत्र निर्वेदप्रतिपादकमखिलवचनं शृङ्गारविरोधीत्यवधेयम् । मन्दाक्रान्तावृत्तम् ॥१२॥

अनौचित्यं च सर्वथावधेयम्। तत्र प्राचीनग्रन्थकृतः-

अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसोत्कर्षाय जायते ॥(ध्वन्या०३/१४ वृत्ति)

उद्वेगकरमनौचित्यम् । लोकयात्राप्रसिद्धमौचित्यम् । तस्माद्यूनोर्यत्र मिथो रतिस्तत्रैव रसः । एकस्यैव रतिश्चेत् रसाभास एव । एकस्या एव रतिश्चेत् रसाभास एव। क्रमेणोदाहरणे -

सीतासमागमश्लाघाबन्धुरं दशकन्धरम् ।
प्रहर्तुं क्रमते कामो रामो वा निशितैः शरैः ॥१३॥

अत्र रावणस्यैव रतिर्न तु सीतायाः ।

---

१ रसवैस्यो० । २ त्य० । ३ मेछायावत्प्रतिचंचलंचलं । ४ क्वा । ५ सर्वथाबुधेयम् ।
६ तस्माद्यूनोयत्र । ७ रसानास ।

निधुवनवनप्रान्ते यान्तं चलन्नयनाञ्चलैः
किमिति वलितग्रीवं मुग्धे मुहर्मुहुरीक्षसे।
विफलमखिलं यूनोर्नो चेदुदेति परस्परं
रतिरथ मनोजन्मा देवः स एव निषेव्यताम् ॥१४॥

अनौचित्यादृसभङ्ग इति वक्तुं प्राचीनाचार्यसम्मतिमाह-**अनौचित्यादिति**[1] । अनौचित्यादृसभङ्गः । औचित्यादृसनिष्पत्तिरित्यर्थः । अथ रसाभासस्योदाहरणमाह-**सीतेति** । सीतायाः यः समागमस्तेन श्लाघा कीर्तिस्तत्र बन्धुरं लोलुपं दशकन्धरम् । प्रहर्तुं कामो मन्मथः । अथवा निशितैः[2] शरैर्बाणैः कृत्त्वा रामः क्षमते । नान्य इत्यर्थः । अत्र रावणनिष्ठाया रतेराभासत्वम् ॥१३॥ अथ[3] नायिकानिष्ठरतेराभासत्वमाह-**निधुवनेति** । हे मुग्धे । निधुवनस्य व्यवायस्य । यो[4] वनप्रान्तो वनप्रदेशः । **ग्राम्यधर्मो निधुवनं व्यवायो मैथुनं च तदि**(अमर०२/७/५७)त्यमरः[5] । तस्मिन्विषये यान्तं कमपि पुरुषम् । चलैर्लोलैर्नयनाञ्चलैः कृत्वा । मुहुर्मुहुर्वलितग्रीवम् । पुनर्पुनर्विवर्त्तिग्रीवं यथा तथा किमिति ईक्षसे त्वमिति शेषः । कुत इत्यपेक्षायामाह-चेद्यदि यूनोः स्त्रीपुंसयोः परस्परं रतिः प्रीतिर्न उदेति तदाखिलं निष्फलमस्ति । अथानन्तरम् । मनोजन्मा देवः कामदेवः । स एव निषेव्यताम् । कामस्य देवत्वात्तदाराधनेन तवेप्सितं भविष्यतीति न तत्पुरुषावलोकनेनेति भावः । अत्र नायिकानिष्ठायाः रतेराभासत्वम् । हरिणीवृत्तम् ॥१४॥

अत्र नायिकाया एव रतिर्न तु नायकस्य । एवमेकस्या अनेकविषया रतिराभास एव । परन्त्वेष विशेषः । यस्य व्यवस्थिता बह्व्यो नायिकास्तत्र न रसाभासः । तथा सति कृष्णस्यापि सकललोकनायकोत्तमस्य बहुकामिनीविषयाया एव रतेराभासापत्तिः । दक्षिणनायकस्याभासापत्तेः । तस्माद्व्यवस्थितबहुकामिनीविषयकवैशिकनायकपरमेतत् । अत एव वैशिकानां वेश्यानां च रसाभास इति प्राचीनमतम् । एकस्य अनेकविषया रतिः यथा-

संपत्कस्याद्य तारा भवति तरलिता यत्पुरो नेत्रतारा
दृष्टा केनाद्य काञ्ची यदभिमुखमथो वेपते रत्नकाञ्ची।

---

१ अनौचित्यामिति । २ नितैः । ३ ०भासत्वंमाह । ४ यौ । ५ व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतमिति पाठः अमरकोशे ।

उग्रः कस्याद्य तुष्टः सखि यदनुगमे कश्चिदुग्रोऽभिपातः
स्नातं केनाद्य वेणीपयसि विलुलिता यत्कृते क्वापि वेणी ॥१५॥

विशेषमाह- **यस्येति**। यद्यपि कस्यचित् बह्व्यो नायिकाः सन्ति तथापि स्नेहेन व्यवस्थिताश्चेन्न तत्र रसाभासः[1]। **तस्मादिति**। वैशिक पारदारिकः। वेश्यानां व्यवस्थाविरहादृतेराभासत्वम्। वेश्यां गच्छतीति वैशिकः। **गच्छतौ परदारादिभ्य** (वा०)इति ठक्। अस्योदाहरणमाह-**संपदिति**[2]। अद्य कस्य संपल्लक्ष्मीस्तारा महती वर्तते। कुतः यत्पुरः यस्याग्रे। नेत्रतारा नयनकनीनिका। तरसाकृता इति तरलिता। कामिनी येति शेषः। **तत्करोति तदाचष्टे**(वा०) इति णिजन्तात्कर्मणि क्तः। किञ्चाद्य केन सुकृतिना काञ्ची[3] शिवकाञ्ची विष्णुकाञ्ची च दृष्टा भवति। यतः यस्याभिमुखे इति यदभिमुखतः सप्तम्यर्थे तसिल्[4]। रत्नखचिता काञ्ची। वेपते कम्पते[5]। मध्यमपदलोपी समासः। किञ्च हे सखि। अद्याधुना। उग्रः शिवः। कस्य तुष्टः संतुष्टः। कुतः यदनुगमे यस्य प्रयाणे। कश्चित् कोऽपि उग्रः। क्रूरोऽभितापः पश्चात्तापो भवति। किञ्च अद्य वेणीपयसि प्रयागे न स्नातम्। कुतः यत्कृते यदर्थं काऽप्यतिरमणीया वेणी केशबन्धः। वेणी तु संयताः केशा इति शब्दभेदप्रकाशः। विलुलिता विकीर्णा। एतत्सर्वं सुकृतीनामेवानुकूलम् नान्येषामिति भाव[6]ः। अत्रानेक-नायकविषया एकनायिकानिष्ठायाः रतेराभासत्वम्। स्रग्धरावृत्तम् ॥१५॥

एकस्यानेकविषया रतिर्यथा-

पञ्चेषुक्षितिप[7]प्रतापलहरी प्रीतिस्त्वदीया पुनः
कासां न स्तनकाञ्चनाचलतटे काश्मीरपङ्कायते।
कासां मूर्धनि नैव नीरजदृशां सिन्दूरलेखायते
कासां वा न च कर्णयोः प्रियसखे माणिक्यभूषायते ॥१६॥

एकनायकनिष्ठाया रतेरुदाहरणमाह- **पञ्चेष्विति**। पञ्चेषुक्षितिपस्य[8] यः प्रतापस्तस्य या लहरीरूपा तदीया प्रीतिः पुनः रतिस्तु कासां स्त्रीणां स्तनकाञ्चनाचलतटे विषये न काश्मीरपङ्क इव कुङ्कुमकर्दम इवाचरति काश्मीरपङ्कायते। किञ्च तदीया प्रीतिः। कासां नीरजदृशां मूर्धनि शिरसि नैव सिन्दूरलेखायते। किञ्च हे प्रियसखे कासां वा स्त्रीणां कर्णयोर्विषये माणिक्यभूषा इवाचरतीति माणिक्यभूषायते। अत्र सर्वत्रा-

---

१ रसाभासाः। २ संपदि। ३ कंची। ४ तसिला। ५ कांपते। ६ भावाः। ७ ०क्षितिय०।
८ ०क्षितियस्य।

चारार्थे कर्त्तरि क्यङ्। अत्रानेकनायिकाविषया एकनायकनिष्ठाया रतेराभासत्वम्। शार्दूलविक्रीडितम् ॥१६॥

यत्र रसा बहवस्तत्र रसशबलः। यत्र भावा बहवः स च भावशबलः। रसशबलो[1] दर्शित एव। भावशबलो यथा-

प्रव्रज्यैव शुभाय मे श्रुतिपथे जायेत[2] तस्या वचः[##]
वक्त्राग्ने[*]मम क[*]ः स्मरस्त्रिजगती शून्या विना राधया।
निर्मुक्तैव मनस्त्रपा मृगदृशो लावण्यमन्यादृशं
धिग्जन्म क्व गतासि किं विलपितैः[3] क्वासि प्रसन्ना भव ॥१७॥

निर्वेदौत्सुक्यामर्षभ्रममतिविषाददैन्यानां भावानां साङ्कर्यादेः[4] भावशबल इति।

पूर्वं रसशबलं प्रदर्श्य[5] भावशबलस्योदाहरणमाह- **प्रव्रज्यैवेति**। मे मम। प्रव्रज्या सन्यास एव शुभाय[6] श्रेयसेऽस्ति। अत्र निर्वेदः। तस्या वचो[7] मे श्रुतिपथे जायेतेत्यौत्सुक्यम्[8]। स्मरः कामः। चकाग्रे[*] मत्सुदर्शनाग्रे। मशक[*]ः इव मशक इत्यमर्षः[9]। राधया विना त्रिजगती शून्येत्यनेन मोहः[10]। मनस्त्रपा निर्मुक्तैवेत्यनेन मतिः[11]। किञ्च मृगदृशः लावण्यं अन्यादृशम्। अन्यदेवेति[12] स्मृतिः। धिक् जन्मेति विषादः। क्व गतासीति दैन्यम्। किं विलपितैरिति धृतिः। प्रसन्ना भवेत्यौत्सुक्यम्। एवमेतेषां भावानां साङ्कर्याद्भावशबलः। शार्दूलविक्रीडितम् ॥१७॥

अथरसाभावालङ्काराणाम् अभिव्यक्तिः। रसस्त्रिविधः अभिमुखो विमुखः परमुखश्चेति। भावविभावाऽनुभावैरभिव्यक्तैर्[13]यस्याभिव्यक्तिः सोऽभिमुखः। भावविभावानुभावानामनुक्तत्वात्कष्टावगमो विमुखः। परमुखो[14] द्विविधो- ऽलङ्कारमुखो भावमुखश्चेति। अलङ्कारमुखेऽलङ्कारो मुख्यो मनोविश्रामहेतुत्वाद्रसो गौण[15]ः। भावमुखे[16] भावो मुख्यो मनोविश्रामहेतुत्वाद्रसो गौण[17]ः। अत्र प्राचीनसम्मतिः-

अलङ्कारे च रुचिरे मनोविश्रान्तिकारिणि।
अलङ्कारस्य मुख्यत्वं गौणत्वं रसभावयोः ॥

---

१ रसबले। २ जायेति। ३ विलिपितै। ४ ०कयादैष। ५ प्रदृश्य। ६ अभाय। ७ वर्चामि। ८ ०त्यौत्सुकम्। ९ इत्यमर्थः। १० ०त्यनेनर्मेहः। ११ मितिः। १२ अन्यदेवति। १३ विभानुभावैः। १४ परममुखो। १५ गुणः। १६ भावमुख। १७ गुणः। ## The words पठे इति पाठः are added here which do not fit in the context.

अभिमुखाः स्वप्रकरण उदाहृता एव। विमुखो यथा–

मैथिली लक्ष्मणो रामः सुग्रीवः पवनात्मजः।
लङ्कापुरं परित्यज्य पारं वारिनिधेर्ययुः[1] ॥१८॥

सङ्कटमखिलमुतीर्य समागता इत्यद्भुतरसः कष्टादवगम्यते।

अलङ्कारमुखो यथा –

एषा न लेखा भ्रमतामलीनां भाति प्रभाते नवकैरविण्याः।
आलिङ्गिता किन्तु तुषारभानोः कान्तिः कलङ्कस्य वपुर्विलग्ना ॥१९॥

अत्रापह्नुतेरलङ्कारस्य मुख्यता।

अथेति। रसालङ्कारभावानाम् व्यञ्जनावृत्त्याऽभिव्यक्तिरित्यर्थः। स्पष्टम्। **अलङ्कारे** इति। गौणत्वमुख्यत्वमित्यर्थः। विमुखस्योदाहरणमाह– **मैथिलीति**। अत्रविभावादीनामभावात्कष्टेनाद्भुतरसावगम इत्यर्थः। शार्दूलविक्रीडितम्** ॥१८॥ अलङ्कारमुखस्योदाहरणमाह–**एषा** इति। प्रभाते उषसि। भ्रमताम् अलीनाम् भ्रमराणाम्। लेखा श्रेणिः। न भवति किन्तु नवकैरविण्याः नूतनकुमुदिन्याः वपुः। आलिङ्गिता आश्लिष्टा। तुषारभानोश्चन्द्रसम्बन्धिनः कलङ्कस्य कान्तिः वपुर्विलग्ना सति विभाति। अत्रापह्नुतेरलङ्कारस्य मुख्यत्वम्। इन्द्रवज्रावृत्तम् ॥१९॥

भावमुखो यथा–

सप्ताम्भोनिधिनीरहीरपटलालङ्कारिणीं मेदिनीं
दातुं विप्रकुलाय योजितवतः सङ्कल्पवाक्योद्यमम्।
नाभीनीररुहात्सरोरुहभुवा तत्कालमाविष्कृते
हस्ताम्भोरुहि भार्गवस्य किमपि व्रीडास्मितं पातु नः ॥२०॥

अत्रादभुतभावस्य मुख्यता। दानवीरस्य गौणता।

विद्वद्वारिधराः स्नेहं तथा वर्षन्तु सन्ततम्
लभते विपुलां वृद्धिं यथा रसतरङ्गिणीम् ॥१॥
अवगाहस्व वाग्देवि दिव्याम् रसतरङ्गिणीम्।
अस्मत्पद्येन पद्येन रचय श्रुतिभूषणम् ॥२॥

---

१ ०ययौ। २ ०कष्टेमा०। ३ ०मुख्यस्यो०। ४ लेखां। ५ कलंककस्य। ६ ०तीरपटला०। ७ विप्रकुलायोजित०। ८ ०वतुः। ९ तत्कालसाविः कृते। १० वर्षतु।

** The metre applicable here is अनुष्टुप्. शार्दूलseems to be a slip of pen either on the part of the commentator or the scribe.

यावद्भानोः कृता काऽपि[1] कालिन्दी भुवि वर्तते ।
तावत्तिष्ठतु मे भानोरेषा रसतरङ्गिणी ॥३॥

[इतिश्री कविकलासनाथगणपतितनयश्रीभानुदत्तमिश्रविरचितायां रसतरङ्गिण्यां प्रकीर्णकं नामाष्टमस्तरङ्गः ॥८॥

॥ समाप्तोऽयं ग्रन्थः॥]

भावमुखस्योदाहरणमाह– **सप्तेति** । सप्ताम्भोनिधितीरे यत् हीरपटलम् रत्नवृन्दम् । हीरशब्दोऽत्र रत्नसामान्यपरः । तेनालङ्कारिणीम् । अलङ्कारवतीम् मेदिनीम् वसुन्धराम् । विप्रकुलाय विप्रवृन्दाय । सम्प्रदाने चतुर्थी[2] । दातुम् । सङ्कल्पवाक्यस्य नामगोत्रोच्चार[3]पूर्वकप्रयोगस्य । उद्यमम् प्रयत्नम् । योजितवतः कृतवतः । भार्गवस्य परशुरामस्य । नाभिनीररुहात् नाभिकमलात् । अपादाने पञ्चमी । तत्काल[4]म् सद्यो हस्ताम्भोरुहि करकमले आविष्कृते । दानं ग्रहीतुं प्रसारिते सति । किमपि किञ्चित् । व्रीडायुक्तं स्मितं व्रीडास्मितम् । नोऽस्माकम् । पातु रक्षतु । आशिषि लोट् । अत्र भार्गवस्य विष्णुनामसहाभेदेन वर्णनमिदम् । अत्र ब्रह्मणो[5] ब्राह्मणत्वाद्दानं गृहीतुं करप्रसारणमित्याशयः । अत्र भार्गववर्णने कविनिष्ठप्रीतेर्मुख्यता दानवीररसस्या–मुख्य[6]त्वमित्यर्थः । शार्दूलविक्रीडितम् ॥२०॥

अथ रसालङ्कारयोः पृथक्लक्षणे । विभावानुभावव्यभिचारिव्यङ्ग्यत्वे सति पूर्णस्थायित्वं रससामान्यलक्षणम् । उक्तञ्च **काव्यप्रकाशे**–

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥१॥
विभावाः अनुभावास्तत्कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः॥२॥ इति ॥

(का०प्र०४/२७–२८)

अथालङ्कारलक्षणम् । रसात्मककाव्यशरीराङ्गभूतशब्दार्थान्तरनिष्ठचमत्कारा–धायकत्वमलङ्कारसामान्यलक्षणम् । तत्रैव यथोक्तम्–

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥ इति ।(का०प्र०८/६७)

---

१ क्वापि । २ चतुर्थ । ३ ०गोत्राच्चार० । ४ तत्कलम् । ५ ब्राह्मणो । ६ दानवीरसख्यामुख्यत्व०।
[ ] This much colophon text is not found in the ms.

यत्तु **अलङ्कारचन्द्रिकायामलङ्कारलक्षणमुक्तम्** तन्मन्दमाभाति । तथा हि–अलङ्कारत्वम् च रसादिभिन्नव्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या विषयितासम्बन्धावच्छिन्ना चमत्कृतिजनकतावच्छेदकतावच्छेदकत्वम् । रसादिभिर्यद्व्यङ्ग्यं वस्तुरूपमलङ्काररूपं च तद्भिन्नत्वे सति अत्यन्तमयुक्तम् । रसादिभिन्नव्यङ्ग्यात् वस्तु–अलङ्कार–रूपात् भिन्नस्य रसादिव्यङ्ग्यस्यैव ग्रहणापत्तेः । तथा च रसादिव्यङ्ग्यत्वे सतीत्यर्थः सिद्ध्यति । सत्येवं रसादिव्यङ्ग्यस्य नियतमलङ्कारत्वं प्राप्नोति । न हि रसादीनां सर्वकालिकमलङ्कारत्वम् । किन्तु सजातीयस्य विजातीयस्य वा रसादेरङ्गभूतस्यैव न तु प्रधानीभूतस्य । तस्मादप्रधानीभूतेति रसादिविशेषणं योज्यम्[1] स्यादिति । अन्येऽपि दोषाः प्रतिभान्तीत्यलमतिविस्तरेणेति । ग्रन्थकारप्रार्थनाश्लोकविवरणम्[2] । **विद्वदिति** । विद्वांस एव वारिधरा मेघाः । स्नेहं प्रीतिरूपोदकम् तथा तेन प्रकारेण सततं वर्षन्तु । निरन्तरं सिञ्चन्तु । यथा येन प्रकारेण । रसतरङ्गिणी(रस) रूपा नदी । विपुलां बहुलाम् । वृद्धिं विस्तारम् लभते । लभेतेत्यपि पाठः । **अवगाहस्वेति**[3] । हे वाग्देवि सरस्वति । दिव्यामतिरमणीयाम् । रसतरङ्गिणीम् । अवगाहस्व[4] प्रविशास्व । किञ्च हे देवि । अस्मत्पद्यरूपेण पद्मेन कमलेन श्रुतिभूषणम् स्वकर्णाभरणम् ॥२॥ **यावदिति** । भानुकृता सूर्यजनिता । काऽपि कालिन्दी[5] सूर्यतनया । **कालिन्दी सूर्यतनया यमुना शमनस्वसे**(अमर०१/१०/३२)त्यमरः । भुवि पृथिव्याम् । यावत्कालं नन्दति मोदते । तिष्ठतीति यावत् । तावत्समयम् भानुनाम्नो मे मत्सम्बन्धिनी । मन्निर्मितेति यावत् । एषा निर्मिता सतीति बुद्धिः स्यात्[6] । रसानां जलानां तरङ्गिणीव नदीव रसतरङ्गिणीनामा ग्रन्थः तिष्ठतु[7] । प्रार्थनायां लोट् । तरङ्गिणीशब्देन वृत्तौ साध्यवसाना लक्षणेति विस्तरेण प्रपञ्चितं पूर्वमेवेत्यास्तामतिविस्तरेणेति दिक् ॥३॥ अत्र ग्रन्थान्ते शिष्टाचारार्थं मङ्गलार्थम् च शुभशब्दप्रयोगः ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते मङ्गलमाचरणीयमिति शिष्टाचारात् । उक्तं हि– मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते । वीरपुरुषाण्यायुष्मत्पुरुषाणि भवन्ति । अध्येतारश्च प्रवक्तारो भवन्तीति[8] दिक् ।

---

१ ग्रन्थाकार० । २ विवर्णं । ३ अवगाहास्वेति । ४ अवगाह । ५ कालिन्दी सूर्यतनया यमुना च यमस्वसेत्यमरः । ६ स्या । ७ तिष्ठतुः । ८ भवतीति ।

पाण्डित्यं प्रकटीकृतं न च मया निर्मूलमत्राधुना
नो वा भूरितरो वृथा विरचितो वादो वितण्डात्मकः ।
कोशव्याकरणाद्यलङ्कृतिकृतां ज्ञात्वा मतं तत्त्वतः
संक्षिप्तैः प्रतिसंस्कृतैः रसतरङ्गिण्या कृतेयं तरी ॥१॥

आनन्दरामविबुधः प्रथितः परो यः
काव्याद्यलङ्कृतिरसादिविभावकेषु[1] ।
तत्सूनुना भगवता विदुषा कृतेयं
टीकाधुना रसविवेकवतां मुदे स्तात् ॥२॥

ये मल्लिनाथकविकल्पितसंप्रदाय-
शिक्षाविलासरसिका विबुधा धरायाम् ।
ते मत्कृतिं रसविवेकवतीमथेमां
दृष्ट्वा प्रहृष्टमनसः सुतरां भवन्तु ॥३॥

व्यरचि विशदैर्नूनं नूत्नातरीः प्रतिसंस्कृतै-
र्जगति विबुधाः संश्रित्यैतां तरन्तु तरङ्गिणीम् ।
यदि मम क्षतौ कालेनास्यां पतेद्वचनान्तरं
विमलमतिभिः किंगण्यं तद्यतः सुधियो हिते ॥४॥

अधीताऽऽशाधरगुरोर्यथा रसतरङ्गिणी ।
तथैव रचिता तस्याष्टीकेयं कृतिनां मुदे ॥५॥

इतिश्रीमहोपाध्यायावटुश्रीआनन्दरामभट्टात्मजश्रीभगवद्भट्ट-
विरचितायाम् रसतरङ्गिणीव्याख्यायां नूतनतरी-
समाख्यायामष्टमस्तरङ्गः[2] समाप्तः ॥८॥

इतिश्रीरसतरङ्गिणीटीकायाः
समाप्तोऽयम् ग्रन्थः ।**

---

१ विभावुकेषु । २ ०समाख्यामष्ट० । ** The word ग्रन्थः is dropped in the ms.

Notes on Rasataraṅgiṇī and Nūtanatarī

First Taraṅga: Sthāyī Bhāvas

P. 1 In *Nūtanatarī* by Bhagavadbhaṭṭa there is a clear mention of Āśādharabhaṭṭa as his *vidyāguru* twice on the opening:

श्रीमदाशाधरगुरोः प्रसादात्क्रियते मया ।
तरी रसतरङ्गिण्याष्टीकेयं नातिविस्तरा ।। — p. 1

and at the end:

अधीताऽऽशाधरगुरोर्यथा रसतरङ्गिणी ।
तथैव रचिता तस्याष्टीकेयं कृतिनां मुदे ।। — p. 135

In both the verses Bhagavadbhaṭṭa clearly states that he has written this commentary on the same line as *Rasataraṅgiṇī* was taught by his *guru*. In the first *taraṅga* where *Rasataraṅgiṇī* quotes अयि जीवितनाथ जीवसि (कु०सं० 4.3), the commentator shows that it is Vaitālīya metre and quotes its characteristics from *Piṅgala Chandaḥsūtra*. Then he adds:

व्याख्यातं चैतदाशाधरभट्टैः । यथा
प्रथमे च तृतीये च यत्र मात्राश्चतुर्दश ।
द्वितीये च चतुर्थे च पादे मात्रास्तु षोडश ।।
पादान्तरे गणो यत्र लघुर्गुरुरपि क्रमात् ।
तच्छन्दःशास्त्रतत्त्वज्ञा वैतालीयं प्रचक्षते ।। इति ।।
— p. 8

Here also he quotes some work of his *guru* in Chandaḥśāstra. Such references provide us strong evidence of the relationship between Bhagavadbhaṭṭa and Āśādharabhaṭṭa and their close association with Gujarat. The issue is discussed at length in the introduction. In गौरीं त्रिलोकजननीं . . ., etc. (1.1), Bhagavadbhaṭṭa offers his salutations to Gaurī and Śiva while Bhānudatta offers his regards to Viṣṇu. Bhagavadbhaṭṭa explains even his own invocational verse, where he describes Gaurī and Śiva as the

parents of the world प्रपञ्चमातापितरौ after Kālidāsa who has used the epithet जगतः पितरौ for Pārvatī and Parameśvara in *Raghuvaṁśam* 1.1. In the *maṅgala śloka*, as Bhagavadbhaṭṭa comments, eight epithets of Viṣṇu in the nominative case, suggest eight *rasa*s like Śṛṅgāra etc.:

> लक्ष्मीमालोक्य लुभ्यन्शृङ्गार, निगममुपहसन्हास्य, शोचयन् यज्ञजन्तून् करुण, क्षत्रं शोणाक्षि पश्यन्रौद्र, समिति दशमुखं अञ्चन्वीर, हत्वा हैयंगवीनं अपसरन्भयान, म्लेच्छरक्तैर्दिगन्तान् . . . सिञ्चन्बीभत्स, दन्तेन भूमिं तुलयन्अद्भुत ।

As it is his peculiar practice, Bhagavadbhaṭṭa explains selected grammatical forms like लुभ्यन्, शोचयन् and तुलयन् with clear mention of Pāṇinian *sūtra*s. The epithet पीतवासाः employed in the verse is an epithet of Viṣṇu that indicates the name Viṣṇu as his adjective पीतवासाः is quite well known. The commentary gives synonyms of even popular words like हृत्वा (चोरयित्वा).

P. 2 भारत्याः . . . (*RT* 1.2) is the *pratijñā śloka* as Bhagavadbhaṭṭa comments. Here Bhānudatta enunciates the theme of *Rasataraṅgiṇī* and indicates his aim of writing his famous treatise, to make the topic of *rasa* comprehensible. Vāk Devī is weirdly wandering in the dense forests of Śāstras of *rasa*, i.e. various theories, and Bhānudatta wants to make it easy to understand. He, therefore, uses the word शैत्यकारिणी, i.e. सुखकर्त्री. Readers are lost in the intricate principles and theories of *rasa* relish and Bhānudatta proposes to render the *rasa* theory in easy popular terms for them. In the title of the treatise — रसतरङ्गिणी — a compound word is explained as a metaphorical indication — the *rasa*s are like water. *Taraṅgiṇī* is a river. The treatise *Rasataraṅgiṇī* is like a river where waters of various sentiments like Śṛṅgāra are flowing. In Bharata's *Nāṭyaśāstra* 6.19 eight *rasa*s are enumerated:

> शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
> बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ।।

Bhagavadbhaṭṭa calls his commentary नूतनतरी. If *Rasataraṅgiṇī* is a river, the commentary is a new boat which helps the reader to cross that river. Since *Nūtanatarī* is written with a different viewpoint, it is called *nūtana* (new).

P. 3 वाणी कमलिनी . . . (*RT* 1.3) the river of treatise is *vāṇī* (the speech) inherent in the intellect of Bhānudatta. It is like a lotus plant. Bhagavadbhaṭṭa interprets *vāṇī* as the poetical charm. The scholars and connoisseurs are like swans endowed with नीरक्षीरविवेक. They will appreciate this treatise with discriminating skill. Bhagavadbhaṭṭa brings out another sense also: *Vāṇī* is Sarasvatī. She herself is lotus plant. Bhānu is the sun. The sun rises and lotus plant blossoms. Bhānudatta is illuminating the *rasa* topic with a new light. Bhagavadbhaṭṭa compares *Rasataraṅgiṇī* with Kālindī, i.e. Yamunā, the river which is described as Sūryaputrī. Bhānudatta has offered his invocation to Viṣṇu and Lakṣmī, therefore, such an interpretation is also appropriate.

